१ मार्गशीर्षकृष्ण एकादशीतिथौ इत्यर्थः। २ श्रीमद्भिः झव्हेरसागरपूज्यपादैरन्तिमसमये स्वशिष्यायानन्दसागराय आगमाभ्यासपरतायाः श्रुतप्रचारस्य च भारपूर्वकं शिक्षादत्ताऽऽसीत्। ३ अहमदावादनगरे शाहपुरमध्ये इत्यर्थः। ४ तृतीयां। ५ गोलवाडीयपंचतीर्थ्याः। ६ पंचमीमित्यर्थः। ७ पिता ज्येष्ठभ्राता चेत्यर्थः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वर्षान्ते 'चारुतर'जनतां बोधयित्वार्यतत्त्वं,
'छाणीग्रामे'ऽवसदृषिमितं[1] वृष्टिकालं सुधीरः ।
मूर्त्तिन्द्वावाञ्जिनमतरिपून्[2] ढुण्ढकान् जोषमाऽऽस्य,
'कल्लोलाख्ये'पुरि विहरता येन दीप्तं सुचारु ॥ २९ ॥

शास्त्रव्याख्याचकितसुबुध'स्तम्भने' यो ह्यकार्षी-
च्चातुर्मासं वसुमितमथो[3] कृतधर्मप्रचारः ।
प्रश्नोत्कर्षाज्जिनमतहितात् पार्श्वचन्द्रान्यतीर्थ्यान्,
कृत्वा वादे प्रतिहतधियो भासिता जैनदृष्टिः ॥ ३० ॥

वर्षान्ते षड्[4]रियुतभविकं सङ्घमादाय भव्यं,
यात्रां कृत्वा विमलगिरिसत्तीर्थराजस्य सम्यक् ।
भव्योद्बोधं सुविधिविचरन् व'सार्णद'पुर्यां,
चातुर्मासं नवममवसच्छास्त्रतत्त्वप्रकाशी ॥ ३१ ॥

चातुर्मासत्रय'महमदावाद'माश्रित्य लब्धा,
शाब्दे[5] न्याये रुचिरपटुता येन विद्वत्सुमान्या ।
कृत्वा रम्यां सुविधि तमसां[6] नोदिकां तीर्थयात्रां,
दुष्कालार्त्तौ सहकृतिनिधिः[7] कारिता 'पट्टणे'[8] येः ॥ ३२ ॥

८ ५ ९ १
नागाक्षाङ्केन्दुमितशरदो माघराकाह्निरम्ये,
प्रायच्छद्धर्मज[9]जरणछोडाय दीक्षां सुशिक्षाम् ।
आद्यं शिष्यं 'विजयसहितं सागरा'न्तं विधाय,
९ ५ ९ १
वर्षा ब्रह्मेषुनिधिकुभवां 'भावपुर्या'[10]मवात्सीत् ॥ ३३ ॥

१ सप्तमम् । २ मूर्तेरपलापकारिणः । ३ अष्टमम् । ४ एष हि शब्दः भाषायां 'छरीपालतो संघ' इत्युच्यते । ५ व्याकरणे इत्यर्थः । ६ पापानामित्यर्थ; । ७ 'सहायकारी फंड' इति भावः । ८ गूर्जरदेशीयाणहिल्लपुराख्य पट्टणे इति भावः । ९ (पेटलादासन्न) धर्मजवासिने रणछोडदासाख्यपाटीदारज्ञातिकाय भव्यायेत्यर्थः । १० भावनगरे इत्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शास्त्रोपज्ञं हितमुपदिशन् भूरिभव्यप्रबोधं,
वर्षाकालं मनु[1]मितमथो 'राजपुर्या'[2]मुवास ।
तत्रा श्री'नेमिमुनिपति'नोद्बह्य सिद्धान्तयोगान्,
'पन्न्यासाख्यं' पदमलभत ज्येष्ठशुक्ले दशम्याम् ॥ ३४ ॥

वर्षां नीत्वा 'कपडवणजे' धर्मकृत्यैस्सुरम्यै-
र्यात'स्सौराष्ट्र'मथ विचरन् देशनादानदक्षः ।
कृत्वेतस्ता[3]रणवरगिरेस्स्पर्शनां धर्मवाचा,
प्रीतैः[4] 'पेथापुर'परिषदो योजकैस्सत्कृतोऽभूत् ॥ ३५ ॥

मज्जद्भव्यान् भवजलनिधौ रक्षिता जैनवाग्भि-
र्वर्षे[5] नीत्वाऽऽगमविधियुते 'भावराजाख्यपुर्योः'[6] ।
'सूर्यद्रङ्गे' विविधसुमहैस्सत्कृतस्सूरतीयै-
श्चातुर्मासीं 'सुरतनगरे' यापयास रम्याम् ॥ ३६ ॥

चैत्यान् सर्वान् सविधि 'सुरते'श्राद्धसङ्घेन नत्वा,
गत्वा 'मुम्बापुरि' भविजनैः प्रार्थितः 'लालबागे' ।
गौराङ्गाणां 'समितशिखरे' हर्म्यसन्निर्मिमीषां,
धैर्यात् सत्ताभियमगणयन् ध्वस्तवान् यः क्षणेन ॥ ३७ ॥

'दे×ला. भ्रातु'र्निधिमपि वरं स्थापयित्वोपदेशा-
दारेभे सद्विषयखचितग्रन्थरत्नप्रकाशम् ।
सङ्घं[7] नीत्वाऽभयविधु'मुखं 'चान्तरीक्षाह्वतीर्थे,'
यात्रां चक्रे[8] रसरिनिरतैः श्राद्धवर्यैस्समेतः ॥ ३८ ॥

धाष्टर्ये नग्नैस्[9]सुबहु विहितं तत्र पूजाप्रसङ्गे,
मिथ्याभ्याख्यानमपि च ततो न्यायगेहे प्रयुक्तम् ।
जित्वाऽकार्षुः झगिति गुरवस्सत्यतत्त्वप्रयोगा-
दाङ्ग्लन्यायाधिपतिहृदये जैनधर्मप्रकाशम् ॥ ३९ ॥

---

१ चतुर्दशमित्यर्थः । २ राजनगरे-अहमदावादपुरे । ३ तारंगातीर्थस्येत्यर्थः । ४ पेथापुरीयप्रान्तिकपरिषदि गुरुवरस्य जातसत्कृतेस्सूचकोऽयंपादः । ५ चातुर्मासद्वयमित्यर्थः । ६ भावनगरे-राजनगरे । ७ अभयचंद्रझवेरिणस्संघपतिपदेन नियोजितमित्यर्थः । ८ 'छरी पालतो संघ' इतिभावः । ९ दिगम्बरैरित्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

बाणर्[५]त्य[६]ङ्के[९]न्दु[१]मितसमसि[१] प्रावृषं 'येवलायां,'
स्थित्वोद्वाह्य प्रथममुपधानव्रतं श्रावकाणाम् ।
'सूर्यद्रङ्के' जलदसमयौ यापितौ धर्मकृत्यै-
दीक्षित्वैतर्हि[२]तनगणपं 'माणिकं' चान्यभव्यान् ॥ ४० ॥

धर्मकान्तिच्छलमुपदधन् लालनाख्यो हि विद्वन्-
मन्य'स्सिद्धाचल'भुवि तदाऽपूजयत्स्वं शिवाद्यैः[३] ।
पाखण्डं तत् भृशमपगतं कर्त्तुकामैर्गणीन्द्रै-
र्मन्दश्रीः[४] कान्तिविजयमुखैस्सङ्घबाह्यः कृतस्सः ॥ ४१ ॥

स्थित्वा वर्षं[५] विषय[६]जिनमौ 'स्तम्भतीर्थे' च'छाण्यां,'
ज्येष्ठभ्रात्रे 'विजयमणये' वर्यपन्न्यासभूषाम् ।
दत्त्वा तीर्थानि सविधि नमन् 'पत्तनं चाणहिलं,'
भव्यश्रोतॄन् जिनमतसुधां पाययन्नाप रम्यम् ॥ ४२ ॥

तत्राया[७]प्य श्रुतवरमुदाप्यायिनीं भव्यवर्गा,
सङ्घ[८]स्थित्यां तपसि[९] धवले दिक्तिथौ[१०] 'मण्डुतीर्थे'[११] ।
अज्ञानान्धंतमसमथनायागमोद्धारकर्त्रीं,
श्रीउद्यां[१२] संस्थाप्य समितिमथो हर्षयामास भव्यान् ॥ ४३ ॥

आज्ञप्तं य'त्स्वगुरु'जयवीरा'भिधैरागमाना-
मुद्धारार्थं चरमसमये' पालितुं तद् यथेष्टम् ।
वह्वायासेन च गणिवरस्साधुसङ्घोपकृत्यै,
प्रारेभे मुद्रणमथ महत् स्वाश्रयेणागमानाम् ॥ ४४ ॥

---

१ वर्षे । २ वर्त्तमानकालीनगच्छाधिपतिमिति भावः । ३ शिवजीदेवशीप्रभृतिभिः । ४ प्रवर्त्तककान्तिविजयमहाराजमुख्यैः सूरिभिरित्यध्याहार्यम् । ५ चातुर्मासद्वयम् । ६ त्रयोविंशति–चतुर्विंशतितममित्यर्थः । ७ श्रुतज्ञानस्य वरमुदः–हर्षस्याप्यायिनीं–पोषिकां । ८ चतुर्विधसंघस्योपस्थितिसूचकमिदं पदम् । ९ वैशाखमासे । १० दशम्याम् । ११ भोयणीतीर्थे । १२ आगमोदयसमितिसूचकोऽयं शब्दः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वर्षायां 'पाटण'मुपगतैर्वाचनाऽद्या ह्यकारि,
निर्ग्रन्थानां वरमतिमतामागमाभ्यासवृद्ध्यै ।
तस्यां श्री'सूयगडदशवैकालषट्त्रिंशिकादी'न्,
व्याख्यायाऽयुः 'कपडवणजे' वाचनायै गणीशाः ॥ ४५ ॥

तत्र व्याख्याय पटु 'ललितावश्यकादी'[१]न् सुयत्नं
जग्मुर्वर्षार्थं 'महमदपुर्यां'[२] स्वधर्माभिवृद्ध्यै ।
तत्र'स्थानाङ्ग'मथ सविशेषाकरं[३] वाचयित्वा,
वर्षामस्थात् 'सुरतनगरे' भासयन् जैनधर्मम् ॥ ४६ ॥

तत्राकार्षुर्युगशरमिते[४] वाचने 'चानुयोग-[५]
श्रीनन्द्याचारमुखमहदावश्यकाद्या'गमानाम् ।
एवंकारात् सुयतिसमजे[६] कालदोषात्प्रहीणं,
सच्छास्त्राणां विततपठनं संततं वृद्धिमाप ॥ ४७ ॥

'आनन्दाब्धेः' प्रवरगणिनस्तत्त्वनिष्ठागरिष्ठौ,
भक्त्युत्साहौ श्रुतजिनमतस्फीतिकार्येषु दृष्ट्वा ।
(४)(७)(९)(१)
वर्षेऽयात्रिग्रहतनुमते राधशुक्ले[७] दशम्या-
माचार्यत्वं 'कमलविजया'स्सूरयः 'सूरते'ऽदुः ॥ ४८ ॥

स्वर्णे माणिक्यमिव खचितं योग्यसाम्यं च सूरे-
वीक्ष्य प्रीतस्सुमहमकरोत्'सूर्यपुर्या'स्सुसङ्घः ।
न्यायागारे:ललनविषयानिष्टवादं[८] विजित्य,
धर्मभ्राजी मुनिपतिरथो 'मोहमय्यां' समेतः ॥ ४९ ॥

---

१ ललितविस्तरा-आवश्यकसूत्र१/४-अनुयोगद्वारसूत्र-योगदृष्टिसमुच्चय-उत्तराध्ययनसूत्र१/३ग्रन्थानित्यर्थः । २ अमदाबादनगरे । ३ विशेषावश्यकभाष्य८/४सहितमित्यर्थः । ४ चतुर्थो-पंचमो चेति भावः । ५ ललितविस्तरा-योगदृष्टि० अनुयोग०१/२-आवश्यक०१/४-उत्तराध्ययन०१/३-विशेषावश्यक०८/४- स्थानांग०१/२-सूत्राणामित्यर्थः । ६ साधुसङ्घे इति भावः । ७ वैशाखशुक्ले । ८ लालन-शिवजीप्रकरणे न्यायागारेऽपि विजित्येत्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(२८)
लब्ध्यङ्कप्रावृषि[१] वृषमहिम्नोऽर्जको नैककार्यै-
दुर्भिक्षार्त्तीयनिधिकरणेऽप्रेरयद् दानशौण्डान्।
'कीकाभ्रातु'र्भवनमुषितस्सूरिराड् 'भायखले,'
स्वागःक्षान्त्यै विहितविनयः प्रार्थितो लालनेन ॥ ५० ॥

(५) (७) (९) (१)
चातुर्मासे शरमुनिनवेन्दौ श्रुतप्रोक्तरीत्या,
देवस्वोत्सर्पण[२]विवदने वादगल्भान् विजेतुः।
सूरेस्सङ्घार्पितनिखिलसद्ग्रन्थरत्नानि सङ्घो
'जैनानन्दश्रुतवरगृहे'[३]ऽस्थापय'त्सूरतीयः' ॥ ५१ ॥

'सिद्धाद्रेर्जीवणनवलचन्द्रो'हि यत्प्रेरणातो,
यात्रासङ्घं विविधसुमहैः पादचारं निनाय।
कृत्वा यात्रां सह सुभविकैस्सूरिवर्यश्चकार,
'पालीताणे' गुहमुख[४]मितां वाचनां साधुसङ्घे ॥ ५२ ॥

'पिण्ड-प्रज्ञापन-भगवतीनोघनिर्युक्तिका'श्च,
व्याख्यायो द्य शुभमुपधानव्रतं भाविकानाम्।
विज्ञप्ति'मालववसिमतां' मानयित्वा च सूरि-
शिष्यैःसाकं किल 'रतिललामाख्यपुर्यां'[५] समेतः ॥ ५३ ॥

धर्मोन्नत्या 'ऋषभसहितां केशरीमल्लनाम्नीं,
संस्थां'[६] तत्राखिलजिनमतोद्भासिकां स्थापयित्वा।
'व्याख्याप्रज्ञप्तिसमवय[७]सूत्रादिप्रज्ञापना'नां,
चक्रे व्याख्यां कुलगिरि[८]मितां वाचनां कत्तकामः ॥ ५४ ॥

'शैलाणाख्यं' पुरमथ यतीन्द्रो हि सङ्घाग्रहेण,
चातुर्मासार्थमुपगमितो धर्ममुद्धान् प्रबोद्धुम्।
मत्वा धन्यं नृपतिरपि गच्छाग्रवाचो निशम्या-
मार्युद्घो दयितहृदयस्स्वीयराज्ये चकार ॥ ५५ ॥

---

१ धर्मप्रभावनाया इत्यर्थः। २ उत्सर्पण(बोली)स्याशास्त्रीयताया देवद्रव्यस्य च चर्चासूचकमेतत्पदम्। ३ श्रीजैनानन्द-पुस्तकालये इत्यर्थः। ४ षष्टीमित्यर्थः। ५ रतलामनगरे इत्यर्थः। ६ खिलशब्दो हि विघ्नापरपर्यायोऽतोऽत्र निर्विघ्नतया जिनमतस्योद्भासकारिणीमित्यर्थो ज्ञेयः। ७ छन्दोभंगभिया विहितः श्रीसमवायाङ्गसूत्रार्थे ऐतादृशपदप्रयोगः मर्षणीयः धीधनैः विद्वद्भिः। ८ सप्तमीम्।

Jain Education International 2010_05　　For Private & Personal Use Only　　www.jainelibrary.org

पूर्णे[1] 'शैलाणनृपविषये' ह्यष्टमीरुद्रदर्शा-

ऽऽख्याताहःपर्युषणदिवसे मारीचारं न्यषेधीत्।

प्राच्यं वृत्तं ह्यकबरविबोध्धुः स्मृतिं 'हीरसूरे'-

रानीयायाद्विविधनिगमान् पावयन् 'रत्नपुर्याम्[2]' ॥ ५६ ॥

प्रेमज्ञप्त्या श्रुतवरतपस्सम्यगुद्धाह्य चान्यैः-

पुण्यैः कृत्यैर्जलदसमये भ्राजयित्वा सुधर्मम्।

'माण्डूतीर्थ'[3]प्रचलितविधौ बाधकं 'धारभूपं,'[4]

हस्तक्षेपो[5]न्निरसविधयेऽबोधयत्तत्र गत्वा ॥ ५७ ॥

'माण्डू-भोपावर'लसितसच्चैत्ययोस्स्वोपदेशा-

ज्जीर्णोद्धारं प्रवरभविकैः कारयित्वा यतीन्द्रः।

बोधं 'पञ्चेडपुरपतये' 'सेमलीठकुराय,'

प्रादात्ताभ्यां निजभुवि ततो मारयो[6] वारिता वै ॥ ५८ ॥

वर्षाकाले जिनमतविभां वर्द्धयन् 'रत्नपुर्यां,'

शास्त्रैर्वादे यतिपविजयं[7] त्रिस्तुतीयं व्यजैषीत्।

सङ्घस्याभ्यर्थनमथनिशम्योपधानं सुवाह्य,

'सम्मेताद्रिव्रजितुमभिवङ्गं' प्रतस्थे मुनीन्द्रः ॥ ५९ ॥

मध्ये मार्गे निजप्रतिभया धर्मभासं वितन्वन्,

लोकं नानाविधमुपदिशान् 'कालिकाता'मयासीत्।

(४) (३)

चातुर्मासे युगगुणमिते तत्र चैत्यादिधर्म्य-

स्थानस्थित्यै बहुतरनिधिः कारितो देशनातः ॥ ६० ॥

---

१ अष्टम्यामेकादश्याममावास्यायां पर्युषणासु चेत्यर्थः। २ रतलामनगरे। ३ मांडवगढार्थपरकमिदं पदम्। ४ धारसंस्थानाधीशमिति भावः। ५ उत्कर्षेण निरसनार्थमित्यर्थः। ६ हिंसाः। ७ श्रीयतीन्द्रविजयाहमितिभावः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(०) (२)
तीर्थेशानां खयमलमितानां सुनिर्वाणभूमे-
'स्सम्मेताद्रे': प्रथितयशसः पुण्ययात्रामकार्षीत्।
राज्ञो 'दुद्धेडियविजअसिंह'स्य भक्त्या विहृत्य,
वर्षाहेतोस्सुमुनिपतयोऽजीमगञ्जे' न्यवात्सुः ॥ ६१ ॥

बाबूलोकं विषयजसुखास्वादलीनं विबोध्य,
संवेगापूरितसुवचनैर्धर्ममार्गे न्ययुञ्जन्।
दीक्षाब्रह्मव्रतविधियुतानुत्सवान् कारयित्वा,
पात्रं पात्रं विविधनिगमान् 'सादडी'ग्राममापुः ॥ ६२ ॥

पात्रं पात्रं जिनमतसुधीर्भव्यलोकं यतीन्द्रः,
प्राग्वाटानां मरुजसहजं वैमनस्यं चिरत्नम्।
कृत्वा दूरे श्रुततपविधिं सोत्सवं कारयित्वा,
बोद्धुं धर्मं शिथिलकृतिकान् 'मेदपाटं' विजह्रे ॥ ६३ ॥

१ (७) (३)
नीत्वा वर्षा'मुदयनगरे' सम्मितां धातुत्त्वै-
र्जग्मुस्सङ्घेन सह गुरवः 'केशरीया'ख्यतीर्थम्।
२
तत्रौद्दण्डयं क्षपणककृतं स्वीयबुद्ध्या व्यपास्या-
ध्यारोप्योच्चैस्सितपटयशोऽवर्धयन् सद्ध्वजं वै ॥ ६४ ॥

नग्नाटीयैः प्रतिहतमथो धर्मतेजो विवर्द्धय,
न्यायागारेऽधिगतविजया आययुर्गूर्जरत्रान्।
चातुर्मासं सुमुनिसहिता हम्मदाबादपुर्या,'
तस्थुर्भव्यान् विविधममलं जैनतत्त्वं दिशन्तः ॥ ६५ ॥

'माकुभ्रातु'र्विनतिवशगा 'आश्विनीं सेद्धचक्री-
मोलीं' दिव्यां नवपदमहो बोधिकां कारयन्तः।
३
संस्थां संस्थाप्य च नवपदाराधिकां स्वोपदेशा-
४
दंग्मेन्सोसायटिविनयतंश्चख्युरास्तिक्यतत्त्वम् ॥ ६६ ॥

---

१ उदयपुरे। २ दिगंबरविहितम्। ३ श्रीनवपदआराधकसमाजस्थापनायाः सूचक अेष पादः। ४ विद्याशाला(डोशीवाडानी पोळ) मध्ये आस्तिक-नास्तिक चर्चा स्फोटस्वरूपप्रसिद्धव्याख्यानवार्त्ता सूचकोऽयं पादः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तद्व्याख्यानात् क्षुभितमतिकान्[१] शिक्षितान् शास्त्रपाठै-
स्सन्तोष्यार्थं धनवितरणौचित्यतत्त्वं[२] विबोध्य।
याताः 'श्रीदेशविरतिसमाजं' ततस्स्थापयित्वा,
'श्रीभोयण्या'मतिशुभमहैराद्यतन्मेलकाय[३] ॥ ६७ ॥

वर्षावासं निधिगुणमितं (९) (३) याषितुं 'जामपुर्यां'[४]
यान्तौ मार्गे'ऽह्मदनगरे' 'तीर्थसिद्धाचलस्य'।
रक्षाहेतोस्सपदि निधये प्रेरयित्वा सुभव्यान्,
लक्षाधिक्यं[५] द्रविणचयनं कारयामासुराशु ॥ ६८ ॥

स्थाने स्थाने जिनमतमहं वर्द्धयन्तो गणीन्द्रा-
स्स्थित्वा वर्षा 'नवलनगरं'[६] चारुवाग्भिस्स्वकीयैः।
सत्र[७]चामाम्लगृहमथ चास्थापयन् छात्रगेहं[८],
दान्ताः[९] पूज्यैः धृतिमतिबलात् बालदीक्षाविरुद्धाः ॥ ६९ ॥

पश्चादेता स्सुरतनगरे' जैनसाहित्यवृद्धि-[१०]
सत्कोशार्थं धनिक'नगिनं मञ्छुपुत्रं'[११]व्यबोधन्।
'मुर्शिदाबादपविजयसिंह'स्समेतोऽत्र सूरे-
र्भक्तिव्यक्तीकरणपटुको भावतो दर्शनाय ॥ ७० ॥

आसीच्छ्री'देशविरतिसमाजस्य' पर्षत्[१२]सुरम्या,
दत्ता तस्यां भविकहितदा देशना सारगर्भा।
'रत्नाम्भोधेः'[१३]पठनसदनस्थायि कोशं विवर्द्धय,
दब्धा 'तत्त्वप्रसारणकरी बोधमालाख्यसंस्था' ॥ ७१ ॥

---

१ आंग्लशिक्षाप्रभावितान् नवयुवकानित्यर्थः। २ धनस्य व्यये दाने वा पात्रापात्रविवेकमित्यर्थः, एतद्धि तस्मिन् समये ज्ञान-प्रचारनाम्नी भौतिकवादसमर्थककेलवणीपोषककॉलेज-हाइस्कूल-बोर्डिंगादीनां हिताहितकरत्वमीमांसा सूचकं पदमस्ति। ३ श्रीदेशविरतिसमाजस्य प्रथमाधिवेशनायेत्यर्थः। ४ जामनगरे। ५ षष्टिसहस्राणि रुप्यकानां वार्षिकं दत्त्वा तीर्थस्वामित्वनिर्णय-स्यानुकूल्याय श्रीसिद्धाचलरखोपाफंडपोषणप्रवृत्तिरेतच्छ्लोके प्रदर्शितास्ति। ६ जामनगरमित्यर्थः। ७ सत्रं=भोजनशाला, आचाम्लगृहं=आंबिलखातुं। ८ बोर्डिंगाख्यविद्यार्थिगृहमिति भावः। ९ निष्फलप्रवृत्तिमंतः कृता इत्यर्थः। १० जैनसाहित्योद्धारक-फंडमित्यर्थः। ११ नगीनभाई-मंछुभाई-श्रेष्ठिनमित्यर्थः। १२ अधिवेशनमित्यर्थः। १३ श्रीरत्नसागरजैनबोर्डिंगस्थायिफंड-मिति भावः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रव्राज्यानेकभविकजनान् पावयन्त 'स्सुराष्ट्रान्',
प्राव्रुट्काले शुभकृतिभरैस्स्तम्भतीर्थं' व्यतीयुः ।
संस्थाप्याहम्मद्पुर'मितास्तत्रसंस्थाय वर्षां,
श्रुत्वोद्यच्छन् 'वटपुर[१]नृपाज्ञां सुदीक्षाविरुद्धाम् ॥ ७२ ॥

सूरेश्शास्त्राभ्यसनमुदिता जङ्गमज्ञानशाले-
त्येवं चाशंसदतिविदुषी 'जामिनी काउझाख्या' ।
नेत्राम्भोधि(२)(४)प्रमितजलमुक्काल[२]लाभस्पृहावन्-
मुम्बापुर्यां गतभविजनप्रार्थनातो विजह्रे ॥ ७३ ॥

शास्त्रव्याख्याप्रथितयशसो 'लालबागे' हि सूरे
र्दीक्षापुष्टिं प्रवचनविधेः क्षुब्धयूनां प्रचारैः ।
व्यामूढाया ऋजुजनततेर्मोहहत्यै[३] समित्या,
पत्रं संस्थाप्रथनजनितं चालितं 'सिद्धचक्रम्' ॥ ७४ ॥

'माणेकाम्भोनिधि'सदुपदेशात्प्रकृतोपधाने,
मालारोपोत्सवमुपगता 'घट्टकाह्वे[४] पुरे' वै ।
व्याख्यानैस्स्वैस्समयसहितैस्संयमायोग्यसूचि[५]-
नाट्यं रुद्ध्वा युवजनमतं भासितं शीलनं हि ॥ ७५ ॥

पश्चाद्याता'स्सुरतनगरं' शिष्यवृन्दैस्समेता-
स्संवत्सर्यास्तिथिगतविसंवादमुन्मुच्य शास्त्रैः ।
भाव्युत्सूत्राध्वगविषमता याऽऽसा व्यञ्जिता सा,
किन्नोऽद्यापि प्रकटविदिता वर्त्तते पर्वतिथ्याः ? ॥ ७६ ॥

---

१ वडोदराराज्यदीक्षाप्रतिबन्धककायदार्थपरकमेतत्पदम् । २ चातुर्मासवाची अयं शब्दः । ३ श्रीसिद्धचक्रसाहित्यप्रचारक-समितेः स्थापनं सिद्धचक्राख्यपाक्षिकप्रारंभश्चेत्यर्थः । ४ घाटकोपरे इत्यर्थः । ५ दीक्षाया अयोग्यताप्रदर्शकं युवकसंघप्रेरितं नाटकमित्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नानाप्रश्नोत्थितमतिगतभ्रान्तिशान्त्यै सुपर्षत्[१],
सङ्घायासात् सितपटमतालम्बिनां सद्यतीनाम्।
'आकाशाङ्काङ्कशशिसहिते वत्सरे राजपुर्यां'[२],
जाता यस्यां यतिपतिवरास्सम्यगामन्त्रिता वै ॥ ७७ ॥

शङ्कापङ्कं भविकमनसो क्षालितुं दत्तचित्ताः,
गत्वा तत्र स्वकमतिभराच्छास्त्रपाठैश्च सर्वान्।
सन्तोष्यैता भविकविनयान्नीरदैस्साकमेवा-
सेक्तुं सांसारिकजनगणं सूरयो 'मेहसाणाम्' ॥ ७८ ॥

[३]मध्ये वर्षं सुबहु विहितश्शासनोन्नायिकार्यै-[४]
रन्तःक्षेत्रे[५] सुभविकनृणां धर्मपीयुषसेकः।
यूरोपीयः श्रुतिपटपुटै'र्ब्राउनः' सूरिशंसां,
पीत्वाऽत्रेतो ह्यमृतवचनैर्वीततृड्कः शशंस ॥ ७९ ॥

काले काले पुनरपि पुनः सूरयः पालितेभ्यः,
शिक्षा-दीक्षा-वितरणमपि प्रायशो योग्यमेव।
तस्मात् पादार्पणकरुणया पावयन्त्वेषमोऽस्मा-[६]
नेवंसङ्घादरभरभृतः संययुः' पालिताणाम् ॥ ८० ॥

चातुर्मासे गतवति यथा भ्राजते शारदी श्रीः,
पद्मव्याजेस्सरसि सरसा सन्ततं तद्वदेव।
सज्ज्ञानश्रीरपि गुरुवराणां च सन्तन्यमाना,
नानारूपैर्नवनवमहैर्धर्मकृत्यैश्च रेजे ॥ ८१ ॥

---

१ संमेलनमित्यर्थः। २ राजनगरे–अहमदावादे। ३ चातुर्मासमध्ये इत्यर्थः। ४ शासनप्रभावककार्यैरिति भावः। ५ अन्तःकरणरूपक्षेत्रे इति भावः। ६ आता नहि।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

'श्रीमाणिक्य:'[१] 'कुमुदविजय'श्चेत्युपाध्यायवर्यौ,
पन्न्यासौ द्वौ बहुगुणयुतौ 'भक्ति'-'पद्मा'भिधौ च।
अत्युत्साहैस्सह शुभकृपासिन्धुवद्भ्यो भवद्भ्यो
लब्ध्वाऽऽचार्याह्वयमुपदवीं धर्मभ्राजो विरेजुः ॥ ८२ ॥

'आनन्दस्याम्बुनिधि'रिति यद् वर्त्तते नाम सत्यं,
प्रत्यक्षन्तत् भुवि विदधती किं न जैनी प्रजाऽभूत्।
तस्मात् सूरीन् झगिति 'नगरे जामपूर्वे'[२]ऽपि सङ्घः,
प्रार्थं प्रार्थं कथमपि चतुर्मासवासाय निन्ये ॥ ८३ ॥

अज्ञैः कैश्चित् श्रुतकथितसिद्धान्तवाचा विरुद्धं,
प्रोक्तं वृद्धिक्षयविषयकं पर्वतिथ्याः मतं यत्।
उग्रं तत्खण्डनमथ कृतं शास्त्रदृष्ट्यापि लोकं
बोधित्वाऽरं नवमतवतो लज्जितास्यान् प्रचक्रुः ॥ ८४ ॥

तत्रैवाग्रे जलदसमये स्थापितो 'देवबाग-
लक्ष्म्या'नाम्नाऽऽश्रमवर उपादिश्य लोकः सुखेन।
पश्चाद् भक्तो 'नगरधनपः पोपटाह्व'स्सुभक्त्या,
सौराष्ट्रीयाखिलजिनपसत्तीर्थसंस्पर्शनाय ॥ ८५ ॥

सङ्घं नीत्वाचरणचलनं षड्रिसम्पालनोत्कं,
सानन्दोऽगात्[३], सकलमपि तद्वर्णनं चारुरीत्या।
'तीर्थाः सौराष्ट्रविषयभवाः सङ्घयात्रा च'[४] नाम्ना-
ख्याते ग्रन्थे लसति तदिवाऽऽयोकुमाकेतयन्तून् ॥ ८६ ॥
(संदानितकम्)

---

१ श्रीमाणिक्यसागरोपाध्याय श्रीकुमुदविजयोपाध्याय-श्रीभक्तिविजयपन्न्यास-श्रीपद्मविजयपन्न्यासेभ्य आचार्यपदप्रदानसूचकमिदं पूर्वार्द्धम्। २ जामनगरे। ३ आनन्दसागरसूरीश्वरेण सहेत्यर्थः। ४ 'सौराष्ट्रनां तीर्थो अने संघयात्रा' इत्याख्यग्रन्थे इति भावः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(८) (४)
एवं वस्वब्धिमितमथ ये वृष्टिवासं जनानां,
पुण्याढ्यानामतिविनयतः सिद्धक्षेत्रे हि कृत्वा ।
१
'खातारम्भं चरमजिनपस्याह्वया ह्यागमानां,
रक्षागेहस्य च' शुभविकैः कारयामासुरत्र ॥ ८७ ॥

२
अन्यत्तत्र श्रमणनिकरग्रन्थसंग्राहि सद्मं,
संस्थाप्यारं शुभ'महमदाबादपुर्यां' यतीन्द्राः ।
३
भक्त'श्रीमोहन' इति महच्छ्रेष्ठिना सद्व्रतानां,
रम्ये ह्युद्यापनविधिमखेऽभ्यर्थ्यमानाः प्रजग्मुः ॥ ८८ ॥

सिद्धं शास्त्रैरुपकृतिकरं लक्षशो रूप्यकैस्तं,
सम्पाद्योद्यापनविधिमलं 'झाम्पडापोल' मध्ये ।
(५)(५)(९)(१) ४
तत्रावात्सुः शरनवनवैकाङ्किते ऽब्दे ऽब्दकाले,
५
चार्व्यां वीथ्यां सुगुरुचरणाः 'नागजिद् भूधराणाम्' ॥ ८९ ॥

६ ७
पश्चादेताः क्षरणसमयं यापयित्वाऽऽगमाना-
मागारस्य प्रचलितविधिं वीक्षितुं 'पालीताणाम्' ।
साङ्गोपाङ्गं त्रुटिविरहितं सत्यमारब्धकृत्यं,
त्यक्त्वा सर्वस्वमपि सततं साधयन्त्येव सन्तः ॥ ९० ॥

कृत्वा लोकोत्तरसुचरितं ये तरन्तीह लोकं,
धन्यास्ते वै सफलजनना भूभराः सन्ति चान्ये ।
सत्यामेतां भणितीमथ ते कर्तुकामा यतीन्द्रा-
८
स्तत्रातिष्ठन् वरसलिलदाऽऽसेककालत्रयीं ते ॥ ९१ ॥

---

१ श्रीवर्धमानजैनागममंदिरस्य खातमुहूर्त्तमिति भावः । २ श्रमणसंघपुस्तकालयाख्यज्ञानालयस्थापनामित्यर्थः । ३ श्रेष्ठिवर्य-श्रीमोहनलाल छोटालाल इति भावः । ४ वृष्टिकाले । ५ पोलवाची अयं शब्दो ज्ञेयः । ६ चातुर्मासमिति भावः । ७ शिलोत्कीर्णागममदिरस्येत्यर्थः । ८ चातुर्मासत्रयमित्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दीर्घायासैर्गणधरवरप्रोक्तजैनागमानां,

पाठं शुद्धं दृषदुदरगं शिल्पविद्याप्रवीणैः ।

कारं कारं किमु न कलितं सूरिभिः कर्म चित्रं,

यस्माज्जातो ह्युपलनिकरोऽप्यागमज्ञः(भ्राट्) परे के ? ॥ ९२ ॥

रम्योपाध्यायकपदमदुः 'श्रीक्षमासागरेभ्यः,

श्रीमच्चन्द्रेभ्य उचितपदं चारु पन्न्यासकाह्वम् ।

वर्षे चाग्रे गणधरगृहं[1] सिद्धचक्राह्वपूर्वं,'

संस्थाप्यैवं जिनमतविभाभासकं सत्समाजम्[2] ॥ ९३ ॥

(९)(९)(९) १)

अङ्काङ्काङ्काब्जमितशरदि ह्यागमानां गृहस्य,

सत्थां पूर्त्ताविभिनवप्रतिष्ठाविधिं माघमासे ।

पञ्चम्यामञ्जनशुभशलाकोत्सवेनापि सत्रां,

सन्मूर्त्तीनां श्रुतविधियुतं कारयामासुरत्र ॥ ९४ ॥

सम्पाद्यैवं 'कपडवणजश्रेष्ठिचीमन्नलाल-

डाह्याभाईत्यभिधपरमश्रावकप्रार्थनातः ।

निश्रायां सूरिवरसुगुरोश्चारु संयोजितायाः

एताश्चैत्या नवपदसमाराधनायाः सुसिद्ध्यै' ॥ ९५ ॥

चातुर्मासं भविकहितकृच्चापि तत्रैव कृत्वा,

श्रीसङ्घस्यानुनयसहितप्रार्थना'न्मोहमय्याः' ।

धर्मोद्भासं विहृतिममलां कुर्वतां भक्तवृन्द-

स्स्थाने स्थाने मुदितमनसा स्वागतं सुष्ठु चक्रे ॥ ९६ ॥

---

१ श्रीसिद्धचक्रगणधरमंदिरमित्यर्थः । २ श्रीजैनधर्मप्रभावकसमाजाख्यसंस्थास्थापनसूचकोऽयं पदसमूहः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शामं शामं चिरसमयजां सद्दिदृक्षा पिपासां,
व्याख्यानैः स्वैरपि च जनता अभ्यषिञ्चन् प्रकामम् ।
सम्प्राप्ताः 'श्रीसुरतनगरं' यत्र चाभूतपूर्वं,
भव्यं भव्यैः कृतमतितमां स्वागतं भासमानम् ॥ ९७ ॥

अर्धक्रोशादपि चलसमारोह[1] आसीद् दवीयान्,
यस्मिन् केतुप्रवर[2]लसितप्राग्रहस्ताश्च केचित् ।
सुप्रेष्ठा[3]स्संवरगुणमिताः (५७) बेण्डवाद्यीयसङ्घाः (!)
वादं वादं शुभततधनानद्धवाद्यान् विरेजुः ॥ ९८ ॥

लक्षाधिक्या नगरजनता राजमार्गेऽभिसूरिं,
शीर्षाण्युच्चैर्गुणरतिभरान्नम्रयन्ती बभूव ।
मार्गे मार्गे वसन-कुसुम-स्वर्ण-रुप्यादिपात्रै,
श्चालं द्वाराण्यति विरचितान्यार्थ सद्भक्तिभावैः ॥ ९९ ॥

गिन्नीमुक्ताप्रभृतिसमुदयैश्च रत्नैर्गहूंली,
बह्वचजातश्शुचिगुणलसद् रागदाढ्यद् यतीशे ।
स्वर्णैः रौप्यैर्वरसुमभरै[4]स्सत्यमुक्तासुलाजै:[5]
प्रोद्यद्रङ्गं विविधसुमहैस्सत्कृतं 'स्सूरतीयैः' ॥ १०० ॥

साम्बेलानांभयशरमितानां (७) (५) मुदापादिदीप्ति,
स्सूरेर्नानासुगुणमहिमाख्यायकास्साधुवादाः[6] ।
रीत्या चैवं प्रचुरनिरावर्णितुश्लाघ्यक्या,
ग्रन्थाज्ज्ञेया प्रविशनकथा 'सागरस्वागता'-ख्यात् ॥ १०१ ॥

वक्खारीयाकुलजसुजनैः क्षत्रियैः मीलपै[7]र्वं,
एकाह्नि विंशतिमियसहस्राधिकं राव्ययित्वा ।
सूरेःपादार्पणमुदितया कारयित्वा सुभक्त्या,
पायं पायं जिनमतसुधां सूरिवक्त्राज्जहर्षुः ॥ १०२ ॥

---

१ स्वागतयात्रा (सामैयुं) २ झंडा-निशानधारिणः । ३ उत्तमाः । ४ श्रेष्ठकुसुमसमूहैः । ५ सत्यमुक्ताफलानां वर्धापनैरितिभावः । ६ व्यवहारे हि एतच्छब्दार्थः "साइन बॉर्डो" इतिपदेन कथ्यते । ७ अन्यालयपतिरिति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सत्रा सङ्घेन च विधियुता [1]चैत्ययात्रा सुरम्या-
ऽकार्यास्ते यद् समविवरणं मुद्रितं [2]पुस्तके वै।
सोत्साहं विंशतिमणमितान् मोदकान् संवितीर्य,
धन्या जाता 'सुरत'-जनता देशनादर्शनाभ्याम् ॥ १०३ ॥

चातुर्मासं तदनु विहितं '[3]मोहमय्यां' प्रशस्तं,
यस्मिन् धर्मोन्नतिततिकृतीः[4] कारयित्वा सुबह्व्यः।
भूयोऽप्येतास्सुरतनगरं श्रावकाभ्यर्थनात-
स्तत्राभूवन् रुचिरचरमाः वृष्टिवासाश्च पञ्च ॥ १०४ ॥

२ ० ० २
द्वया-काशाभ्रद्विमितशरदो [5]माधवे मासि शुक्ले,
ह्येकादश्यां शुभशनिदिने [6]श्रावकेभ्यः सुशास्ता।
संस्थाऽस्थापि प्रयतमनसा ताम्रपत्रागमानां,
भव्यादर्शस्थितिकरमहन्मन्दिरस्थापनायै ॥ १०५ ॥

वर्षे[7] चाग्रेऽहमदवरपूःश्रेष्ठिनो[8] माकुनाम्नः[9]
हस्ताभ्यामागमवरगृहस्यादिमं खातकर्म।
संस्कार्यारं तदनु च शिलारोपणं वाडीलाले-[10]
त्याख्यश्रेष्ठिप्रवरकरतः कारितं मोदपूर्वम् ॥ १०६ ॥

३ ० ० २
वर्षे रुद्रा-क्ष-ख-ख-मिथुने ह्याश्विने शुक्लपक्षे,
आशातिथ्यां[11] सुजिनप्रतिमाः पालिताणात इद्धाः।
सद्विंशत्युत्तरशतमिता[12] आगमागारहेतो-
रानाय्याकारि च सुविधिना तत्र भव्यप्रवेशः ॥ १०७ ॥

४ ० ० २
'तुर्योद्र्द्धे-द्वयभ्र-नयन-मिते हायने माघशुक्ले,
शुक्रे श्रेष्ठे क्षणतिथियुते[13] सन्मुहूर्त्ते समासाम्।
सन्मूर्त्तीनामपरिगणितोत्साहयुक्तैर्जनौघै-
रम्ये तस्मिन् श्रुतवरगृहे कारिता सुप्रतिष्ठा ॥ १०८ ॥

---

१ चैत्यपरिपाटीत्यर्थः। २ 'सूर्यपुरनुं स्वागत' इत्याह इति शेषः। ३ मुंबाईनगरे। ४ धर्मस्योन्नतिविस्तार-कारिकार्याणीत्यर्थः। ५ वैशाखे इत्यर्थः। ६ श्रावकद्वारेत्यर्थः। ७ २००३ वर्षे इत्यर्थः। ८ अमदावादनगरवासिन इत्यर्थः। ९ मांकुभाईत्यभिधया प्रसिद्धस्य माणेकलाल-मनसुखलालाख्यश्रेष्ठिन इत्यर्थः। १० मुंबापुरीयख्यातव्यापारि श्रीवाडीलाल चत्रभुजाह्वश्रेष्ठिकरत इत्यर्थः। ११ दशमीदिने। १२ १२० संख्याकाः। १३ क्षणशब्दस्य कालवाचित्वमत्र ज्ञेयं, कालस्य च भूतवर्तमानभाविरूपेण त्रैविध्यस्य विदितत्वात् तृतीयायामित्यर्थो बोध्यः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

संवत्सर्यास्तिथिवरसमाराधनायाः प्रसङ्गे-
ऽस्मिन्नेवाब्दे समुदितविसंवादनिर्यासकार्ये।
नैकैर्वैः प्रचलितविधेयैं श्रुतप्रोक्ततां वैः
संसाध्यान्यानपि जिनपथः पोषणोत्कान् प्रचक्रुः॥ १०९ ॥

काले गच्छत्यविरतमितो ह्यग्रिमे पौषमासे,
कृष्णे पक्षे [1]शरतिथिगतेऽचिन्तितो वायुरोगः।
वृद्धिं यातो बहुतरचिकित्साविधिभिः सुयत्नात्,
सञ्ज्ञाः जातास्समुपचरिताः किन्तु शान्तो न जातः॥ ११० ॥

सैवाऽपूर्वा स्थितिरथ तदाऽऽसीन्नचाल्पाप्यशान्ति-
श्चेतोऽप्राक्षीज्जिनपतिपदेऽभूदपूर्वोऽनुरागः।
स्थित्यां तस्यामपि नवनवश्लोकनिर्माणकार्ये,
ज्ञानध्यानादिकमपि मनाङ् नावरुद्धं कदाचित्॥ १११ ॥

६ ० ० २ २
षड्-खा-काश द्वि-मितपरवाणो पुनर्वायुवेगो
वारंवारं प्रबलरभसा पीडयामास देहम्।
मध्ये यस्य स्थितिपरवशाच्छ्रीनमस्कारमन्त्र-
स्यायातोऽभूदहह! सततं श्रावणस्य प्रसङ्गः॥ ११२ ॥

आदेः स्वभ्यस्तमथ च तथा देहास्थत्यादि सम्यग्
दार्ढ्यं येनेतरजनगणासह्यरोगेऽपि शान्त्या।
ये स्तम्भाद्याश्रयविरहिताश्चारु पद्मासनेन,
स्वेष्टस्मृत्यामथ निजमनो योजयामासुरारात्॥ ११३ ॥

दृष्ट्वाऽऽश्चर्यं भृशमुपगता डॉक्टरा अप्यवोचन्,
धन्या एते यदिह विषमस्थेऽपि रोगे सुशान्ताः।
अन्यः कश्चिद् यदि गदहतोऽस्यां स्थितौ स्यात्तदा तु,
स्वान्तर्भीतः स खलु सहसान्यां दशामेव यायात्॥ ११४ ॥

---

१ पंचमीतिथौ। २ अयंशब्दः संवत्सरापरपर्याय इति हैमलिंगानुशासने।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवं रुग्णां स्थितिमथ निजां वीक्ष्य विज्ञाय चास्या-
ऽनित्यत्वं वै सपदि वपुषो माधवे[1] शुक्लषष्ठ्याम्।
सर्वानाहूय च निजशरीरं ततो व्युत्सृजन्तो-
ऽस्मार्षुर्भक्त्या जिनपतिवरान् ह्यर्धपद्मासनस्थाः॥ ११५ ॥

एकादश्यां निशि कविदिनेऽप्येकवारं त्वतीव-
वेगादाक्रान्तिरभवदहा ! येन सर्वेऽप्यचेष्टाः।
सन्त्यक्ताशाः जिनवरवचः श्रावयामासुराशु,
सत्पुण्यानामतिबलतया किन्त्वितं[2] दुर्दिनं तत्॥ ११६ ॥

वैशाखस्या[3]सितदलगते पञ्चमेऽह्न्यस्तकाले,
सूर्यस्याभूत् त्रिदशनिलये श्रीगुरूणां प्रयाणम्।
हन्ताकस्माद् सुरतजनताऽचिन्त्यदम्भोलिपाताद्,
भीता व्यग्रा प्रकृतिविधुरा कृत्यशून्या बभूव॥ ११७ ॥

सङ्घेनोच्चैस्तरशिखरिता चारु दोला ह्यकारि,
प्रासादस्यानुकरणकरी सत्कलाभिश्च युक्ता।
विद्युत्पत्रै[4]रधिगतसमाचारवन्तश्च भक्ताः
ग्रामाद्ग्रामादरमुपगता[5] अन्त्ययात्रार्थमाशु॥ ११८ ॥

दोलोत्थानाय च कृतसहस्रादिमुद्रापणा वै,
भक्ताः स्वीयं मनुजजननं सार्थकीचक्रुरेव।
अन्ये प्रादुर्द्रविणनिचयं वह्निसंस्कारकार्ये,
भव्या यात्रा निखिलनगरे भ्रामिता भक्तिभावैः॥ ११९ ॥

पश्चाद्गोपीपुरपरिसरे स्वागमौकः[6]समीपं,
संस्थित्यां चापरिमितजनानां गुरूणां सुभव्यम्।
नानाकाष्ठैर्मलयगिरिजैर्दाहसंस्कारकृत्यं,
नाभूत् पूर्वं न च परमितो भावि तादृग् बभूव॥ १२० ॥

---

१ वैशाख मासे। २ किंतु इतं = गतम् इति पदच्छेदोऽत्र बोध्यः। ३ गूर्जरदेशीयपद्धत्येदं ज्ञेयं, पूर्णिमान्तमास (शास्त्रीय) पद्धत्या तु ज्येष्ठस्येति बोध्यम्। ४ तार–टेलिग्रामाख्याधुनिकशीघ्रसंदेशावहपत्रैरित्यर्थः। ५ अरम्=शीघ्रम्। ६ सुंदरागममंदिरपार्श्वे।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शिष्याः पादोत्तरशतमिताः[१२५] अष्टत्रिंशत्[३८] सुसंस्थाः,
ज्ञानागाराः मुनिमितमताः[१२] सन्ति यत्कीर्त्तिदीपाः।
यैश्चाकारि श्रुतहितकरीर्वाचनाः सप्त[७] यासु,
ग्रन्थाः लक्षद्वयधिकगणितश्लोकमात्रा[१] ह्यवाचि ॥ १२१ ॥

सप्तत्रिंशत्सुरपनयनाङ्काधिकाना[२] नवीन-
श्लोकानां ते भुवि रचयितारः कथं स्युर्न नम्याः।
ऊनाशीत्युत्तरगतशतग्रन्थसम्पादकास्ते,[१७९]
धन्याः पञ्चाशदधिकशुभग्रन्थसङ्ग्राहकाश्च[५०] ॥ १२२ ॥

व्याख्यानानामपि कतिपये ग्रन्थवर्याः प्रसिद्धाः,
येषां सन्ति प्रथितविभवा भूमिकाः[३] प्राथमिक्यः।
द्व्यनाशीतिप्रमितरुचिरग्रन्थरत्नेषु[७८] येषां,
मार्गे लोकान् जनिहितकरं बोधयन्त्यो लसन्ति ॥ १२३ ॥

आदित्याङ्काः[१२] सुततमुपधानव्रताः कारिताः यैः,
शोधं शोधं सकलसुजिनोक्तागमानां सुपाठान्।
सल्लोकानामुपकृतिहितं मञ्जु मुद्रापयित्वा,
नैकान् योग्यानभ्यसकृतिनोऽधीतयेऽयूयुजँश्च ॥ १२४ ॥

एवं नानाव्रतजपतपोध्यानदीक्षाप्रतिष्ठा-
यात्रास्नात्रादिकबहुविधोद्यापनैश्चोपधानैः।
भव्यान् जीवान् जिनपगदिते रम्यमार्गे नियुज्य,
त्यक्त्वा देहं सुरपतिगृहं संययुः सूरिवर्याः ॥ १२५ ॥

१. २३३३४२ श्लोकप्रमाणग्रन्था वाचनासु वाचिताः । २ सप्तत्रिंशत्सहस्रमितानामित्यर्थः । ३ प्रस्तावना इत्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

येषां कीर्ति विमलविमलामश्मताम्रागमाना-
मागारस्था दिशि दिशि दिशन्त्यः पताका नितान्तम्
[१]यावच्चन्द्रारुणकिरणवन्तौ दिवि द्योतमानौ,
गायं गायं तदवधि मुदा रञ्जयिष्यन्ति लोकम् ॥ १२६ ॥

## ॥ अन्त्यमंगलम् ॥

(शिखरिणी)

कृतं यैर्लोकानामुपकृतिहितं वाचनिकया,
श्रुतानामभ्यासस्त्रुटिविरहितः सम्प्रचलितः।
सुपूज्याँस्तान् 'श्रीसागर'इति शुभाख्याप्रथितकान्,
नमामः सूरीन्द्रान् श्रुतवरसमुद्धारनिरतान् ॥ १२७ ॥

## चित्र–हार–बन्ध *

(शार्दूलविक्रीडितम्)

शश्वच्छान्तिमयान् महामतिमतः [२]कल्यङ्करान् [३]कर्मठान्,
भव्यापत्तिभरापहान् जलजवज्जन्तुभ्य आनन्ददान्।
दान्तान् नौमितमां विभावितविधीन् [४]व्याख्यानसंख्यासनान्,
प्रौढान् सत्यसखान् सदा नतधियाऽऽनन्दाब्धिसूरीश्वरान् ॥ १२८ ॥

(स्रग्धराछन्दः)

धन्या मान्या वदान्याः गुणिगणगणनास्वग्रगण्या महान्तो,
विद्वद्गोष्ठीगरिष्ठाः [५]जिनपतिचरणेन्दीवरेन्दिन्दिराश्च।
वादीन्द्रा [६]देशकेन्द्रा अविकलनिगमज्ञाततत्त्वा [७]महिष्ठा,
'आचार्यानन्दवर्याः' प्रथितगुणगणाः 'सागरान्ता' जयन्ति ॥ १२९ ॥

॥ आगमपर्यालोचनप्राणः आगमोपजीवी च श्रमणः
श्रामण्यसारमवाप्नोति लभते च निर्वृतिम् ॥

## ॥ जीयासुरागमोद्धारकाः सद्गुरवः ।

१ यावच्चन्द्रार्कावित्यर्थः। २ कल्यशब्दो हि कल्याणापरपर्यायभद्रवाचकस्ततः भद्रङ्करानित्यर्थोऽत्र ज्ञेयः। ३ क्रियाकुशलान्। ४ व्याख्यानलब्धप्रतिष्ठानित्यर्थः। ५ तीर्थकृच्चरणकमलभ्रमरा इत्यर्थः। ६ शास्त्रापरपर्यायोऽयम्। ७ पूज्याः।

* अयं हि श्लोकः आधुनिकभूषणपरिभाषया नेकलेसेत्याख्य स्वर्णमयरत्नहाररूपेण संयोजितोऽस्ति–अेतत्प्रतिकृतिरप्यस्मिन्नेव ग्रंथे मुद्रिताऽस्त्यन्यत्र।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

॥ ॐ अर्हम् ॥

णमोऽत्थु णं समणस्स भगवओ महावीरस्स ।

शेठ देवचन्द्रलालभाइ-जैन-पुस्तकोद्धार-ग्रन्थाङ्के-१०१

आगमोद्धारक-आचार्यश्रीआनन्दसागरसूरिसङ्कलितः-

# अल्पपरिचितसैद्धांतिकशब्दकोषः

## अकारः

**अंकः**-लाञ्छनम् । जीवा० पृष्ठ २७० । अङ्कः, उत्सङ्गः । ओघ० १४३ । रत्नविशेषः । जं० प्र० २३ ।

**अंककरेलुगं**-शाकविशेषः । आचा० ३४८ ।

**अंकणं**-अङ्कनं, तप्तायःशलाकादिना चिह्नकरणम् । प्रश्न० २२ । लाञ्छनम् श्वशृगालचरणादिभिः । आव० ५८८ ।

**अंकधाती**-अंकधातृ, धात्रीदोषे । नि० चू० द्वि० ९३आ ।

**(अंकपतिता)**-दासी । उत्त० २६२ ।

**अंकमुहसंठिया**-अङ्कमुखसंस्थिता, पद्मासनोपविष्टोत्संगमुखवत् अर्धवलयाकारः । सूर्य० ७१ ।

**अंकलिवी**-लिपिविशेषः । प्रज्ञा० ५६ ।

**अंकवडेंसए**-ईशानकल्पपूर्वदिगावतंसकः । भग० २०३ ।

**अंकविद्या**-(अंकविज्जा) गणितम् । जं० प्र० १३६ ।

**अंकहरो**-अङ्कधरः, चन्द्रमाः । जीवा० २७० ।

**अंकावइ**-अङ्कावती, वक्षस्कारपर्वतः । जं० प्र० ३५७ ।

**अंकावई**-अङ्कावती, रम्यविजये राजधानी नाम । जं० प्र० ३५२ । शीतोदादक्षिणकूले वक्षस्कारः । ठाणा० ८० । दक्षिणवर्ती वक्षस्कारः । ठाणा० ३२६ ।

**अंकावईओ**-महाविदेहे विजयराजधानी । ठाणा० ८० ।

**अंकावडिंसए**-अङ्कावतंसकः, ईशानस्य पूर्वस्यामवतंसकः । जीवा० ३९१ ।

**अंकितो**-अङ्कितः, चिह्नितः । आव० ८२२ ।

**(अंकिल)**-नर्त्तकः । औप० ३ ।

**(अंकुडिओ)**-अंकुटिकः, नागदन्तकः, । जं० प्र० ५० । जीवा० २०५ ।

**अंकुर**-अंकुरः, प्रवालः । जं० प्र० ३० ।

**अंकुर**-अंकुरः, शाल्यादिबीजसूचिः । भग० ३०६ । जं० प्र० १६८ ।

**अंकुल्ल**-अङ्कोठः । वृक्षविशेषः । प्रज्ञा० ३१ ।

**अंकुसं**-महाशुक्रे विमानविशेषः । सम० ३२ । अंकुशं, येन रजोहरणमङ्कुशवत्करद्वयेन गृहीत्वा वन्दते तत् । कृतिकर्मणि षष्ठदोषः । आव० ५४३ ।

**अंकुस**-अंकुशः, सृणिः । प्रश्न० २२ ।

**अंकुसपलंबं**-महाशुक्रे विमानविशेषः । सम० ३२ ।

**अंकुसयं**-अंकुशकम्, तरुपल्लवग्रहणार्थमंकुशाकृतिः । भग० ११३ ।

**अंकुसये**-अंकुशका, देवार्चनार्थवृक्षपल्लवाकर्षणार्थम् । औप० ९५ ।

**अंकुसो**-अंकुशः । अंकुशाकारो मुक्तादामावलम्बनाश्रयभूतः । जीवा० २१० ।

**अंके**-अंककाण्डं खरकाण्डे चतुर्दशं काण्डम् । जीवा० ८९ । अंकः, । प्रज्ञा० २७ । उत्सङ्गे । जं० प्र० ३८ । मणिभेदः उत्त० ६८९ । श्वेतरत्नविशेषः । प्रज्ञा० ३६१ । रत्नविशेषः । जीवा० २३ ।

**अंकेल्लण**-अंकेल्लण, तर्जनकविशेषः । जं० प्र० २३५ ।

**अंको**-अङ्कः, पृथिवीभेदः । आचा० २९ । रत्नविशेषः । भग० ४७९ । एकोरुमैथुनं । नि० चू० प्र० २५५आ । रूढिगम्यः, शंखजातिविशेषः । प्रश्न० ३७ । रत्नविशेषः । जीवा० १८०, १९१ । पद्मासनोपविष्टस्योत्सङ्गरूपः आसनबन्धः । सूर्य० ७१ । जं० प्र० ४५४ ।

**अंकोल**-गुच्छविशेषः । प्रज्ञा० ३२ ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंकोल्ल**-वृक्षविशेषः । भग० ८०३ ।
**अंकोल्लाणं**-गुल्मविशेषः । भग० ८०३ ।
**अंगं**-अङ्गम्, अङ्गविषयम् । आव० ६६० । कारणमवयवः । ठाणा० ३ । कारणम् । प्रश्न० १०३ । शरीरावयवप्रमाण-स्पन्दितादिविकारफलोद्भावकं शास्त्रम् । सम० ४९ । समग्रं वपुः । जीवा० २७० । कारणम् । जं० प्र० ९९ । अज्यते व्यक्तीक्रियतेऽस्मिन्नित्यङ्गम् । आचा० ५ । भेदः कारणं वा । दश० ९० । शिरःप्रभृति । दश० २३७ । आंगं-अक्षिबाहुस्फुरणादिकम् । सूत्र० ३१८ । शिरःस्फुरणादि । ठाणा० ४२७ ।
**अंग**-अङ्गानि । शिक्षादीनि षडङ्गानि । भग० ११४ ।
**अंगओ**-अङ्गकः, भद्रप्रकृतिकः । आव० ७०४ ।
**अंगचूलिया**-अंगचूलिका, अंगानामुपासकदशाप्रभृतीनां पंचानां चूलिका-निरयावलिका । व्य० द्वि० ४५४आ ।
**अंगणं**-मंडवथाणं । नि० चू० प्र० १९२अ । अजिरम् । प्रश्न० १३८ । अङ्गणं-षट्स्थंडिलभूमिस्थानम् । ओघ० २०० ।
**अंगणेत्रिका**-हस्तमालक आभरणविशेषः । औप० ५५ ।
**अंगदं**-बाहुशीर्षाभरणविशेषः । जीवा० १६२ । केयूरम् । जं० प्र० १०६ ।
**अंगदे**-केयूरे । ठाणा० ४२१ । अङ्गनिका । उत्त० ७८ ।
**अंगनाम**-शिरउरःपृष्ठबाहूदरपादनामानि । तत्त्वा० ८ ।
**अंगपडिहारिणि**-अन्तःपुरप्रतिहारिणी । आव० ७०० ।
**अंगपविट्ठ**-गणधरकृतं मातृकापदत्रयप्रभवं वा ध्रुवश्रुतं वा । ठाणा० ४९ । अङ्गप्रविष्टम् । ठाणा० २०० ।
**अंगप्रविष्टं**-गणधरदृब्धमाचारादि । तत्त्वा० १-२४ ।
**अंगबाहिरे**-अङ्गबाह्यम्, स्थविरकृतं मातृकापदत्रयव्यतिरिक्त-व्याकरणनिबद्धमध्रुवश्रुतं वा उत्तराध्ययनादि । ठाणा० ५१ ।
**अंगमंगं**-अङ्गमङ्गम्, गात्रम् । औप० ११ ।
**अंगमंगो**-अङ्गमङ्गम्, अङ्गप्रत्यङ्गम् । जीवा० २७७ ।
**अंगमंदिरंमि**-चंपाचैत्याभिधानम् । भग० ६७५ ।
**अंगमद्दियाओ**-अंगस्वल्पमर्दनकारिकाः । भग० ५४८ ।
**अंगयं**-अङ्गदं, बाह्वाभरणविशेषः । जीवा० २५३ । प्रश्न० ७१ । बाहुशीर्षाभरणविशेषरूपम् । प्रज्ञा० ८८ ।
**अंगय**-अङ्गके, मूर्द्धादौ । जं० प्र० १८९ । अङ्गदम्, बाह्वा-भरणविशेषः । भग० १३२ ।
**अंगरिसी**-अङ्गर्षिः, आर्जवोदाहरणे भद्रकः कौशिकार्यज्ये-ष्ठशिष्यः । आव० ७०४ । येनोपशमे सत्यवाप्तं सामायिकम् । आव० ३४७ ।
**अंगलोअं**-अङ्गलोकं, म्लेच्छजातीयजनाश्रयस्थानम् । जं० प्र० २२० ।
**अंगवंसो**-अङ्गवंशः, अङ्गराजसन्तानस्य सम्बन्धिनः सप्त-सप्ततिराजानः प्रव्रजिताः । सम० ८५ ।
**अंगविगारं**-अङ्गविकारः, शिरःस्फुरणादिस्तच्छुभाशुभसूचकं शास्त्रमपि । उ० ४१७ ।
**अंगविज्जं**-अङ्गविद्याम्, शिरःप्रभृत्यंगस्फुरणतः शुभाशुभ-सूचिकां विद्याम् । उत्त० २९५ ।
**अंगविज्जा**-अङ्गविद्या, अङ्ग-पादः विद्या-प्रासादपातनात्मिका (सत्कारपुरस्कारपरिषहे दृष्टांतपदम्) । उत्त० १२५ ।
**अंगहारिका**-नृत्यकलाद्वितीयभेदः । सम० ८४ ।
**अंगा**-अंगाः, जनपदविशेषः । प्रज्ञा० ५५ ।
**अंगाई**-अंगानि, शिरःप्रभृतीनि । प्रज्ञा० ४६९ । एकादशांगानि प्रज्ञा० ५६ । अवयवाः । ठाणा० १७० । शिरःप्रभृतीनि, । उत्त० ४२८ ।
**अंगाणं**-देशविशेषः । भग० ६८० ।
**अंगादाणं**-मेढ्रम् । नि० चू० प्र० ११६अ ।
**अंगादानं**-मेहनम् । नि० चू० द्वि० ३०आ ।
**अंगारः**-(इंगाल), विगतज्वालोऽग्निः, । भग० १२२ । विगतधूमज्वालो दह्यमानेन्धनात्मकः । उत्त० ६९४ । कृष्णवर्णवस्तु । आचा० २९ ।
**अंगारओ**-अंगारकः, महाग्रहः । जीवा० ३३६, ३३७ ।
**अंगारकारिका**-(इंगालकारिया), अग्निशकटिका । भग० ६९७ ।
**अंगारदोषः**-(इंगालदोस), आहाररागाद्गाद्धर्याद्वृज्ञानस्य चारित्रांगारत्वापादनाद् । आचा० ३५१ ।
**अंगारमर्द्दकः**-(अंगारमद्दय) द्रव्यप्रव्रजितः । दश० ११५ । उत्त० ५६६ । विशे० १०६४ ।
**अंगारय**-अंगारकः, मंगलः । औप० ५२ ।
**अंगारवई**-अंगारवती, संवेगोदाहरणे शिशुमारपुरपति-धुन्धुमारदुहिता श्राविका । आव० ७०९ ।
**अंगारवई प०**-अंगारवती प्र० । आव० ६७ ।
**अंगारशकटिका**-(इंगालकारिया) । आचा० ३०९ ।
**अंगारा**-(इंगाल), लघुतराग्निकणाः । ठाणा० ४२० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंगारियं**-अंगारकितं, विवर्णीभूतम् । आचा० ३४९ ।
**अंगिरसा**-गौतमगोत्रोत्तरभेदः । ठाणा० ३९० ।
**अंगुट्ठं**-अंगुष्ठम् । आव० ८४५ ।
**अंगुट्ठपसिणा**-विद्याविशेषः । नि० चू० प्र० १७७अ ।
**अंगुट्ठिं**-स्नानम् । नि० चू० प्र० १९१आ ।
**अंगुट्ठी**-अंगुष्ठी, शिरोऽवगुण्ठनम् । आव० ९५ ।
**अंगुलपुहुत्तिया**-अंगुलपृथक्त्वम् । जीवा० ३९ ।
**अंगुलभावो**-अंगुलभावः, शुभाशुभपदार्थः । विशे० ८७६ ।
**अंगुलिं**-अंगुलिः, करशाखा । आचा० ३८ ।
**अंगुलिको**-चर्ममयोपकरणम् । नि० चू० प्र० १३७अ । नखभंगादिरक्खट्ठा । नि० चू० द्वि० १८अ । अंगुलिकोशः, शृङ्गमयो दारुमयो वंशमयो वा येनाङ्गुलिसंलग्नेन तन्त्री आहन्यते सः । जीवा० १९५ । अंगुलिकोशकः, शृङ्गदारुदन्तादिमयः । जं० प्र० ४० ।
**अंगुलिज्जं**-अंगुलीयकम्, अंगुल्याभरणविशेषः । औप० ५५ ।
**अंगुलिज्जग**-अंगुलीयकम्, मुद्रिका । जं० प्र० १०६ ।
**अंगुलिज्जयं**-अंगुलीयकम् । आव० १७० ।
**अंगुलिधणुहओ**-अंगुलधनुः । आव० ४८४ ।
**अंगुलिभमुहा**-कार्योत्सर्गदोषः । आव० ७९८ ।
**अंगुलिसत्थयं**-शस्त्रकोशविशेषः । नि० चू० द्वि० १८अ ।
**अंगुलीयगं**-अंगुलीयकं, भूषणविधिविशेषः । जीवा० २६९ ।
**अंगुले**-प्रमाणभेदः । भग० २७५ । अंगुष्ठ-प्रश्नभेदः । ठाणा० ३०१ । अंगुष्ठप्रश्नः, शुभाशुभसूचकः प्रश्नः । उत्त० ४४६ ।
**अंगोवंगाइं**-अंगोपांगानि । प्रज्ञा० ४६९ ।
**अंगोहलिं**-अंगरूक्षणम्, देशस्नानम् । आव० ४१७ । व्य० द्वि० ४०५अ ।
**अंचइ**-अञ्चति, उत्पाटयति । जं० प्र० ४२१ । जीवा० २५५ ।
**अंचिअं**-अञ्चितं, नृत्यविशेषः । जं० प्र० ४१२ ।
**अंचिअंचियं**-उत्पतनिपतां पार्श्वतः करोति । ठाणा० ५२२ ।
**अंचिओ**-अञ्चितः, व्याप्तः । आव० १६७ । अञ्चितनामा पञ्चविंशतितमो नाट्यविधिः । जीवा० २४७ ।
**अंचितरिभितं**-अञ्चितरिभितनामा सप्तविंशतितमो नाट्यविधिः । जीवा० २४७ ।
**अंचितांचिं**-गमागमः । भग० ६८३ ।
**अञ्चिते**-सकृद्गते । भग० ६८३ ।
**अञ्छियं**-दुर्भिक्षः । नि० चू० प्र० १४८आ । दात्रसंधी । नि० चू० प्र० १८३आ । नाट्यभेदः । नि० चू० तृ० १अ । अञ्चितं, नाट्यम् । जं० प्र० ४१७ । आव० ३९९ ।
**अंच्छेइ**-आकुञ्चयति । औप० २५ ।
**अंछंति**-आकर्षन्ति । विशे० ३८३ । आव० ४८ ।
**अंछणं**-पण्हपसिरणं । नि० चू० प्र० १९१आ । अंगुल्या लिप्तस्य रंगितस्य । ओघ० १४४ । आकर्षणं-समारणम् । ओघ० १४४ ।
**अंछमाणाणं**-आकर्षताम् । आव० ४८ ।
**अंछवियंछियं**-आकर्षविकर्षम् । आव० ८३२ ।
**अंछिऊण**-आकृष्य । आव० ४२७ ।
**अंछित्ता**-अपह्रियतां माया । व्य० द्वि० ८४आ ।
**अंछिय**-आकृष्यते, प्रक्षाल्यते । बृ० प्र० ८१अ ।
**अंछियनयना**-आकृष्टनेत्राः । प्रश्न० २१ । (जिब्भिन्दियंछिय) आञ्छितम्-आकृष्टम् (आकृष्टजिह्वेन्द्रियाः) । प्रश्न० ६० ।
**अंछिया**-आकृष्टा । आव० २२७ ।
**अंजणं**-आणतकल्पे विमानविशेषः । सम० ३५ । सौवीराञ्जनादि । बृ० द्वि० ९२अ । सोवीरयं रसंजणं वा । नि० चू० प्र० २१८आ । अञ्जनम्, सौवीरादि । आव० ५३० ।
**अंजण**-अञ्जनं, तप्तायःशलाकया नेत्रयोः प्रक्षणम् वा देहस्य क्षारतैलादिना । सम० १२६ । अञ्जनं, सौवीराञ्जनादि । प्रज्ञा० २७ । सौवीराञ्जनम् । जं० प्र० ६० । अञ्जनाः, अञ्जनरत्नमयत्वात् । जं० प्र० १६३ ।
**अंजणई**-वल्लीविशेषः । प्रज्ञा० ३२ ।
**अंजणए**-अञ्जनकः, वनस्पतिविशेषः । औप० १० ।
**अंजणकेसिया**-अञ्जनकेशिका, वनस्पतिविशेषः । जं० प्र० ३३ ।
**अंजणकेसियाकुसुमं**-अञ्जनकेसिकाकुसुमम्, वनस्पतिविशेषपुष्पम् । प्रज्ञा० ३६१ ।
**अंजणगं**-अञ्जनकः, पर्वतविशेषः । आव० ८२७ ।
**अंजणगपव्वय**-अञ्जनकपर्वतः । आव० ३८९ । सम० ९० ।
**अंजणगा**-अञ्जनकाः, नन्दीश्वरचक्रवालमध्यवर्त्तिनः पर्वताः । प्रज्ञा० ९६ । ठाणा० ४८० ।
**अंजणगिरि**-अञ्जनगिरिः । जं० प्र० १९६ ।
**अंजणपव्वय**-अञ्जनपर्वतः, नन्दीश्वरद्वीपे पर्वतविशेषः । जीवा० ३५८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंजणपुलए**-अञ्जनपुलककाण्डम्, एकादशं, अञ्जनपुलाकानां विशिष्टो भूभागः । जीवा० ८९ ।

**अंजणप्पभा**-अञ्जनप्रभा, पुष्करिणीनाम । जं० प्र० ३६० ।

**अंजणमओ**-अञ्जनमयः, अञ्जनरत्नात्मकः । जीवा० ३५८ ।

**अंजणसमुग्गयं**-अंजनसमुद्गकम् । जीवा० २३४ ।

**(अंजणसिज्झ)**-अंजनसिद्धः । दश० १२८ ।

**अंजणा**-पर्वतविशेषः । ठाणा० ८० । अंजना, पुष्करिणीनाम । जं० प्र० ३३५ । जं० प्र० ३६० ।

**अंजणागिरि**-अंजनागिरिः, दिग्हस्तिकूटनाम । जं० प्र० ३६० ।

**अंजणिं**-अंजनिका, कज्जलाधारभूता नलिका । सूत्र० ११७ ।

**अंजणे**-प्रभंजनेंद्रलोकपालः । ठाणा० १९८ । सीता-दक्षिणवर्ती तृतीयवक्षस्कारः । ठाणा० ३२६ । अंजनः, वेलम्बाभिधानवायुकुमारराजस्य लोकपालः, वरुणस्य पुत्रस्था-नीयो देवः । भग० ३९८ । राहुप्रलापीमते कृष्णपुद्गलविशेषाः । सूर्य० २८७ । अंजनकाण्डं दशमं, अञ्जनानां विशिष्टो भूभागः । जीवा० ८९ । कर्मजीवमालिन्ये हेतुत्वात् । जं० प्र० १४८ । अञ्जनो वक्षस्कारः । जं० प्र० ३५२ । सौवीरा-ञ्जनं रत्नविशेषो वा । प्रज्ञा० ३६१ । रसाञ्जनादि । दश० १७० ।

**अंजणेइ**-अञ्जनं, सौवीराञ्जनं रत्नविशेषो वा । जं० प्र० ३२ । अञ्जनं, कृष्णरत्नविशेषः । ठाणा० २३२ । अञ्जनं सौवीराञ्ज-नादि । जीवा० २३ । कज्जलम् । उत्त० ६५२ । समीरकम् उत्त० ६८९ । रजोभेदः । आचा० ३४२ ।

**अंजणगपव्वय**-अंजनकपर्वतः । सम० ९० ।

**अंजलिं**-अञ्जलिः, हस्तन्यासविशेषः । सूर्य० ६ । भग० १४ । अञ्जलिं, मुकुलितकमलाकारकरद्वयरूपम् । जं० प्र० १८७ ।

**अंजली**-अञ्जलिः, हत्थुस्सेहो । द० चू० १२९ । नि० चू० प्र० ७अ । अञ्जलिः, द्वयोर्हस्तयोरन्योऽन्यान्तरितांगुलिकयोः सम्पुटरूपतया यदेकत्रमीलनं सा । जीवा० २४३ । संयुतह-स्तमुद्राविशेषः । जं० प्र० १७ । प्रसृतिद्वयम् । नि० चू० द्वि० १२०आ ।

**अंजु**-ऋजुः, ऋजोः-संयमस्यानुष्ठानात् । आचा० ३०३ । मायाप्रपञ्चरहितत्वादवक्रः । सूत्र० १७७ ।

**अंजुया**-शान्तिजिनप्रवर्तिनीनाम । सम० १५२ । अंजुका, शक्रदेवेन्द्रस्याग्रमहिषी । जीवा० ३६५ ।

**अंजुल**-वनस्पतिविशेषः । भग० ८०२ ।

**अंजू**-प्रगुणोऽव्यभिचारी । सूत्र० ५१ । अंजू, व्यक्तम्, प्रगुणेन न्यायेन स्वरसप्रवृत्त्या वा । सूत्र० २९६ । अंजुः, व्यक्तः, निर्दोषत्वात्प्रकटः, (ऋजुर्वा) वक्रैकान्तपरित्यागादकुटिलः । सूत्र० ३९३ । अंजूः, सार्थवाहसुता । विपा० ३५ । अन्जुः, धनदेवसार्थवाहसुता । विपा० ८८ । शक्रस्याग्रमहिषीनाम । जं० प्र० १५९ । भग० ५०५ ।

**अंजूए**-शक्राग्रमहिषीराजधानी । ठाणा० २३१ ।

**अंड**-अण्डम्, काष्ठनिश्रितो जीवविशेषः । आचा० ५५ ।

**अंडए**-अण्डजः, हंसादिः ममायमित्युल्लेखेन वा प्रतिबन्धः, अण्डजं-पट्टसूत्रजम् । ठाणा० ४६५ । हंसादिः मयूराण्डकादिः वा अण्डजः, पक्षी कोशिकारकीटाण्डकप्रभवं वस्त्रं वा । औप० ३६ ।

**अंडओ**-अण्डकः, जन्तुयोनिविशेषः । प्रश्न० ३३ ।

**अंडग**-अण्डकम्, आहारः । भग० २९२ । मुखं । व्य० द्वि० ३३३आ । अण्डजाः, अण्डाज्जाताः । ठाणा० ११४ ।

**अंडय**-अण्डजः, हंसादिः । भग० ३०३ । अण्डजाः, पक्षि-गृहकोकिलादयः । दश० १४१ ।

**अंडसुहुम**-अण्डसूक्ष्मम्, मक्षिकाकीटिकागृहकोलिकाब्राह्मणी-कृकलासाद्यण्डम् । दश० २३० । अण्डसूक्ष्मम्, मक्षिका-कीटिकागृहकोकिलाब्राह्मणीकृकलास्याद्यण्डकमिति । ठाणा० ४३० ।

**अंडु**-अण्डु, अन्दुकं काष्ठमयं लोहमयं वा हस्तयोः पादयोर्वा । औप० ८७ ।

**अंडे**-विपाकश्रुताद्यश्रुतस्कंधतृतीयाध्ययनम् । ठाणा० ५०७ । ज्ञातायां तृतीयाध्ययनम् । आव० ६५३ । सम० ३६ । अण्डम्, षष्ठांगे तृतीयं ज्ञातम् । उत्त० ६१४ ।

**अन्तःकरणम्**-मनः । आव० ५८५ ।

**अन्तःशल्यः**-(अंतोसल्ल), अन्तः-मध्ये मनसीत्यर्थः, शल्य-मिव शल्यमपराधपदं यस्य सो अन्तःशल्यो-लज्जाभि-मानादिभिरनालोचितातिचारः । सम० ३४ ।

**अंतं**-अन्तः शब्दो मध्यवचनः । विशे० ११७ । परिजीर्णम्, । बृ० द्वि० १७५आ । वस्त्रस्य दशान्तम् । बृ० द्वि० २३५अ । अन्त्यम्, अन्ते भवम्, जघन्यधान्यम् । औप० ४० । अन्त्रम्-पुरीतत् । प्रश्न० ८ । कुल्माषादिकम् । बृ० प्र० २२०आ ।

**(अंतचरे)**-आन्तम्-अन्ते भवं-आन्तम्-भुक्तावशेषं वल्लादि (तच्चरति) । ठाणा० २९८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्तयोः-अंचलयोः। भग० ४७७। भूभागः। भग० १२२। अवसानम्। पज्ञा० ३९७। भूमिभागः। भग० ३२३। ठाणा० १३९। समीपम्। जं० प्र० ४५५। वल्कचणकादि। प्रश्न० १०६। समीपः। ठाणा० ११७। अधिकरणप्रधानमव्ययम्। उत्त० २६१। (अंतचरे)-आन्तम्, अन्ते भवं आन्तम्, भुक्तावशेषवल्लादि (तच्चरति)। ठाणा० २९८।

**अंतंतं**-पर्युषितं वल्लचणकादि। ओघ० १८८।

**अंत**-अन्तः, निश्चयः। भग० २९०। परिच्छेदः। ठाणा० १७४।

**अंतओ**-अन्तकः, विषतृष्णायाः पर्यन्तवर्ती। सूत्र० २५९। अन्तकम्, पर्यन्तम्। उत्त० ६२८।

**अंतकडे**-अन्तकृत्। भग० १११। अन्तो भवस्य कृतो येन सः अन्तकृतः। ठाणा० ३६।

**अंतकम्मं**-अन्तकर्म, अञ्चलकर्म वा न लक्षणम्। औप० ५५। अन्तकर्म्माणि, अञ्चलयोर्वा न लक्षणानि। जं० प्र० २७५। अन्तकर्म, अञ्चलयोर्वा न लक्षणम्। जीवा० २५३।

**अंतकम्मा**-अन्तकर्मा, प्रान्तः। औप० ११।

**अंतकरे**-अन्तकरः, भवच्छेदकरः। भग० २१९।

**अंतकरो**-अन्तकरः, प्रशस्तभावकरविशेषः, कर्मणः संसारस्य वा अंतकरः। आव० ४९९।

**अंतकिरिआ**-अन्तक्रिया, निर्वाणलक्षणा। आव० १३५।

**अंतकिरियं**-अन्त्य(न्त)क्रिया, अन्त्या च सा पर्यन्तवर्तिनी क्रिया चान्त्यक्रिया। अन्त्यस्य वा कर्मान्तस्य क्रिया अन्तक्रिया। कृत्स्नकर्मक्षयलक्षणां मोक्षप्राप्तिम्। भग० ४९।

**अंतकिरिया**-अन्तक्रिया, अन्तः-कर्मणामवसानं तस्य क्रिया-करणम्, कर्म्मान्तकरणं मोक्ष इति। प्रज्ञा० ३९६। निर्वाणम्। भग० ९१। प्रज्ञापनाया विंशतितमं पदम्। प्रज्ञा० ६। मोक्षः। सम० ११८। भवस्यान्तकरणम्। ठाणा० १८०।

**अंतकुलाणि**-अन्तकुलानि-वरुटछिम्पकादीनाम्। ठाणा० ४२०।

**अंतक्खरिया**-लिपिविशेषः। प्रज्ञा० ५६।

**अंतगडदसा**-अन्तकृद्दशा, अन्तो-भवान्तः कृतो विहितो यैस्तेऽन्तकृताः, तद्वक्तव्यताप्रतिबद्धा दशाः-दशाध्ययनरूपा ग्रन्थपद्धतय इति। अन्त० १।

**अंतगडो**-अन्तकृत्, ज्ञानावरणीयादिकर्म्मान्तकृत्। आव० १६३। तेनैव भवेनेति। आव० ११७। अन्तकृताः-तीर्थकरादयः। सम० १२१।

**अंतगतावधिः**-(अंतगतावही)-आत्मान्तगतः, शरीरान्तगतः, अवधिक्षेत्रान्तगतः (पुरःपृष्ठपार्श्वेषु)। प्रज्ञा० ५३७।

**अंतगो**-अन्तकः, विनाशकारी, आत्मनि वा गच्छतीति, आन्तरः आत्मगो वा। सूत्र० १७८। अन्तंगः, अन्तं गच्छतीति, दुष्परित्यज्यः। सूत्र० १७८।

**अंतचारी**-अन्तचारी, पार्श्वचारीति। ठाणा० ३४२।

**अंतदीवगं**-सव्वेहिं अभिसवज्झात अमज्जमसासी भवेज्जा। दश० चू० १६३।

**अंतदीपकम्**-प्रागुक्तेष्वपि समन्वयः। विशे० ३३०।

**अंतद्धाणं**-अदृश्यः। नि० चू० प्र० ७६ अ।

**अंतद्धाणपिंडो**-अप्पाणं अंतरहितं करेत्ता जो पिंडं गेण्हति सो अंतद्धाणपिंडो भण्णति। नि० चू० द्वि० १०२ अ।

**अंतरं**-उववासो। नि० चू० प्र० १७४ आ। अन्तरं प्राप्तिः। विशे० २४७। मज्झं। नि० चू० तृ० १४० अ। समुद्रमध्यम्। उत्त० ७००। उत्तरम्। आव० ४४२। विशेषः। उत्त० २१७। अवसरः। आचा० १०७। अवकाशः। प्रज्ञा० ६९। मध्यः। जीवा० ४६। शैलान्तरम्-कन्दरान्तरम्, वनान्तरम् वा आश्रयरूपं। प्रज्ञा० ६९। अन्तरालम्। आव० ३३। विशेषो रूपनिर्म्माणादिभिः। ठाणा० २०३। पूर्वत्यागापरवस्त्रादानकाले-प्रतिमाविशेषः। नि० चू० द्वि० १६३ आ। पार्श्वरूपम्। जं० प्र० ३८७। व्यवधानम्। जीवा० १२२। अन्तरायम्। ओघ० १७६। उपवासः। आव० २०३। राजगमनस्यान्तरम्। विपा० ५३। अवसरः। विपा० ७३। अपान्तरालम्। सूर्य० ४९। अवसरः। प्रश्न० ४२। ग्रामादीनामर्धपथः। प्रश्न० ५२। पृष्ठोदरयोरन्तरालं पार्श्वे इति। जीवा० २७७। विचालं। व्य० प्र० १२८ अ।

**अंतरंजिया**-अन्तरञ्जिका, नगरी यत्र त्रैराशिकदृष्टिरुत्पन्ना, बलश्रीराजधानी। उत्त० १६८। पुरी यत्र त्रैराशिकनिह्नवस्य दृष्टिरुत्पन्ना। आव० ३१८। नगरी। विशे० ९८१।

**अंतरंत**-अंतरतो नाम असहा मूधा। व्य० द्वि० १० आ।

**अंतरंतगो**-गिलाणो। नि० चू० प्र० १९८ अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंतर**–वस्त्रैषणाभेदः । आचा० २७७ । अन्तरशब्दो मध्यवाची । प्रज्ञा० ५० । अन्तरे, पृष्ठोदरयोरन्तराले, पार्श्वे । जं० प्र० ११७ । अंतरागि–पार्श्वदेशः । प्रश्न० ८३ ।

**अंतरकंदे**–अन्तरकन्दः । जलजवनस्पतिविशेषकन्दः । प्रज्ञा० ३७ ।

**अंतरकरणं**–औपशमिककालः । प्रज्ञा० ३८७ ।

**अंतरगए**–अन्तरगतः, संस्पर्शी । सूर्य० ७९ ।

**अंतरगामम्मि**–अपान्तराल एव यो ग्रामस्तस्मिन् । ओघ० ७७ ।

**अंतरगिरिपरिरओ**–अन्तर्गिरिपरिरयः, गिरेरन्तः परिक्षेपः । जीवा० ३४३ ।

**अंतरजातम्**–भावभाषाजातः तृतीयो भेदः । अन्तरे भाषाद्रव्यमिश्रणं । आचा० ३८५ ।

**अंतरतेणो**–गामदेसंतरेसु हरंतो । नि० चू० द्वि० ३८ आ ।

**अंतरदीव**–अन्तरद्वीपः । भग० ४२५ ।

**अंतरदीवगा**–अन्तरद्वीपगा, अन्तरे लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपाः, तद्गता अन्तरद्वीपगाः । प्रज्ञा० ५० ।

**अंतरदीवगो**–अन्तरद्वीपः, लवणसमुद्रमध्ये अन्तरेऽन्तरे द्वीपः । जीवा० १४४ ।

**अंतरदीविगा**–आन्तरद्वीपजाः । ठाणा ११५ ।

**अंतरद्धा**–अन्तर्द्धानम्, भ्रंशः । आव० ८२७ ।

**अंतरद्धाए**–अन्तरकालेऽर्धसंलिखिते देहे । आचा० २९१ ।

**अन्तरद्वीपजाः**–अन्तरम्, इह समुद्रमध्यं तस्मिन् द्वीपास्तेषु । उत्त० ७०० । अन्तरद्वीपजाः, सम० १३५ । अन्तरद्वीपाः, अन्तरम् । इह समुद्रमध्यं तस्मिन् द्वीपाः । उत्त० ७०० ।

**अंतरपल्ली**–अन्तरपल्लिकावृषभग्रामयोरन्तरालम् । बृ० प्र० ३०५ ।

**अंतरपल्ली**–बहिःसन्निवेशः । नि० चू० प्र० ३३६अ । मूलग्रामादर्धतृतीयगव्यूतान्तर्गतो ग्रामः । बृ० तृ० १२१ आ । तस्माद्ग्रामात्परतो योऽन्य आसन्नग्रामः । ओघ० १०४ ।

**अंतरभासिल्ल**–अन्तरभाषिल्ल, अन्तरभाषावान्, गुरुवचनापान्तराल एव स्वाभिमतभाषकः । उत्त० ५५२ ।

**अंतरभासा**–अन्तरभाषा, आचार्यस्य भाषमाणस्यान्ते यद्भाषते सा । आव० ७९२ ।

**अंतरवीहिअं**–अन्तरवीथी, अवान्तरमार्गः । जं० प्र० १८८ ।

**अंतरा**–अगृहीतवीप्सा । जीव० १९९ ।

**अंतराइयदोसो**–अन्तरायिकदोषः, अन्तर्भवो दोषः । आव० ८३८ ।

**अंतराए**–अन्तरायः, शक्त्यभावः । सूत्र० १८४ । अन्तरायिकः ( मध्यभव ) । आचा० ३४० ।

**अंतराणि**–उत्कर्षापकर्षात्मकविशेषरूपाणि निवासभूतानि वा गिरिकन्दरविवरादीनि । उत्त० ७०१ ।

**अंतरापहे**–अन्तरापन्थाः, अन्तरालमार्गः । भग० ११६ ।

**अंतरायं**–अन्तरायः, असज्झाइकाध्यायादिभिः । आव० ५८० ।

**अंतरालं**–अन्तरालं, अन्तरम् । उत्त० ३८१ । आव० ३३ ।

**अंतरावणं**–अन्तरापणं । उत्त० २२२ । आवणान्तरम् । उत्त० २०९ । राजमार्गमध्यभागवर्त्तिहट्टम् । विपा० ५८ ।

**अंतरावासं**–वृष्टेरवसरः, वर्षाकालश्च । भग० ६६ ।

**अंतरिए**–लघ्वन्तररूपाः । जं० प्र० ४९ ।

**अंतरिओ**–अन्तरितः, । आव० ४२९ ।

**अंतरिका**–अन्तरस्य–विच्छेदस्य करणमन्तरिका । जं० प्र० १५० ।

**अंतरिक्खं**–अन्तरिक्षं, आकाशप्रभवग्रहयुद्धभेदादिभावफलनिवेदकशास्त्रम् । सम० ४९ ।

**अंतरिक्खो**–मेहो । दश० चू० ११४ ।

**अंतरिच्छा**–अन्तरेच्छा, अन्तरा–मध्ये इच्छा–अभिमतवस्त्वभिलाषः । उत्त० ४७४ ।

**अंतरिज्जं**–अंतरिज्जं णाम पाउरणं अथवा जं सिज्जाए हेट्ठिल्लापात्तं । नि० चू० द्वि० १६३ आ ।

**अंतरिया**–अन्तरिका । सूर्य० १४१ । लघ्वन्तररूपा । जीवा० २०४ । विच्छेदकरणम् । भग० २२० ।

**अंतरीयं**–परिधानं । बृ० प्र० ९८ अ ।

**अंतरुच्छुअं**–इक्षुपर्वमध्यम् । आचा० ३५४ ।

**अन्तरे**–पथि । ओघ० ६६ । मध्ये परस्परविभागः । ठाणा० २२७ । अन्तरे, अन्तराले । उत्त० ३८१ । अन्तरे, अवसरः । भग० ३८१

**अंतरो**–अन्तरः, अवसरः । आव० ४२१ ।

**अंतरोदगाणं**–अन्तरोदकानाम्, जलान्तर्वर्त्तिसन्निवेशविशेषाणाम् । जं० प्र० २७७ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंतर्मुहूर्त्तम्**–मुहूर्तस्यान्तरं, मुहूर्त्तमपि न्यूनम्। उत्त० ६९७। भिन्नमुहूर्त्तम्। जीवा० १३०।

**अंतर्हितः**–( अंतद्धिओ ) अदृश्यः। ठाणा० ५१३।

**अंतलिक्खं**–अन्तरिक्षं, ग्रहभेदादिविषयम्। आव० ६६०।

**अंतलिक्ख**–अन्तरिक्षम्, नभः। दश० २२३। अमोघादिकम्। सूत्र० ३१८।

**अंतलिक्खं**–अन्तरिक्षम्–गंधर्वनगरादि। ठाणा० ४२७।

**अंतवाले**–अन्तपालः, अन्तं–स्वदादेश्यदेशसम्बन्धिनं पालयति–रक्षयति उपद्रवादिभ्य इति। जं० प्र० २०३।

**अंतसो**–अन्तशः, निरवशेषतः। सूत्र० १७१।

**अंताः**–अवयवाः। उत्त० ४५९। उत्त० ५८५।

**अंता**–अंते ठिता, ण अंता अणंता। नि० चू० प्र० २५५ आ।

**अंताक्षरिका**–( अंतक्खरिया ) क्रीडाविशेषः। उत्त० ४७।

**अंतिए**–अन्तिके, समीपे। भग० ९०। उत्त० २७७।

**अंतिमधनं**–अंतिमे–अंकस्थाने परिमाणं। व्य० प्र० ७६।

**अंतिमराइयंसि**–रात्रेरवसाने। ठाणा० ५०२। भग० ७११।

**अंतिमसरीर**–अन्तिमशरीरम्, चरमशरीरम्। भग० २१९।

**अंतियं**–समीपम्। भग० ६५९। अत्यन्तमरणं, मरणस्य तृतीयो भेदः। उत्त० २३०। आन्तिकं, सामीप्यम्। आव० २६७।

**अंतिय**–अन्तिकम्, आसन्नम्। भग० २१७। अत्यन्तमरणम्। उत्त० २३०।

**अंतिया**–आन्तिकी समीपाभ्युपगता। उपा० १५।

**अंते**–अन्तः, पर्यन्तः, अतिदूरं वा। सूत्र० २०४। अन्ते, अग्रे। उत्त० ६०१। परिसमाप्तिः। बृ० द्वि० १९९ आ।

**अंतेउरे**–(आंतःपुरिकी), आतुरस्य नाम गृहीत्वा आत्मनोऽङ्गं प्रमार्जयति–आतुरश्च प्रगुणो जायते। व्य० द्वि० १३३ आ।

**अंतेण**–मार्गेण। नि० चू० प्र० ६ आ।

**अंतेणं**–आन्त्रेण। ठाणा० ५०२।

**अंतेवासि**–भर्तृज्जुकाः। नि० चू० प्र० २५० अ।

**अंतेवासी**–शिष्यः। जं० प्र० १५। भग० ११।

**अंतेहि**–अरसतया सर्वधान्यान्तवर्तिभिर्वल्लचणकादिभिः। भग० ४८४। रागद्वेषौ। आचा० १५८। आचा० १६६।

**अंतो**–अन्तो, विभागः। भग० ३९३। विभागः। ठाणा० ३८०। अन्तः, परिच्छेदः। प्रज्ञा० ५३२। मार्गः। आव० ४०२। अन्तः निवेशनस्य। आव० ७४५। अन्तो, रोगः, भङ्गः, विनाशः। विशे० १३०७। अन्तः, मध्यभागे। जीवा० २०१। मार्गः। आव० ६८६। विभागः। जं० प्र० ४५९। भिन्नम्। आव० ५८४। मार्गः। आव० ४८५। आव० १८९। मध्ये। प्रज्ञा० ४७। इन्द्रियाननुकूल आश्रयः। प्रश्न० १३८। मध्यकरणम्। आव० ५८३। चतुर्दशभेदान्तरग्रन्थः। उत्त० २६१।

**अंतोजलगयपव्वय**–जलान्तर्गतपर्वतः। उत्त० २६४।

**अंतोधूमं**–अभ्यन्तरधूमम्। आव० ६६२।

**अंतोनायं**–अन्तोनादं, हृदये सदुःखमारसन्। आव० ६६१।

**अंतोनियंसणी**–निर्ग्रंथ्युपकरणविशेषः। ओघ० २०९।

**अंतोमुहुत्त**–अन्तर्मुहूर्तम्, भिन्नमुहूर्तम्। भग० २९। उत्त० ६९७।

**अंतोवणीते**–आहरणतद्दोषविशेषः। ठाणा० २५३।

**अंतोवाहिणी**–अन्तर्वाहिनी नदी। जं० प्र० ३५७। ठाणा ८०।

**अंतोवेइया**–प्रतिलेखनादोषः। नि० चू० प्र० १८२ अ।

**अंतोसंबुक्कावट्टा**–गोयरपिंडेसणाए कमेणं ति, तत्थ गोयरातिमे अभिग्गहविसेसतो जाणियव्वा। नि० चू० तृ० १२ अ।

**अंतोसल्लं**–अन्तःशल्यमरणम्। मरणस्य षष्ठो भेदः। उत्त० २३०।

**अंतोसल्लमरणे**–अन्तःशल्यमरणम्, अन्तःशल्यस्य द्रव्यतोऽनुद्धृततोमरादेः, भावतः सातिचारस्य यन्मरणं तत्। भग० १२०। सम० ३३।

**अंतोहिंतो**–गृहादेर्मध्याद्बहिर्नयन्तः। ठाणा० ३५३।

**अंत्यः**–आनुपूर्व्यन्त्यपक्वर्यकाः। सूत्र० १०। विशेषम्। ठाणा० ३९१।

**अंदुकम्**–हस्तिबन्धनविशेषः। उत्त० ४११।

**अंदेरे**–गुच्छाविशेषः। प्रज्ञा० ३२।

**अंदोलगा**–पक्ष्यन्दोलकाश्च तत्र यत्रागत्य २ मनुष्या आत्मानमन्दोलयन्ति। जं० प्र० ४४।

**अंदोलगो**–आन्दोलकः यत्रागत्य मनुष्या आत्मानमन्दोलयति सः। जीवा० २००।

**अंध**–अन्धः, अज्ञानः। भग० ३१२।

**अंधकण्टकीयम्**–अतर्कितसम्भवो न्यायविशेषः। आचा० १८।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अंधकारे**-अन्धकारम्, तमोरूपम्। भग० २७०।
**अंधकारेति**-तमस्कायनाम। ठाणा० २१७।
**अंधगवण्हिणो**-अंह्रिपा-वृक्षास्तेषां वह्नयस्तदाश्रयत्वेनेत्यं-ह्रिपवह्नयो बादरतेजस्कायिकाः। भग० ७४६।
**अंधगवण्ही**-अन्धकवृष्णिः, द्वारवत्यां राजा यादवविशेषः। अन्त० २। दश० ९७।
**अंधतमसं**-अन्धतमसम्। आव० ३६६।
**अंधपुरं**-नगरविशेषः। बृ० तृ० १०८ आ०। नि० चू० द्वि० ४२आ।
**अंधप्रदीतपलायनम्**-(अंधपलितपलाणं)। दश० १५८।
**अंधमूढि**--अविमर्शकारिता। आचा० ६२।
**अंधयं**-अन्धकम्, नयनयोरादित एवानिष्पत्तेः, कुत्सिताङ्गम्। विपा० ३६।
**अंधलीभूय**-अन्धीभूतः। आव० ६८८।
**अंधिय**-चतुरिन्द्रियविशेषः। प्रज्ञा० ४२।
**अंधिया**-चतुरिन्द्रियजीवभेदः। उत्त० ६९६। चतुरिन्द्रिय-जन्तुविशेषः। जीवा० ३२।
**अंधिल्लगो**-अन्धिल्लकः, जात्यन्धः। प्रश्न० १६२।
**अंधीयताम्**-अन्धीभवतु। दश० १०६।
**अंधो**-अन्धः, चिलातदेशनिवासी म्लेच्छविशेषः। प्रश्न० १४।
**अंधोपलः**-(अंधोवल), अन्धपाषाणः। दश० ४०।
**अंधोपलादिः**-छायारहितपाषाणः। विशे० ९१८।
**अंध्र**-(अंध), अंध्रादिदेशोद्भवा म्लेच्छप्राया, आर्यभाषामजानाना। व्य० द्वि० २८अ।
**अंध्री**-(अंधी), अन्ध्रदेशीया स्त्री, उत्कृष्टरूपा। आव० ५८१।
**अणीहारि**-अनिर्हारि, तपोभेदः। उत्त० ६००।

**अणीहारिमे**-अनिर्हरणाद् गिरिकन्दरादौ अनशनम्। ठाणा० ९४। जइ बहिं पडिवज्जइ। नि० चू० द्वि० ५८ अ।

**अणु** - अनु-प्रतिदिवसम्। सूर्य० १३६, १३३। थेवे। दश० चू० ८९। स्तोकप्रदेशम्। प्रज्ञा० २६३। पश्चाद्भावे स्तोके च। बृ० प्र० ३३अ,। स्तोकम्। प्रज्ञा ५०२। प्रमाणतो वज्रादि। दश० १४७। लघुः, हीनः। सूर्य० २६१। जं० प्र० ५२२।

**अणुअतणुअ**-अनुकतनुकानां-अतिसूक्ष्माणाम्। जं० प्र० २३७।

**अणुओग** - अनुयोगः, अर्थकथनम् सूत्रादनु-पश्चादर्थस्य योगोऽनुयोगः सूत्राध्ययनात्पश्चादर्थकथनम्। अणोर्वा लघीयसः सूत्रस्य महताऽर्थेन योगोऽनुयोगः। आचा० २। व्याख्यानः। ओघ० ७१।

**अणुओगत्थो**-अनुयोगार्थः, व्याख्यानभूतोऽर्थः। आचा० ७।

**अणुओगदारं** - अनुयोगद्वारम्, सूत्रविशेषः। आव० ७४०। अस्वाध्याये परिहर्तव्यसूत्रविशेषः। नि० चू० तृ० ७१ आ०।

**अणुओगदारे**-अनुयोगद्वारम्, अनुयोगद्वारसूत्रम्। भग० २२१।

**अणुओगस्स**-अनुयोगस्य। विशे० ५९३।

**अणुओगो** - अनुयोगः, सूत्रस्यार्थेनानुयोजनम्, अभिधेये व्यापारः सूत्रस्य योगो वा, अनुकूलोऽनुरूपो वा योगः। आव० ८६, ठाणा० ४८१। निजेनाभिधेयेनार्थेनानुयोजनं-सम्बन्धनम्। विशे० ५९३। सूत्रपाठानन्तरमनु-पश्चात्सूत्रस्यार्थेन सह योगो-घटना। जीवा० २। अनुकूलः-अविरोधी सूत्रस्यार्थेन सह योगो वा। जीवा० २। सूत्रस्यार्थेन सह सम्बन्धनं, अनुरूपोऽनुकूलो वा योगो व्यापारः सूत्रस्यार्थप्रतिपादनरूपः। अणोः-लघोः पश्चाज्जाततया वाऽनुशब्दवाच्यस्य योऽभिधेयो योगो-व्यापारस्तत्सम्बन्धो वाऽणुयोगो अनुयोगो वा। जं० प्र० ४। दृष्टिवादचतुर्थो भेदः। सम० १२८। नियोगः। आव० ६९४। अनुयोजनम्, अनुकूलो वा योगः। अणु-सूत्रं, महान्



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अर्थस्ततो महतोऽर्थस्याणुना सूत्रेण योगो वा। ओघ० ४। विचारः। ठाणा० ४८१, ४९५। अनुरूपोऽनुकूलो वा योगः। सम० १३१। अध्ययनार्थः। आव० ५४। सूत्रस्पर्शकनिर्युक्तिः सूत्रानुगमश्च। आव० ८६। परीक्षा। आव० १५७।

**अणुकंपं**-अनुकम्पां-उपष्टम्भम्। ठाणा० १७०।

**अणुकंपओ**-अनुकम्पकः-अनुरूपक्रियाप्रवृत्तिः। उत्त० ३५९।

**अणुकंपा**-अनुकम्पा, अनुग्रहः। दश० ६७। भक्तिः। ओघ० १९६। आव० ३४८। सम्यक्त्वगुणविशेषः। आव० ५९१। अनुक्रोशः। सम० १२७। दीनानाथविषयं दानम्। ठाणा० ४९६।

**अणुकंपाए**-अनुकम्पया-अनुग्रहेण। व्य० द्वि० १७२ आ।

**अणुकंपे**-अनुकम्पते, उपकुरुते। उत्त० ४१९।

**अणुकड्ढइ**-अनुकर्षयति। आव० २१८।

**अणुकुप्पति**-प्रच्छादयति, अणुक्षिप्ता। नि० चू० प्र० १८० अ।

**अणुकुयितं**-अश्लथम्। बृ० द्वि० २५२ अ।

**अणुकूला**-संजमविग्घकरा (राज्यार्पणादिकाः)। नि० चू० प्र० १९४ आ।

**अणुक्कंतो**-अनुक्रान्तः-अनुचीर्णः। आचा० ३०६।

**अणुक्कमं**-अनुक्रमः। आव० ३४२। पारम्पर्यम्। उत्त० १४७।

**अणुक्कमंतो**-अनुक्रम्यमाणः, प्रेर्यमाणः। सूत्र० १३६।

**अणुक्कसाई**-अनुत्कशायी, अणुकषायी, उत्कण्ठितः सत्कारादिषु शेत इत्येवं शील उत्कषायी, न तथा। यो न सत्कारादिकमकुर्वते कुप्यति, तत्सम्पत्तौ वा नाहङ्कारवान् भवति सः। उत्त० १२४। अणवः-स्वल्पाः संज्वलननामान इतियावत् कषायाः-क्रोधादयो यस्य। उत्त० ४२०।

**अणुगच्छइ**-अनुगच्छति, आसन्नो भवति। जं० प्र० १८७।

**अणुगच्छण**-अनुगमनम्, आगच्छतः प्रत्युद्गमनम्। दश० २४१।

**अणुगच्छमाणो**-अनुगच्छन्-अवगच्छन्-बुद्ध्यमानः सन्। आचा० २२२।

**अणुगम**-अनुगमः, अनुगमनमनेनास्मादस्मिन्निति वा अर्थकथनम्। आचा० ३। अन्वयः। विशे० ९६४।

**अणुगमणं**-अनुगमनम्, आगच्छतः प्रत्युद्गमनम्। उत्त० १७।

**अणुगमिओ**-अनुगमितः, अनुनीतः। आव० ५५।

**अणुगमो**-अनुगमः, सूत्रार्थयोरनुरूपसंबंधकरणम्। विशे० ४३१। निक्षिप्तसूत्रस्यानुकूलः परिच्छेदोऽर्थकथनम्। जं० प्र० ५।

**अणुगयं**-अनुगतं, अनवच्छिन्नम्। प्रश्न० ६६। युक्तम्। दश० २०७। अभिप्रायानुवर्तिनमात्मानम्। उत्त० ३२२। युक्तः। उत्त० ६३१।

**अणुगामं**-अनुग्रामः, ग्राममार्गानुकूलः लघुर्वा ग्रामः, रुढित एकस्माद्वा ग्रामादन्यो ग्रामः। उत्त० ९९।

**अणुगामियत्ताए**-अनुगामिकता-परम्परया शुभानुबन्धसुखाय भविष्यति। जीवा० २४२।

**अणुगीया**-अनुगीता तीर्थकरादिभ्यः श्रुत्वा प्रतिपादिता। उत्त० ३८५।

**अणुग्गह**-अनुग्रहः, अनुग्रहपरिहरणा अक्खोडभंगपरिहरणा, (अकृष्टभूशुल्कपरिहारः) आव० ५५२। ज्ञानाद्युपकारः। ठाणा० १५५।

**अणुग्गहकसिणं**-छण्हं मासाणं आरोवियाणं छद्दिवसा गता, ताहे अण्णो छम्मासो आवण्णो, ताहे जं तेण अद्धवूढं तं ज्झोसितं जं पच्छा आवण्णं छम्मासितं तं वहति, एत्थ पंचमासा चउव्वीसं च दिवसा जेग ज्झोसिया। नि० चू० तृ० १३५ अ।

**अणुग्गहत्थं** – अनुग्रहार्थं-अनुग्रहः – उपकारोऽभिधीयते, अर्थशब्दः प्रयोजनवचनः। ओघ० ४।

**अणुग्गहपरिहारो**-अनुग्रहपरिहारः-राजकृतानुग्रहवशेन एकद्वित्र्यादिवर्षमर्यादया यथोक्तरूपं खोटादिभंजनं एकं द्वे त्रीणि वर्षाणि यावत् वसति, यावन्तं वा कालं राज्ञानुग्रहः कृतस्तावन्तं कालं वसति, न च हिरण्यादि प्रददाति, नापि वेष्टिं करोति, न चापि चारभटादीनां भोजनादि प्रदानं विधत्ते, एष खोटादिभंगो। व्य० प्र० ४५ अ। तत्तियं कालं सो दव्वादिसु परिहरिज्जति तावत्कालं न दण्ड्येतेत्यर्थः। नि० चू० तृ० ८९ आ।

**अणुग्गहो**-अनुग्रहः, उपकारः। ओघ० ४।

**अणुग्गामो**-अनुग्रामः, विवक्षितग्रामानन्तरो ग्रामः। औप० २२।

**अणुग्घाई**-अनुद्घातिकं-यत्र गुरुमासादि प्रायश्चित्तं वर्ण्यते। प्रश्न० १४५।

**अणुग्घाडिया**-अनुद्घाटिता, अस्पृष्टा। दश० ४१।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अणुग्घाता** गुरवः। नि० चू० प्र० ८७ अ।
**अणुग्घातियं**-जं णिरंतरं वहति गुरुं। नि० चू० प्र० ३०५ आ। गुरुगं। नि० चू० प्र० २५७ अ।
**अणुग्घायं**-आचारप्रकल्पस्य सप्तविंशतितमो भेदः। आव० ६६०।
**अणुग्घायकसिणं**-जं कालगं जहा मासगुरुगादि अहवा जं णिरंतरं दागं एस मासलहुगादिंपि णिरंतरं दिज्जमाणं अणुग्घातं भवति। नि० चू० तृ० १३५ आ।
**अणुग्घायण**-अणोद्घातन-अणत्यनेन जन्तुगणश्चतुर्गतिकं संसारमित्यणं-कर्म्म तस्योत्-प्राबल्येन घातनम्-अपनयनम्। आचा० १४७।
**अणुग्घायाणि**-गुरूणि प्रायश्चित्तानि। बृ० तृ० ६७ अ।
**अणुघट्टंता**-अतृप्यन्तः। ओघ० ७८।
**अणुघाइयं**-अनुद्घातं, न विद्यते उद्घातो--लघुकरणलक्षणो यस्य तपोविशेषस्य तत् यथाश्रुतदानं, तद्येषां प्रतिषेवाविशेषतोऽस्ति ते। ठाणा० ३११।
**अणुचरिया**-चरिका, नगरप्राकारयोरपान्तराले। बृ० तृ० ५३ अ।
**अणुचिण्णो**-अनुचीर्णम्, आचरितम्। आव० २२७। अनुष्ठितः। ओघ० १०३।
**अणुचिंतणं**-अनुचिन्तनम्, पर्यालोचनम्। आव० ५८९।
**अणुचिन्नं**--अनुचीर्णम्, सम्यक् तदर्थावगमासंगशक्तिगर्भानिवर्तकसमभावप्राप्त्या धर्ममेघनामकसमाधिरूपेण परिणमितम्। जीवा० ४। अनुचीर्णाः-कायसंगमागताः सम्पातिमादयः। आचा० २१७।
**अणुचिय**-अनुचितः-भावितः शैक्षो वा। बृ० द्वि० २३८ अ।
**अणुजत्तं**-अनुयात्रम्। उत्त० ३०४। अनुयात्रा, राजपाटिका। आव० ७२०।
**अणुजत्ता**-अनुयात्रा। आव० ३६५।
**अणुजाए**-अनुजातः, सदृशः। सूर्य० २३३।
**अणुजाणं**-रथयात्रा। बृ० द्वि० १५५ अ। बृ० प्र० २५८ आ। व्य० द्वि० १७ आ।
**अणुजाणपेक्खओ**-अनुयानप्रेक्षकः। आव० ५७७।
**अणुजाणे**-अनुजानन्। उत्त० २९३।
**अणुजाते**-पितृसमः। ठाणा० १८४।
**अणुजायं**-अनुयातं, भृतम्। जं० प्र० २१२।
**अणुजीवंति**-अनुजीवन्ति-तदुपार्जितवित्ताद्युपभोगतः उपजीवन्ति। उत्त० ४४१।
**अणुजोगगत** – तीर्थंकरादिपूर्वभवादिव्याख्यानग्रंथो गण्डिकानुयोगश्च भरतनरपतिवंशजानां निर्वाणगमनानुत्तरविमानवक्तव्यताव्याख्यानग्रन्थ इति द्विरूपेऽनुयोगे गतोऽनयोगगतः। ठाणा० ४९१।
**अणुजोगी** – अनुयोगी-अनुयोगो-व्याख्यानं प्ररूपणं वा। ठाणा० ३७५।
**अणुजोगो**-अणोः-लघोः पश्चाज्जाततया वा अनुशब्दवाच्यस्य सूत्रस्य योऽभिधेये योगो-व्यापारस्तेन सम्बन्धो वा सोऽणुयोगोऽनुयोगो वेति। ठाणा० ३। अणु-पच्छाभावओ य थेवे य। बृ० प्र० ३३ अ। विचारः। सम० ५०। सूत्रस्यार्थेन सह सम्बन्धनम्, सूत्रस्यार्थप्रतिपादनरूपः। ठाणा० ३।
**अणुज्जंगी**-अनवद्याङ्गी, शिवादेवीविशेषणम्। उत्त० ४९६। श्रीमहावीरस्वामिनः सुता जमालेर्भार्या, प्रियदर्शनाऽपरनाम। उत्त० १५३।
**अणुज्जइज्जमाणाई**-एकं स्वरूपतोऽनृजूनि अपरं च तेषां कचित्कार्येऽनुपयोगात्केनचिदनृजूक्रियमाणानि। उत्त० ५४९।
**अणुज्जता**-ऋजुभावविरहितः। नि० चू० प्र० २८९ आ।
**अणुज्जा**-अनवद्याङ्गी, श्रीमहावीरस्वामिनो ज्येष्ठा भगिनी, सुदर्शनाऽपरनाम। उत्त० १५३। महावीरस्वामिनः पुत्रीनाम। आचा० ४२२।
**अणुज्झियत्तं**-वराकत्वम्। बृ० तृ० २ आ।
**अणुज्जुए** – अनृजुकः, कश्चिद्दजूकर्त्तुमशक्यतया। उत्त० ६५६।
**अणुज्जुकं**-अनृजुकम्, वक्रम्, अधर्मद्वारस्य नवमं नाम। प्रश्न० २६।
**अणुट्ठाणे**-अनुत्थाने। ठाणा० ३३०।
**अणुट्ठिएसु**-अनुत्थितेषु-श्रावकादिषु। आचा० २५६।
**अणुट्ठिया**-अनुत्थिता, निविष्टा। आव० ७२७।
**अणुट्ठिहंतो**-अनुत्तिष्ठन्तः। बृ० तृ० ४ अ।
**अणुण्णवण**-अनुज्ञापयति। ओघ० १९९।
**अणुण्णवणाजयणा** – वसत्याद्यनुज्ञापनदोषगुणाः। नि० चू० तृ० १२ आ।
**अणुण्णवेंति**-अनुज्ञापयन्ति। आव० ११७।
**अणुण्णासं**-नासिकाविनिर्गतस्वरानुगतम्। जं० प्र० ४०।



Jain Education International 2010_05  For Private & Personal Use Only  www.jainelibrary.org

**अणुण्णेत्ता**–अनुनीय–प्राप्य ध्यात्वा । सम० १२३ ।

**अणुतडियभेय**–अनुतटिकाभेदः, अवटतटभेदवद् यो भेदः । भग० २२४ ।

**अणुतडियाभेदे**–अनुतटिकाभेदः, इक्षुत्वगादिकः । प्रज्ञा० २६७ ।

**अणुत्तपत्तो**–लज्जनीय । नि० चू० प्र० २६६ आ ।

**अणुत्तरं**–अनुत्तरम् , सम्यक् । दश० १५९ । अनन्यसदृशः । आव० ६० । अनुत्तरं–सर्वसंयमस्थानोपरिवर्त्तिनं । उत्त० ३९३ । अनुत्तरां–सर्वलोकाकाशोपरिवर्त्तिनीमतिप्रधानां वा । उत्त० ३९३ ।

**अणुत्तर**–अनुत्तरम् , वृद्धिरहितम् । आचा० १४ ।

**अणुत्तरणवासो**-अनुत्तरणपाशः, आत्मनः पारतन्त्र्यहेतुतया पाशवत्पाशः, अनुत्तरणश्चासौ पाशश्च । उत्त० ४३ । अनुत्तरणवासः–न विद्यते उत्तरणं–पारगमनमस्मिन् सतीत्यनुत्तरणः, स चासौ वासश्च–अवस्थानम् । उत्त० ४३ ।

**अणुत्तरनाणी**–केवलज्ञानवान् । उत्त० २७० ।

**अणुत्तरधरे**–न विद्यते उत्तरमन्यत्प्रधानमेषामिति । उत्त० ३५७ ।

**अणुत्तरधरो**–अनुत्तरधरः, न विद्यते उत्तरं–अन्यत्प्रधानमेषामित्यनुत्तराः, ते च प्रक्रमात्प्रकर्षप्राप्ता ज्ञानादय एव गुणास्तान् धारयतीति । अनुत्तरान् गुणान् धारयतीति वा । उत्त० ३५७ ।

**अणुत्तरविमाणे**–नैषामन्यान्युत्तराणि विमानानि सन्ति इति अनुत्तरविमानानि । अनु० ९२ ।

**अणुत्तरे** – स्थित्यादिभिः सकलनरकज्येष्ठेऽप्रतिष्ठान इति । उत्त० ३९२ ।

**अणुत्तरो**–अनुत्तरः–न विद्यन्ते उत्तराः–प्रधानाः स्थितिप्रभावसुखद्युतिलेश्यादिभिरेभ्योऽन्ये देवाः । उत्त० ७०२ ।

**अणुत्तरो**–अनुत्तरः, कृष्णवासुदेवागमनम् । आव० १६३ । अचल १ विजयभद्र २ बलदेवत्रयागमनम् । आव० १६३ ।

**अणुत्तरोववाइय**–अनत्तरोपपातिकम् । भग० २२२ ।

**अणुत्तरोववाइया**–अनुत्तरोपपातिकाः । प्रज्ञा० ६९ ।

**अणुदिन्नं**–( अनुदीर्णम् ) । भग० ५८ ।

**अणुदिसा**–अनुदिशः, प्रतिदिशः । दश० २०१ । एकप्रदेशा अनुत्तराः ( दिक्कोणाः ) । ठाणा० १३३ ।

**अणुद्दिट्ठो**–अनुद्दिष्टः,यावन्तिकादिभेदवर्जितः । प्रश्न० १०८ ।

**अणुद्धरी**–अनुद्धरी, आत्मदोषोपसंहारविषये द्वारवत्यामर्हमित्रश्रेष्ठिभार्या । आव० ७१४ ।

**अणुद्धुअ** – अनुद्धूताम् , आनुरूप्येण यथामार्दङ्गिकविधि उद्धूता–वादनार्थमुत्क्षिप्ता । जं० प्र० १९४ ।

**अणुधम्मो**–अनुधर्मः । सूत्र० ३९९ ।

**अणुनई**–अनुनदि, नदीं नदीं प्रति । आव० ४५३ ।

**अणुनवनं**–अनुज्ञातम् । ओघ० १६० ।

**अणुनाओ**–अनुज्ञातः । ओघ० २१५ ।

**अणुनासं**–सानुनासिकं नासिकाकृतस्वरम् । ठाणा० ३९६ ।

**अणुन्नया**–अनुन्नया–नोर्ध्वमुखा । व्य० द्वि० २३७ आ ।

**अणुन्नवणा**–अनुज्ञापना, वन्दनके द्वितीयं स्थानम् । आव० ५४८ ।

**अणुन्नविय** – अनुज्ञापितः । आचा० ४२६ । अनुज्ञाप्य–याचित्वा । आचा० ३३८ ।

**अणुन्नवेमाण** – तत्स्वजनादींस्तत्परिष्ठापनायानुज्ञापयन्तः । ठाणा० ३५४ ।

**अणुन्ना**–अनुज्ञा, अनुमोदनम् । सूत्र० ३२९ । सूत्रार्थयोरन्यप्रदानम् । व्य० प्र० २६ अ । अधिकारदानं । ठाणा० १३९ ।

**अणुन्नायं**–अनुज्ञातम् , भोग्यतयैव वितीर्णम् । प्रश्न० १०२ ।

**अणुपभु** – जुवराया, सेणावति । नि० चू० प्र० १७४ आ । सेनाधिपतिः । बृ० प्र० ९०आ ।

**अणुपरियन्ति**–अनुपरियन्ति, सातत्येन पर्यटन्ति । उत्त० २९६ ।

**अणुपरिवट्टइ** – अनुपरिवर्त्तयते, आत्मनश्चावयते । सूर्य० १०७ ।

**अणुपरिवट्टिय** – अनुपरिवर्त्य, प्रादक्षिण्येन परिभ्रम्य । जीवा० ३७५, ३९९ ।

**अणुपरिहारी**–जतो जतो परिहारी गच्छति ततो ततो अणुपिट्ठतो गच्छति । अणु–थोवं पडिलेहणादि साहेज्जं करेतीति । नि० चू० तृ० १३२ आ ।

**अणुपविट्ठे**-अनुप्रविष्टः–तदुदयवर्ती । ठाणा० २१९ ।

**अणुपस्सओ**–अनुपश्यतः–पर्यालोचयतः । उत्त० ३१० ।

**अणुपात्तं**–कम्मं ण कारविज्जतित्ति । नि० चू० द्वि० १०६ अ ।

**अणुपालइत्ता**–अनुपाल्य–सततमासेव्य । उत्त० ५७२ ।



Jain Education International 2010_05    For Private & Personal Use Only    www.jainelibrary.org

**अणुपालणा**-अनुपालना, अनु० विशुद्धिः, प्रत्याख्यान-शुद्धयाः पञ्चमो भेदः । आव० ८४७ ।

**अणुपालणासुद्धं**-अनुपालनाशुद्धं-कान्तारादिषु न भग्नं यत्प्रत्याख्यानम् । ठाणा० ३४९ ।

**अणुपालियं**-अनुपालितं, पूर्वकालसाधुभिः पालितत्वाद्विवक्षितसाधुभिश्चानु-पश्चात्पालितमिति । प्रश्न० ११३ ।

**अणुपालिया**-आत्मसंयमानुकूलतया पालिता । ठाणा० ४४० ।

**अणुपालेइ**-अनुपालयति । भग० १२१ ।

**अणुपालेमि** अनुपालियामि, पौनःपुन्यकरणेन । आव० ७६१ ।

**अणुपिट्ठिं**-आनुपूर्व्या । सम० ६८ ।

**अणुपुव्वसो**अनुपूर्वतः, क्रमेण । उत्त० २१२ । आनुपूर्व्या० क्रमेण । उत्त० ५१८ ।

**अणुपुव्वि**-अनुपूर्वी, मूलादिपरिपाटी । जं० प्र० २९ । शास्त्रीयोपक्रमभेदः । आचा० ३ ।

**अणुपुव्विविहारीणं** -- अनुपूर्वविहारिणां-प्रतिपालितदीर्घसंयमानां शास्त्रार्थग्रहणप्रतिपादनोत्तरकालमवसीदत् संयमाध्ययनाध्यापनक्रियाणां निष्पादितशिष्याणामुत्सर्गतः द्वादशसंवत्सरसंलेखनाक्रमसंलिखितदेहानां । आचा० २६० ।

**अणुपुव्वेणं**-आनुपूर्व्या-यथेष्टकालावश्यकक्रियारूपया चतुर्थषष्ठाचाम्लादिकया । आचा० २८४ । अनुक्रमेण-परिपाट्या यौगपद्येन । आचा० २४१ ।

**अणुपुव्वो**-अनुपूर्वः, पूर्वस्याः पूर्वस्या अनु । जीवा० २७० ।

**अणुपेहा**-अनुप्रेक्षा, अनु-पश्चाद्भावे प्रेक्षा प्रेक्षा, स्मृतिः, ध्यानाद्भ्रष्टस्य चित्तचेष्टा । आचा० ५८३ ।

**अणुपेहे**-अनुगुणनं करोति । ओघ० ८४ ।

**अणुप्प**-अनर्प्यः-अनर्पणीयः, अढौकनीयः । ठाणा० ४६५ ।

**अणुप्पगंथे**- अनूरूपत्तया-औचित्येन विरतेर्नत्वपुण्योदयादणुरपि वा-सूक्ष्मोऽप्यल्पोऽपि प्रगतो ग्रन्थो-धनादिर्यस्य यस्माद्वा । ठाणा० ४६५ ।

**अणुप्पयाउं**-अनुप्रदातुं-परंपरकेण प्रदातुम् । व्य० प्र० २१७ आ ।

**अणुप्पवाए**-अनूप्रवादः पूर्वविशेषः । उत्त० १६३, विशे० ९६१ ।

**अणुप्पवादपुव्वं**-अनुप्रवादपूर्वम् । आव० ३१६ ।

**अणुप्पविसे**-अनुप्रविशेत्, मनसि लब्धास्पदो भवेत् । उत्त० ९९ ।

**अणुप्पसूयाइं**-अनुप्रसूता-आश्रिता । आचा० ३४८ ।

**अणुप्पियं** अनुमतम् । बृ० द्वि० ३ अ ।

**अणुप्पेच्छा**-अविह्वला । उप० मा० १४० ।

**अणुप्पेह**-- धर्म्मध्यानस्य पश्चात्प्रेक्षणानि-पर्यालोचनान्यनूप्रेक्षा । भग० ९२६ ।

**अणुप्पेहा**-मनसा । बृ० द्वि० ५४ आ । अनुप्रेक्षा, अर्हद्गुणानां मुहुर्मुहुः सततमनूचिन्तना । आव० ७८६ । यो मनसा परिवर्त्तयति, न वाचा । दश० ३२ । ध्यानोपरमकालभाविनी अनित्यत्वाद्यालोचनारूपा । आव० ५९० । सूत्रार्थानुस्मरणं ध्यानस्य पश्चात् पर्यालोचनानि, भावना । ठाणा० १९० । सूत्रवदर्थेऽपि सम्भवति विस्मरणमतः सोऽपि परिभावनीय इत्यनुप्रेक्षणं, चिन्तनिका । ठाणा० ३४९ । ग्रंथार्थयोः चिन्तनम् । ओघ० १८९ ।

**अणुफासे** अनुस्पर्शः, अनुभावः । दश० १९८ ।

**अणुफासो**-अणुभत्रो । दश० चू० ९६ ।

**अणुबंध** अनुबन्धः, निरन्तरम् । ओघ० १०८ । सन्तानभावेन प्रवृत्तिः । जं० प्र० १२५ ।

**अणुबंधो**- विवक्षितपर्यायेणाव्यवच्छिन्नेनावस्थानम् । भग० ८०८ । सातत्येन भवनं तन्मरणानाम् । उत्त० २३९ ।

**अणुबद्धं**-अनुबद्धम् सन्ततम् । आव० २२८ । ठाणा० ४३० ।

**अणुबद्धरोसपसरो**-अनुबद्धः-सन्ततः, कोऽर्थ ?-अव्यवच्छिन्नो रोषस्य-क्रोधस्य प्रसरो-विस्तारोऽस्येति अनुबद्धरोषप्रसरः । उत्त० ७११ ।

**अणुबद्धा**-सन्ततमालिंगिता । सम० १२६ ।

**अणुबलं**-अनुबलम् । उत्त० १७८ ।

**अणुब्भडो**-अनुद्भटः, अनुल्बणः । जीवा० २७५ । उत्त० ५८७ ।

**अणुभवणसण्णा**-अनुभवनसंज्ञाः, आहाराद्याः । आचा० १२ ।

**अनुभवो**-अनुभवः, स्वेन स्वेन रूपेण प्रकृतिनां विपाकतो वेदनानुभवः । विशे० १००६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अणुभाग** – अनुभागः, आयुर्द्रव्याणामेव विपाकः। भग० २८०। अचिन्त्या शक्तिर्वैक्रियकरणादिका। ठाणा० ६९, १४४।

**अणुभागकम्मे** – अनुभागकर्म-कर्मप्रदेशानां संवेद्यमानताविषयो रसस्तद्रूपं कर्म। भग० ६५।

**अणुभागो**–अनुभागः, विशिष्टवैक्रियादिकरणविषयाऽचिन्त्या शक्तिः। जीवा० १०९। सामर्थ्यम्। प्रज्ञा० ८८।

**अणुभावकम्मे**–यथाबद्धरसो वेद्यते तदनुभावतो वेद्यं कर्मानुभावकर्मेति। ठाणा० ६६।

**अणुभावनामनिहत्ताउए** – अनुभावनामनिधत्तायुः–अनुभावः–प्रकर्षप्राप्तो विपाकः, तत्प्रधानं नाम, यद्यस्मिन् भवे तीव्रविपाकं नामकर्मानुभूयते त(य)था नारकायुषि अशुभवर्णगन्धरसस्पर्शोपघातानादेयदुःस्वरायशःकीर्त्यादिनामानि तदनुभावनाम तेन सह निधत्तमायुरनुभावनामनिधत्तायुः। प्रज्ञा० २१८।

**अणुभावे**–अनुभावः, विपाको रसविशेषः। भग० ३५। तीव्रतमदुःखादिः। आव० ४९६। अनुभावः। सूर्य० २७९। विपाक उदयो रस इत्यर्थः। ठाणा० ४१४।

**अणुभावो**–अनुभावः, माहात्म्यम्। सूत्र० १२६। विपाकः। प्रज्ञा० २१८। स्वभावः, स्वरूपम्। जं० प्र० २९९। तीव्रादिभेदो रसः। सम० १०। शापानुग्रहसामर्थ्यम्। उत्त० ३६५। प्रभावः। जं० प्र० २४६। रसः, विपाकः। विशे० ५६५। कारणम्। जीवा० ३३९। विपाकोदयः। जीवा० १३०। सामर्थ्यादिलक्षणः। आव० ५९६। विपाकः। आव० ५९८। रसः। उत्त० २३०।

**अणुभासइ**–अणुभाषते। आव० ३११।

**अणुभासणा**–अनुभाषणा, प्रत्याख्यानशुद्धिः। आव० ८४७।

**अणुभासमाण**–अनुभाषमाण। विशे० १००५।

**अणुमए**–अनुमतम्, मानितम्। भग० १२२। कार्य्यव्याघातस्य पश्चादपि मतः। भग० ४६८।

**अणुमओ**–अनुमतः, अभिष्टो मोक्षाङ्गता। आव० ३२६। अभिप्रेता। बृ० प्र० २८९ आ।

**अणुमगा**–शीघ्रम्। (आउ०)

**अणुमतं**–अनुमतं, वैगुण्यदर्शनस्यापि पश्चान्मतम्। औप० ९६।

**अणुमन्ना**–अनुमतिः। बृ० तृ० १२८ अ।

**अणुमयं**–अनुमतम्, अभिरुचितम्। ओघ० ६४। अनुमतः–सम्मतः। जीवा० २७६।

**अणुमया**–अनुमता, अनुज्ञाता। प्रज्ञा० २५७। विप्रियदर्शनस्य पश्चादपि मता। विपा० ४२।

**अणुमहत्तरो** – मूलमहत्तरे असण्णिहिते जो पुच्छिज्जो धुरे ठायति सो। नि० चू० प्र० १५८ आ।

**अणुमहयरो**–मूलमहत्तराभावे प्रष्टव्यः पुरःस्थानश्च। बृ० द्वि० १९० आ।

**अणुमाणं**–अनुमानम्, स्वार्थम्। आव० ४२७। दृष्टान्तः। दश० १३०, १२६।

**अणुमाणइत्ता**–लघुतरापराधनिवेदनेन मृदुदण्डादित्वमाचार्यस्याकलय्य यदालोचनम्। भग० ९१९। अनुमानं कृत्वा। ठाणा० ४८४।

**अणुमाणे**–अनुमानम्, अनु–लिङ्गग्रहणसम्बन्धस्मरणादेः पश्चान्मीयतेऽनेनेत्यनुमानम्। भग० २२२। अन्विति–लिगदर्शनसम्बन्धानुस्मरणयोः पश्चान्मानं – ज्ञानमनुमानम्। ठाणा० २५४।

**अणुमाणेउं** – अनुमान्य, सम्यक् क्षमयित्वा। व्य० प्र० २५४ अ।

**अणुमोदणे**–साइज्जणाभेओ। नि० चू० प्र० १०३ आ।

**अणुम्मुअंतो**–अनुन्मुञ्चन्, अपरित्यजन्। आव० ४०७।

**अणुयत्तंतं**–अनुवर्त्तयन्। आव० ३०५।

**अणुया**–अणुकाः। दश० १९३।

**अणुयाणं**–रथयात्रा। बृ० तृ० ६१ आ। पडिमातिमहिमा। नि० चू० प्र० २३९ आ।

**अणुयोगं**–अनुयोगो, व्याख्यानं विधिप्रतिषेधाभ्यामर्थप्ररूपणम्। विशे० २।

**अणुरंगा**–गड्डीए। नि० चू० प्र० ३२४ अ। घंसिका, यानविशेषः। बृ० द्वि० १२५ आ।

**अणुरंगिणी**–अनुरङ्गिनी, अनुरज्यते–अनुकारं विदधातीत्येवंशीला। जं० प्र० ५१८। सूर्य० १३६।

**अणुरंगो**–घंसिओ। नि० चू० तृ० ३७ आ।

**अणुरत्ता**–अनुरागः – भावतः प्रतिबन्धः। उत्त० ३९४। आन्तरप्रतियोगतः परस्परस्नेहवन्तौ। उत्त० ५२१। अनुरक्ताः–सततं प्रतिबद्धाः। उत्त० ७०८।

**अणुराओ**–अनुरागः। आव० ३०४।

**अणुरागयं**–अन्वागतम्, अनुरूपमागमनम्। भग० ११७

**अणुराधा**–अनुराधा, नक्षत्रविशेषः। सूर्य १३०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अणुराहा**–नक्षत्रविशेषः । ठाणा० ७७ ।

**अणुलिंपइ**–अनुलिम्पति । जीवा० २५४ ।

**अणुलिंपणं**–अनुलिम्पनं–सकृल्लिप्ताया भूमेः पुनर्लेपनम् । प्रश्न० १२७ ।

**अणुलिहंतं** – अनुलिखत्, अभिलङ्घयत् । सूर्य० २६४, जीवा० ३७९, जं० प्र० २९७ । अनुलिखत्–अतिलङ्घयत् । प्रज्ञा० ९९ ।

**अणुलिहंति**–अनुलिखति, अभिलङ्घयति । जीवा० २०९ ।

**अणुलेवणं** – अनुलेपनम्, सकृल्लिप्तस्य पुनः पुनरुपलेपनम् । प्रज्ञा० ८० ।

**अणुलोमं**–अनुलोमम्, अनुकूलमनुगुणं वा । जीवा० ३ । अनुकूलकरणम्० । ठाणा० ३७६ ।

**अणुलोमछाया**–अनुलोमच्छाया, सूर्यच्छायाविशेषः । सूर्य० ९५ ।

**अणुलोमणा**–अनुलोमना–प्रज्ञापना । बृ० तृ० १२३ आ ।

**अणुलोमवाउवेगो** – अनुलोमवायुवेगः । अनुलोमः–अनुकूलो वायुवेगः, शरीरान्तवर्त्तिवातजवो यस्य सः । वायुगुल्मरहितोदरमध्यप्रदेशः । जीवा० २७७ ।

**अणुलोमिअ**–अनुलोमम्, मनोहारि । दश० २२३ ।

**अणुलोमियं**–कडुगफरिसादिदोसवज्जियं जं भासमाणो अभासओ लभइ । दश० चू० ११५ ।

**अणुल्लय**–द्वीन्द्रियविशेषः । उत्त० ६९५ ।

**अणुल्लसिओ**–असिच्यमानः । आव० ६२१ ।

**अणुल्लावे**–अनुलाप–पौनःपुन्यभाषणम् । ठाणा० ४०८ ।

**अणुवउत्तो** – अनुपयुक्तः, सार्धुं प्रत्यदत्तावधानः । ओघ० २३ ।

**अणुवकयं**–अनुपकृतम्, परैरवर्तितम् । आव० ५९७ ।

**अणुवघाइए** – अनुपघातिके–उपघातश्च यत्र न भवति उड्डाहादि तस्मिन् । ओघ० १२२ ।

**अणुवघाइया** – आचारप्रकल्पस्य षड्विंशतितमो भेदः । सम० ४७ ।

**अणुवचओ** – अनुपचयः, अनुपचीयमानता, अनुपादानमिति । उत्त० ६ ।

**अणुवट्टंते** – अनुपतिष्ठति, अरुह्यमाणे अरुज्झंते । ओघ० १४५ ।

**अणुवट्टावणीया**–अनुवर्तनीया । ओघ० १३४ ।

**अणुवट्टेति**–करोति । भग० ३२० ।

**अणुवत्त**–अनुवृत्तः–भूयः प्रवृत्तो वारद्वयं प्रवृत्तः । व्य० द्वि० ४४१ अ ।

**अणुवत्तइ**–अनुवर्त्तते । आव० ५६१ ।

**अणुवत्ति**–अनुवृत्तिः–सर्वेषु अर्थेषु अप्रतिकूलता । बृ० प्र० ४३ अ ।

**अणुवत्तिओ**–अनुवर्त्तितः । आव० १११ । परिगृहीतो महाजनेन । व्य० द्वि० ४४१ आ ।

**अणुवत्तिया**–परिवेष्टिता । नि० चू० प्र० १८४ आ ।

**अणुवत्ती**–अनुवृत्तिः । आव० ५१५ ।

**अणुवत्ते**–अनुवर्तमानः–साम्प्रतकालभावी । दश० ६२ ।

**अणुवदिट्ठं** – जं नो आयरियपरंपरागयं मुत्कलव्याकरणवत् । नि० चू० द्वि० २३ आ ।

**अणुवदेसा**–अनुपदेशः–गुरुणाऽनुक्तः । ओघ० १५१ ।

**अणुवभुज्जो** – संसक्तासवपिशितादिराहारः, शुषिरतृणवल्कलादिरुपधिः । बृ० तृ० ४७ अ ।

**अणुवमा**–अनुपमा । जीवा० २७८ ।

**अणुवयमाणा**–अनुवदतः–अनु–पश्चाद्वदतः पृष्ठतो वदतोऽन्येन वा मिथ्यादृष्ट्यादिना कुशीला इत्येवमुक्तः । आचा० २५१ ।

**अणुवयारं**–निठुरं । नि० चू० प्र० २७८ अ ।

**अणुवरय**–अनुपरतम्, अविरतम् । भग० १८१ ।

**अणुवरयकाइया** – अनुपरतकायिकी–देशतः सर्वतो वा सावद्ययोगाद्विरतः नोपरतोऽनुपरतः कुतश्चिदप्यनिवृत्त इत्यर्थः तस्य कायिकी । प्रज्ञा० ४३६ ।

**अणुवरयकायकिरिया**–अनुपरतस्य–अविरतस्य सावद्यात् मिथ्यादृष्टेः सम्यग्दृष्टेर्वा कायक्रिया–उत्क्षेपादिलक्षणा कर्म्मबन्धनिबन्धनम् । ठाणा० ४१ ।

**अणुवसंते**–अनुपशान्तः, उदयावस्थः । प्रज्ञा० २९१ ।

**अणुवसंपज्जमाणगती** – अनुपसम्पद्यमानगतिः, परस्परमुपष्टम्भरहितानां पथि गमनं, विहायोगतेश्चतुर्थो भेदः । प्रज्ञा० ३२७ ।

**अणुवसु**–अनुवसु–सरागः श्रावकश्च । आचा० २४० ।

**अणुवाए**–अनुपातः, अनुसारः । प्रज्ञा० १४४ । अनुगमनं–अनुरागः उत्त० ६३१ ।

**अणुवायगइए**–अनुपातगतिः–अनुसारगतिः । सूर्य० १६



Jain Education International 2010_05    For Private & Personal Use Only    www.jainelibrary.org

**अणुवालए**-गोशालकश्रावकविशेषः । भग० ३७० ।
**अणुवासग**-अनुपासकः मिथ्यादृष्टिः । नि० चू० द्वि० २५ अ ।
**अणुवासणा**-अनुवासना, अपानेन जठरे तलप्रवेशनम् । विपा० ४१ ।
**अणुवित्तिबुद्धि**-अनुवृत्तिबुद्धि-अनुगताकारबुद्धिः । विशे० ८९८ ।
**अणुविद्धं**-अनुविद्धं-मिश्राः व्याप्ताः । जं० प्र० १९३ ।
**अणुवीइ**-अनुवीचि, आनुकूल्यम्, मैथुनाभिलाषम् । सूत्र० १११ । अनुचिन्त्य, विचार्य सम्यग्निश्चित्य । आचा० ३८६ । आलोच्य । दश० २२१ ।
**अणुवीइनिट्ठाभासि** - अनुविचिन्त्य निष्ठाभाषी-विचार्य निश्चितभाषकः । आचा० ३९२ ।
**अणुवीइभासए**-अनुविचिन्त्यभाषकः, पर्यालोच्य भाषकः, द्वितीयव्रतस्य द्वितीया भावना । आव० ६५८ ।
**अणुवीति**-चितेऊण । नि० चू० प्र० १०० अ ।
**अणुवीयि**-पुव्वि बुद्धीए अणुचितियं । दश० चू० ११५ ।
**अणुवूहेसा**-अनवंहयिता-परेण स्वस्य क्रियमाणस्य तस्यानुमोदयिता, तद्भावे हर्षकारी । ठाणा० ३८९ ।
**अणुवेलंधर**-लवणसमुद्रशिखारक्षकः । सम० ३३ ।
**अणुवेलंधरराया**-अनुवेलन्धरराजा, भुजगेन्द्रः । जीवा० ३१२ ।
**अणुवेलंधरनागरातीणं**-अनुवेलंधरनागराजा-नागजातिविशेषः । ठाणा० २२८ ।
**अणुवेहसलागा**- शस्त्रकोशविशेषः । नि० चू० द्वि० १८ अ ।
**अणुव्वट्टे**-अनुद्वर्त्तयन, तत्रस्थ एव । आव० ३३९ ।
**अणुव्वणो**-अगर्वितः । बृ० तृ० ४ अ ।
**अणुव्वतं**-अनुव्रतम् । आव० ८२१ ।
**अणुव्वत्ता**-अनूव्रतानि-अनू-महाव्रतकथनस्य पश्चात्तदप्रतिपत्तौ यानि व्रतानि कथ्यन्ते तानि, अथवा सर्वविरतापेक्षया अणोः-लघोर्गुणिनो व्रतानि । ठाणा० १९१ ।
**अणुव्वय** - अनूवर्तिनी, परिणामिकीबुद्धिदृष्टान्ते भार्या-आव० ४३६ । अन्विति-कुलानुरूपं व्रतम्-आरोऽस्या अनुव्रता पतिव्रता इति, वयोऽनुरूपा वा । उत्त० ४७६ । अनुव्रतं-स्थूलप्राणातिपातनिवृत्तिः दश० १९२ ।
**अणुव्हाणं**-अनाव्या(स्या)नं-स्निग्धम् । ओघ० १७१ ।

**अणुव्विग्गो**-अनुद्विग्नः-प्रशान्तः परीषहादिभ्योऽबिभ्यत् । दश० १६३, १७९ ।
**अणुसंचरे** - अनुसञ्चरेः, अन्विति-लक्षीकृत्य सञ्चरेः-त्वं सम्यक् संयमाध्वनि यायाः । उत्त० ४४६ ।
**अणुसंसरइ**-अनुसंसरति, दिग्विदिशां गमनं भावदिगागमनं वा स्मरति वा । आचा० २० ।
**अणुसजइ**-अनुसजति, सन्तानेनानुवर्त्तते । जीवा० २८४ ।
**अणुसज्जणा**-अनुसर्जना । आव० १५७ । अव्यवच्छेदं करोति । उत्त० ५८४ । अनुवर्त्तना । बृ० प्र० २८९ अ ।
**अणुसज्जमाणा**-अनुसजतः, सन्तानेनानुवर्तमाना । जं० प्र० ३५५ ।
**अणुसज्जित्था**-अनुसक्तवन्तः, पूर्वकालात्कालान्तरमनुवृत्तवन्तः । भग० २७८ ।
**अणुसज्जित्था** - अनुसक्तवन्तः, कालात्कालान्तरमनुवृत्तवन्तः सन्ततिभावेन भवन्ति स्म । जं० प्र० १२८ ।
**अणुसट्ठं**-अनुशिष्टं-उत्कलनम् । व्य० प्र० १९९ अ ।
**अणुसट्ठि** - अनुशासनम्-अनुशास्तिः सद्गुणोत्कीर्तनेनोपबृंहणम् । दश० ४६ । धम्मकहा । नि० चू० द्वि० १७० अ ।
**अणुसट्ठी**-उवदेसपदाणं, थुतिकरणं वा । नि० चू० तृ० १३४ आ । सद्भावपुरस्सरं प्रज्ञापना । बृ० द्वि० ८७आ । उवदेसो । नि० चू० प्र० २०७ आ । ५१ अ । इहलोकापायदर्शनम् । बृ० द्वि० १०३ अ । अनुशालनम् । ठाणा० १५५ ।
**अणुसम**-अनुसमा-अनुरूपा, अविषमा । ठाणा० ४५० ।
**अणुसमयं**-समयमाश्रित्य । उत्त० २३१ । अनुसमयं प्रतिक्षणम् । सूर्य० ८० । भग० २० । सततम् । उत्त० ३३९ ।
**अणुसया** -अनुशयः-पश्चात्तापः । जं० प्र० १२३ ।
**अणुसारं**-अनुस्मारवदननुस्वारम् । विशे० २७४ । अनक्षरमपि यदनुस्वारवदुच्चार्यते हुंकारकरगादिवत् तत् । आव० २५ । अलाक्षणिकः सुखमुखोच्चारणार्थः । दश० ८६ ।
**अणुसासणाणि** - अनूशासनानि-दुःस्थस्य सुस्थतासंपादनानि । सम० ११८ । शिक्षणम् । उत्त० २६७ ।
**अणुसासम्मि**-अनूशासित । उत्त० ५५२ ।
**अणुसासिज्जंतो**-अनूशास्यमानः, तत्र तत्र चोद्यमानः । दश० २५६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अणुसिट्ठी**-अनुशासनमनुशास्तिः-सद्गुणोत्कीर्त्तनेनोपबृंहणं सा विधेयेति यत्रोपदिश्यते सा। ठाणा० २५३। **अनुशिष्टिः**-उपदेशप्रदानम्। व्य० प्र० ११५ अ। शिक्षाम्। उत्त० ३२३। धर्मकथाम्। ओघ० ७३।

**अणुसूयगा** - अनुसूचकाः-नगराभ्यंतरे चारमुपलभन्ते, सर्वमनुसूचकेभ्यः कथयंति। व्य० प्र० १७० आ।

**अणुसूयत्तं**-अपरशरीराश्रितता, परनिश्रा। सूत्र० ३५७। अनुस्यूतत्वं-परनिश्रया कृम्यादित्वम्। सूत्र० ३५७।

**अणुसोयचारी** - अनुश्रोतश्चारि-प्रतिश्रयादारभ्य भिक्षाचारी। ठाणा० ३४२। नद्यादिप्रवाहगामी। ठाणा० २७२।

**अणुस्सासिय**-अनुच्छ्वसत्। दश० ११।

**अणुस्सियत्त**-अनुत्सिक्तत्वम्-अनुद्धतत्वम्। उत्त० ५९१।

**अणुस्सुयं**-अनुश्रुतम्-अवधारितम्। उत्त० २४७।

**अणुस्सुयत्तं**-अनुत्सुकत्वम्-विषयसुखं प्रति निःस्पृहत्वम्। उत्त० ५८६।

**अणूया**-अनूपः, सजलप्रदेशः। विशे० ७२७।

**अणेगचित्ते**-अनेकचित्तः, अनेकानि चित्तानि कृषिवाणिज्यावलगनादीनि यस्यासौ, खलुरवधारणे, संसारसुखाभिलाष्यनेकचित्त एव भवति। आचा० १६३। अनेकसंख्यानि चञ्चलतया चित्तानि-मनांसि यासां सा। उत्त० २९७।

**अणेगगुणा**-अनेकगुणाः-अनेकप्रकाराः। बृ० प्र० ७५ अ।

**अणेगतालाचराणुचरियं**-नानाविधप्रेक्षाचारिसेवितम्। भग० ५४४।

**अणेगदव्वो**-अनेकद्रव्यः। विशे० ४२४।

**अणेगपत्ती**-अनेकपत्नी। आव० ९५।

**अणेगरूवधुणा**-बहूनि वस्त्राणि एकीकृत्य धुनाति। ओघ० ११०।

**अणेगरूवधुणे** - अनेकरूपा चासौ सङ्ख्यात्रयातिक्रमणतो युगपदनेकवस्त्रग्रहणतो वा धूनना च प्रकम्पनात्मिका अनेकरूपधूनना। उत्त० ५४२।

**अणेगवासानउयं**-अनेकवर्षनयुतं, अनेकवर्षाणां-असङ्ख्येयवत्सराणां नयुतं-सङ्ख्याविशेषम्। उत्त० २७७।

**अणेगावाती**-परस्परविलक्षणा एव भावाः इति वादिनः। ठाणा० ४२५।

**अणेलिसं**-अनीदृशं-अनन्यसदृशम्। आचा० ४२९।

**अणेव्वाणी** - जाहे ताणि सुरादीणि ण लब्भंति ताहे तेसिं अभावे परमं दुक्खं समुप्पज्जतित्ति, मोक्खऽभावो वा। दश० चू० ८८।

**अणेसणा**-अनेषणा-भिक्षादोषविशेषः। आव० ५७५।

**अणेसणिज्जं**-अनेषणीयम्-आधाकर्मादिदोषदुष्टम्। आचा० ३२१।

**अणोक्कंता**-अनुपक्रान्ता-अनिराकृता। औप० ३४।

**अणोग्घसिअ**-अनिर्माजनम्। जं० प्र० ५७।

**अणोज्जा**-अनवद्या, स्वामिदुहिता। आव० ३१२।

**अणोतप्पया**-अलज्जनीयता। बृ० प्र० ३०९ आ।

**अणोदरया**-अपारा (सं०)

**अणोमदंसी**-अवमं-हीनं मिथ्यादर्शनाविरत्यादि तद्विपर्यस्तमनवमं तद्द्रष्टुं शीलमस्येत्यनवमदर्शी, सम्यग्दर्शनज्ञानचारित्रवान्। आचा० १६४।

**अणोमाणं**-अपमानं अनादरकृतं न भवति। ओघ० १०३।

**अणोरपारं**-अनर्वाक्पारम्-विस्तीर्णस्वरूपम्। प्रश्न० ६२। अनाद्यपर्यवसितम्। आव० ६०१। अर्वाग्भागपरभागवर्जितमनाद्यनन्तम्। सूत्र० ४०३। अनर्वाक्पारमिव महत्त्वादनर्वाक्पारम्। प्रश्न० ५१। देशीवचनं, प्रचुरार्थे, आराद्भागपरभागरहिते। आव० ३४५। (भक्त०)

**अणोल्हविज्जंतो**-अविध्यापितः। आव० ३८४।

**अणोवणिहिआ** - अनौपनिधिकी-वक्ष्यमाणपूर्वानुपूर्व्यादिक्रमेणाविरचनं प्रयोजनं यस्या इति। अनु० ५२।

**अणोवमा**-अनुपमा। प्रज्ञा० ३६४।

**अणोवमाइ**-खाद्यविशेषः। जं० प्र० ११८।

**अणोहट्टं**-अजाजियं, कोंटलाति उवकारेण विरहियं। नि० चू० प्र० १८३ अ।

**अणोहंतरा**-संसारतरणासमर्थाः। आचा० १२३।

**अणोहट्टिए**-अनपघट्टकः, यो बलाद्धस्तादौ गृहीत्वा प्रवर्त्तमानं निवारयति सोऽपघट्टकस्तदभावात्। विपा० ५२।

**अणोहियं** - अविद्यमानजलौघिकामतिगहनत्वेनाविद्यमानोहां वा। भग० ६७२।

**अण्णउत्थिए** - अन्ययूथिकाः अन्ययूथं-विवक्षितसंघादपरः संघस्तदस्ति येषां तेऽन्ययूथिकाः तीर्थान्तरीयाः। भग० ९८। अन्यतीर्थिकाः। जीवा० १४३।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अण्णउत्थिया** – तच्चण्णियादि बंभणा खत्तिया गारत्था। नि० चू० द्वि०।

**अण्णओमुहो**-अन्यतोमुखः। आव० ६४०।

**अण्णओहुत्तं**-अन्यतोभूतम्। आव० २०५।

**अण्णगच्छेल्लय**-अन्यगच्छीयः। आव० ३२३।

**अण्णगिलायं**-अन्नग्लानः-पर्युषितमन्नं मया भोक्तव्यमित्येवं प्रतिपन्नाभिग्रहः। बृ० प्र० ३१२ अ।

**अण्णगिलायए**-अन्नग्लायकः। औप० ३९। बृ० प्र० ११२ आ।

**अण्णतित्थियपवत्ताणुजोगे**-अन्यतीर्थिकेभ्यः-कपिलादिभ्यः सकाशाद्यः प्रवृत्तः-स्वकीयाचारवस्तुतत्त्वानामनुयोगो-विचारः तत्पुरस्करणार्थः शास्त्रसंदर्भ इत्यर्थः सोऽन्यतीर्थिकप्रवृत्तानुयोगः। सम० ४९।

**अण्णतित्थिया** – रक्तपटादयः। नि० चू० प्र० ७६ अ। अन्यतीर्थिका – चरकपरिव्राजकशाक्याजीवकवृद्धश्रावकप्रभृतयः। नि० चू० प्र० १४७ आ।

**अण्णत्थ**-अन्यत्र, परिवर्जनार्थे। आव० ८५०।

**अण्णत्थे**-अन्वर्थे-अनुगतः संबद्धः परमैश्वर्यादिकोऽर्थो यत्र सः। विशे० २२।

**अण्णदत्तहरे**-अन्यदत्तहरः-अन्येभ्यो दत्तं-राजादिना वितीर्णं हरति अपान्तराल एवाच्छिनत्ति। उत्त० २७४। अन्यादत्तहरः-ग्रामनगरादिषु चौर्यकृत्। उत्त० २७४।

**अण्णमण्णघडत्ता**-अन्योऽन्यघटता, अन्योऽन्यं घटा-समुदायरचना यत्र तदन्योऽन्यघटं तद्भावस्तत्ता, जालिका। भग० २१५।

**अण्णवं**-अर्णवः-अर्णो-जलं विद्यते यत्रासावर्णवः। उत्त० २४१।

**अण्णसंभोइय**-अन्यसाम्भोगिकः। आव० ८४७।

**अण्णहम्मिणी**-परतीर्थिका अगारस्था अविरतिका। बृ० तृ० ४७ आ।

**अण्णाइट्ठसरीरं**-अन्याविष्टशरीरम्,व्यन्तराधिष्ठितशरीरम्। आव० ६३३।

**अण्णाइट्ठो**-अन्याविष्टः, परायत्तः, यक्षाविष्टो वा। उत्त० ११३। आविष्टः। अन्त २०।

**अण्णाइत्तो**-अपराद्धः। नि० चू० तृ० १०१ अ।

**अण्णाएसि**-अज्ञातैषी, अज्ञातो जातिश्रुतादिभिः एषति-उञ्छति पिण्डादीति। उत्त० १२४।

**अण्णाणं**-अज्ञानम्, चतुर्थः कुडङ्गः। आव० ८५६। एकविंशतितमः परीषहः, कर्मविपाकजाद्ज्ञानान्नोद्विजेत। आव० ६५७।

**अण्णाणदोसे**-अज्ञानदोषः। औप० ४४।

**अण्णाणिय**-अज्ञानिकः, कुत्सितं ज्ञानमस्यास्तीति। आव० ८१७।

**अण्णाणियवाई** – सप्तषष्टिभेदा अज्ञानवादिनः। सम० १११।

**अण्णाणो**-अज्ञानः, कुदृष्टिमोहितः। आव० ३४६।

**अण्णातचज्जा**-अज्ञातचर्या। आव० ८२२।

**अण्णातपिंडे**-अज्ञातपिण्डः, अन्तप्रान्तः, अज्ञातेभ्यो वा-पूर्वापरासंस्तुतेभ्यो वा पिण्डोऽज्ञातोञ्छवृत्त्या लब्धः। सूत्र० १६४।

**अण्णायं**-अज्ञातोञ्छं। बृ० द्वि० १८६ आ।

**अण्णाय**-अज्ञातम्, अनुमानतः अज्ञातम्। भग० १९७, २००।

**अण्णायया**-अज्ञानता, तपसोऽप्रकाशनम्। प्रश्न० १४६। अज्ञातता, तपस्यज्ञातता, योगसङ्ग्रहे सप्तमो योगः। आव० ६६४।

**अण्णावदेसो**-अदंसियभावो। नि० चू० प्र० ७२ आ।

**अण्णियपुत्तो**-अर्णिकापुत्रः। नि० चू० प्र० १९४ आ।

**अण्णिया** अर्णिका, दक्षिणमथुरायां वणिक्पुत्री। आव० ६८८।

**अण्णियापुत्ते**-अर्णिकापुत्रः। बृ० तृ० २३५ आ।

**अण्णोयत्ता**-ईषदवनता। व्य० द्वि० १२४ आ।

**अण्हयंति**-क्षरति (तं०)

**अण्हय**-आस्रवः, आ-अभिविधिना स्नौति-श्रवति कर्म यस्मात् स आश्रवः प्राणातिपातादिः। प्रश्न० २।

**अण्हयकरं**-आश्रवकरं। औप० ४२।

**अण्हयकरिं**-कर्माश्रवकरीं। आचा० ३८८।

**अण्हयकरे**-कर्माश्रवकारी। आचा० ४२५।

**अण्हाणं**-अस्नानम्। आव० १५४।

**अण्हायगो**-अस्नायकः। आव० ८३१।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अतज्जाय**-अतज्जातपारिस्थापनिकी, पारिस्थापनिक्या द्वितीयो भेदः । आव० ६१९ ।

**अतज्जायं**-अतज्जातीयं, भिन्नजातीयम् । आव० ६२३ ।

**अतडं**-अतीर्थं, अन्यतीर्थं वा । बृ० द्वि० ३१ अ । अतित्थं । नि० चू० तृ० १७ अ ।

**अतति**-सततमवगच्छति । ठाणा० १० ।

**अतन्त्रम्**-शास्त्रलक्षणरहितम् । आव० १२० ।

**अतरं**-तरीतुमशक्यं, विषयगणं भवं वा । उत्त० २९२ ।

**अतरंतं**-ग्लानम् । बृ० प्र० २२९ आ । अतरन्त-अतिग्लानः । ओघ० १८३ ।

**अतरंत**-ग्लानाः । ठाणा० १३८ ।

**अतरंते**-अतरत्-असहः । व्य० द्वि० ३७ अ ।

**अतरंतो**-अतरन्, अशक्नुवन् । आव० ८४७ । अशक्नुवन्-असमर्थः । दश० ८९ । अशक्नुवान् । आव० ६३७ । ग्लानः । ओघ० ४५ । यदाऽऽकाशव्यवस्थिताभ्यां पादाभ्यां न शक्नोति स्थातुं तदा । ओघ० ८४ । गिलाणो । नि० चू० प्र० ४३ अ, ३० आ, ३६० अ । ग्लानः । बृ० तृ० ५ आ, नि० चू० प्र० ८४ अ ।

**अतरण**-अतरणः, अशक्तः, ग्लानः । ओघ० ६७, बृ० प्र० २३४ आ ।

**अतरो**-ग्लानः । बृ० द्वि० २२४ अ । रत्नाकरः । बृ० प्र० ३७ अ ।

**अतसी**-अयसी, धान्यविशेषः । ठाणा० ४०६ । गुच्छविशेषः । प्रज्ञा० ३२ । धान्यविशेषः । नि० चू० प्र० १४४ आ ।

**अतहणाणे**-अतथाज्ञानम् । ठाणा० ४८१ ।

**अतारं**-अतारम्, तरितुमशक्यम् । भग० ८२ ।

**अतारिमा**-दुस्तराः । सूत्र० ८६ ।

**अतिः**-अतिशयवान् । ठाणा० ४७३ ।

**अतिंति**-प्रविशन्ति । नि० चू० प्र० २०३ अ ।

**अतिंतिणः**-अतिन्तिणः, अलाभेऽपि नेषद्यत्किञ्चनभाषी । दश० २३३ । अतिन्तिनः, न सकृत्किञ्चिदुक्तः सन्नसूयया भूयो भूयो वक्ता, प्रतिपूर्णः सूत्रादिना । दश० २५८ ।

**अतिअत्तिय** - आदियात्रिकाः, सार्थरक्षकाः । बृ० द्वि० १२५ अ ।

**अतिउच्चाओ**-अतिश्रान्तः, प्राघूर्णकादिः । ओघ० १८६ ।

**अतिउव्वरिए**-अत्युद्वरिते । ओघ० १३८ ।

**अतिकाए**-महोरगेन्द्रः । ठाणा० ८५ । अतिकायः-महोरगभेदविशेषः । प्रज्ञा० ७० ।

**अतिक्कमा** - अतिक्रमः-अतिलङ्घनं, विनाशः । आचा० १३५ । प्रतिश्रवणतो मर्यादाया उल्लंघनम् । व्य० प्र० ९० अ ।

**अतिक्कीलावासो** - अतिक्रीडावासः, सुस्थितलवणाधिपस्य भौमेयविहारविशेषः । जीवा० ३१५ ।

**अतिक्खतुंडो** - अतीक्ष्णतुण्डम्-अतीक्ष्णमुखम् । आव० ७६४ ।

**अतिक्कान्ता**-अतीता । आचा० १७८ ।

**अतिखद्धं**-प्रभूतम् । बृ० द्वि० १८७ अ ।

**अतिखद्ध** - गुरोरालोके भोक्तव्यम्, अतिप्रचूरं भक्षयेत । ओघ० १८२ ।

**अतिगए**-अतिगतः । आव० १७३ ।

**अतिगओ**-अतिगतः । दश० ४१ ।

**अतिगता**-प्रविष्टाः । बृ० द्वि० १८४ अ ।

**अतिगमणं**-प्रवेशः । बृ० द्वि० १६३ आ । अतिगमनं, प्रवेशनम् । बृ० प्र० २७५ आ ।

**अतिगुपिल**-अतिगूढम् । आव० २९६ ।

**अतिगुलिका**-(अइगुलिया)-कुक्कुसा । बृ० तृ० १९५ अ ।

**अतिघरं**-संजतिपडिस्सतो । नि० चू० प्र० २३७ आ ।

**अतिचारो**-व्यतिकमः स्खलनपर्यायः । तत्त्वा० ७-१८ ।

**अतिच्छिए**- अतिक्रान्तायाम् । ओघ० १५२ ।

**अतिजाति**-पविसति । नि० चू० प्र० ३४ आ ।

**अतिजाते**-समृद्धतरः । ठाणा० १८४ ।

**अतिज्जाणं**-अतियानम् । आव० ३६६ ।

**अतिज्जाहि**-अतियास्यति-प्रवेक्ष्यति । ठाणा० ४६३ ।

**अतिणिओ**-आनीतः । आव० २०४ ।

**अतिणीओ**-अतिनीतः, प्रापितः । आव० ८०० ।

**अतिणेउं**-प्रवेश्य । बृ० तृ० ७४ आ ।

**अतिण्णो**-ग्लानः । बृ० प्र० २८८ आ ।

**अतितणित**-आगच्छद्गच्छत् । नि० चू० प्र० १२० आ ।

**अतिताणकहा**-अतियानकथा-नगरादौ प्रवेशकथा । ठाणा० २१० ।

**अतिताणगिहाति**-अतियानगृहाणि-नगरादिप्रवेशे यानि गृहाणि । ठाणा० ८६ ।

**अतितेया**-अतितेजा, रात्रिनामविशेषः । सूर्य० १४७ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अतित्थ** – अतीर्थम्, तीर्थस्याभावोऽतीर्थम्, तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा। प्रज्ञा० १९।

**अतित्थसिद्धा**–अतीर्थे–तीर्थान्तरे साधुव्यवच्छेदे जातिस्मरणादिना प्राप्तापवर्गमार्गा मरुदेवीवत् सिद्धा अतीर्थसिद्धाः। ठाणा० ३३।

**अतित्थाविते**–प्रत्याख्यातः, निषिद्धः। नि० चू० प्र० १८५ अ।

**अतित्थिओ**–अस्तमितो। नि० चू० प्र० ३१२ अ। समाप्तेत्यर्थः। नि० चू० तृ० १२६ अ।

**अतिथिसंविभाग**–न्यायागतानां कल्पनीयानामन्नपानादीनां द्रव्याणां देशकालश्रद्धासत्कारक्रमोपेतं परया आत्मानुग्रहबुद्धया संयतेभ्यो दानम्। तत्त्वा० ७–१६।

**अतिद्दाति**–(अइए) प्रकरोति अतिगच्छति वेति। ठाणा० २९८।

**अतिधाडिय**–अतिधाडितः–भ्रामितः। प्रश्न० ५३।

**अतिपरिणामकं**–अपवादैकमतिः। बृ० प्र० १३२ अ।

**अतिपरिणामा**–अतिपरिणामाः, अतिव्याप्त्याऽपवाददृष्टयोऽतिपरिणामाः। विशे० ९३१। अतिव्याप्त्या परिणामो यथोक्तस्वरूपो यस्य सः। व्य० प्र० ७२ अ।

**अतिपात**–प्राणिनः विभ्रंशः। ठाणा० २१०।

**अतिपातनम्**–प्राणवता सह वियोजनम्। ठाणा० २६।

**अतिपासं** – अतिपार्श्वे–ऐरवतावसर्पिणीतीर्थंकरः। सम० १५३।

**अतिपुरुषः**–किंपुरुषभेदविशेषः। प्रज्ञा० ७०।

**अतिप्पणया** – अश्रुलालादिक्षरणकारणशोकानुत्पादनेन। भग० ३०५।

**अतिबलराया**–अतिबलराजा। आव० ११६।

**अतिमन्द्रः**–गम्भीरः। जं० प्र० ५२९।

**अतिम(मु)त्तकुमारो**–राजर्षिनाम। नि० चू० द्वि० २७ आ।

**अतिमुक्तकः**–षड्वर्षप्रव्रजितः। भग० ५८६। अतिमुक्तकः–नालबद्धपुष्पविशेषः। प्रज्ञा० ३७।

**अतिमुक्तकचन्द्र**–(अइमुत्तचंदए) पुष्पविशेषदलम्। भग० १३१।

**अतिमुत्तग**–अतिमुक्तकलता–लताविशेषः। जीवा० १८२।

**अतिमुत्ते**–अतिमुक्तः, कुमारश्रमणः। अन्त० ६। विजयराज्ञः श्रीदेव्याः सुतः। अन्त० २३।

**अतियाण**–अतियानं–नगरप्रवेशः। ठाणा० १७३। प्रवेशः। नि० चू० प्र० २७३ अ।

**अतियातो**–अतियातः, गतः। उत्त० ४८१।

**अतियारे**–अतिचारः–अतिचरणं ग्रहणतो व्रतस्यातिक्रमणम्। व्य० प्र० ९० अ।

**अतिराउले**–स्वामिकुलम्। प्रज्ञा० २५३।

**अतिरायितं**–अताडितम्। ओघ० ११०

**अतिरिच्छच्छिन्नं** – अतिरश्चीनच्छिन्नं–तिरश्चीनमपाटितं। आचा० ४०५।

**अतिरित्तं** – अतिरिक्तम्, कुक्षिपूराहारप्रमाणातिक्रान्तम्। प्रश्न० १५४।

**अतिरित्तसज्जासणिए**–अतिरिक्ता–अतिप्रमाणा शय्या–वसतिरासनानि च पीठकादीनि यस्य सन्ति सोऽतिरिक्तशय्यासनिकः। सम० ३७।

**अतिरित्ता**–घंघशाला। नि० चू० प्र० १०६ आ।

**अतिरूपः**–भूतभेदविशेषः। प्रज्ञा० ७०।

**अतिरेगं**–अतिरेकः, आधिक्यम्। भग० १८६। अतिरेकम्–अत्यर्थम्। ओघ० २२७।

**अतिलोलुपः**–अतीव रसलम्पटः। उत्त० ३४५।

**अतिवट्टमाणे** – अतिवर्तमानः–सर्वबाह्यात् सर्वाभ्यन्तरं प्रतिगच्छन्। सम० ९७।

**अतिवट्टिय**–अतिवर्त्तितः–भ्रामितः। प्रश्न० ५६।

**अतिवतित्ताणं** – अतिव्रज्य–अतिशयेन गत्वा। प्रज्ञा० ५१०।

**अतिवयती**–अतिव्रजति, बाहुल्येन गच्छति। जीवा० १२९।

**अतिवासा**–अतिवर्षा, अतिशयवर्षा वेगवद्वर्षणम्। भग० १९९।

**अतिवाहयति**–प्रेरयति, विनयति च। प्रश्न० ६४।

**अतिविज्जे**–अतिविद्यः, तत्त्वपरिच्छेत्री विद्या यस्य। आचा० १५९।

**अतिविद्वान्**–विदितागमसद्भावः सन्। आचा० १९२।

**अतिवेगो**–अतिवेगः–अतिक्रान्ताशेषवेगः। प्रश्न० ५१।

**अतिशुक्लो**–शुक्लशुक्लो। ठाणा० ३७४।

**अतिसेसे**–शेषाण्यतिक्रान्तं सातिशयम्। ठाणा० ३८४। अतिशेषाः–अतिशयाः। ठाणा० ३२९। अतिशेषे–अतिशये। उत्त० २८७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अतिसंधेइ**-अतिसन्दधाति । आव० ११० ।

**अतिसओ**-मनःपर्यवावधिज्ञाने अतिशयवन्त्यध्ययनानि च । नि० चू० प्र० १६ अ ।

**अतिसाहसिकः**-आत्मवत् प्रसाधितमखिलोकं यः प्रत्याचक्षीत सः । आचा० ५२ ।

**अतिसेसि**-स्फीतानि । ओघ० ९६ । मनःपर्यवायतिशयवान् । नि० चू० प्र० १६ अ । अतिसयदव्वा उक्कोसा । नि० चू० प्र० २०० अ ।

**अतिसेसी**-पात्रभूतः, प्रवचनाधारः । बृ० द्वि० २१ आ ।

**अतिस्निग्धमधुरम्**-वाण्यतिशयः । सम० ६३ ।

**अतिहिपूआ**-अतिथिपूजा आहारादिदानेन । दश० २४० ।

**अतिहिवणीमते**-भोजनकालोपस्थायी प्राघूर्णकोऽतिथिस्तद्दानप्रशंसनेन तद्भक्तात् यो लिप्सति सोऽतिथिमाश्रित्य वनीपकोऽतिथिवनीपकः । ठाणा० ३४१ ।

**अतिहिसंविभागो** – अतिथिसंविभागः – साधुसंविभागः । आव० ८३७ ।

**अतिही**-अतिथिः-भोजनार्थं भोजनकालोपस्थायी, आत्मार्थं निष्पादिताहारस्य गृहव्रतिनः मुख्यः साधुरेव । आव० ८३७ । निःस्पृहोऽभ्यागतः । आचा० ११५ । भोजनकालोपस्थाय्यपूर्वो वा । आचा० ३२५ । आगन्तुकम् । आचा० ३१४, भग० ५२० । विशिष्टतिथ्यभावे । बृ० प्र० ९० अ ।

**अतीओ**-आगतः । आव० १४५ ।

**अतीय**-अतीतम्-उत्तीर्णम् । भग० २९३ ।

**अतीति**-एति । उत्त० ३०२ ।

**अतीमि**-अटामि । आव० २२० ।

**अतीरंगमा**-अतीरङ्गमाः, तीरं गच्छन्तीति तीरङ्गमाः, न तीरङ्गमा अतीरङ्गमाः । आचा० १२४ ।

**अतुक्कोसे**-आत्मनः परेभ्यः सकाशाद्गुणैरुत्कर्षणम्-उत्कृष्टताभिधानम् । भग० ५७२ ।

**अतुरियं**-अत्वरितम्, कायिकत्वरारहितम् । भग० १४० । स्तिमितम् । ओघ० १०८ ।

**अतुरियगति**-अत्वरितगतिः-मन्दगतिः । उत्त० ७११ ।

**अतुरियभासी**-अत्वरितभाषी । आचा० ३९२ ।

**अतोया**-शीतोदकविरहिताः संयत्यः काञ्जिकेनाचामनकारिणी । बृ० द्वि० १८० अ ।

**अत्त**-आत्मा, सिद्धिः । उत्त० १०४ । आप्तः, अप्रतारकः । दश० ७५ ।

**अत्तए**-आत्मजः-पुत्रः । भग० ४६० ।

**अत्तगवेसए**-आत्मगवेषकः-आत्मानं गवेषयति-कथं मयाऽऽत्मा भवान्निस्तारणीयः इत्यन्वेषयते । उत्त० १०४ । आत्मानं-चारित्रात्मानं गवेषयति-मार्गयति । उत्त० १२० ।

**अत्तगवेसी** – आत्मगवेषी, आत्महितान्वेषणपरः । दश० २३७ ।

**अत्तचिंतओ** – अभ्युद्यतजिनकल्पयथालन्दकल्पानामेकतरं विहारं प्रतिपत्स्य इत्यात्मचिन्तकः, गणे वा तिष्ठन् न वहति तत्तिमन्येषां साधूनाम् । व्य० प्र० २३२ आ ।

**अत्तट्ठागुरुओ**-आत्मार्थगुरुः, आत्मार्थ एव जघन्यो गुरुः-पापप्रधानो यस्य सः । दश० १८७ ।

**अत्तट्ठियं**-स्वीकृतम् । आचा० ३२५ ।

**अत्तट्ठेति**-आत्मार्थयन्ति-परिभुञ्जते । बृ० द्वि० २७८ अ ।

**अत्तट्ठो**-अप्पणो अट्ठो भत्तादिउ । नि० चू० तृ० १३२ आ ।

**अत्तणा**-आत्मना कृतं । ठाणा० ४९२ ।

**अत्तणिस्सेसकारए**-आत्मनिःशेषकारकः, आत्मनो निःशेषमिति-शेषाभावं क्रमात् कर्मणः करोति-विधत्त इत्यात्मनिःशेषकारकः । उत्त० ३०५ ।

**अत्तणोउवन्नासं**-आत्मन उपन्यासः । दश० ५२ ।

**अत्तते**-आत्मजः । ठाणा० ५१६ ।

**अत्तत्ता** – आत्मता – जीवास्तितता स्वकृतकर्मपरिणतिर्वा । आचा० २३८ ।

**अत्तत्तासंवुड**-आत्मात्मसंवृतः आत्मन्यात्मना संवृतः-प्रतिसंलीनः । भग० १८४ ।

**अत्तदोस**-आत्मापराधम् । ठाणा० ४२४ ।

**अत्तदोसोवसंहार**-आत्मदोषोपसंहारः, योगसङ्ग्रहे एकविंशतितमो योगः । आव० ६६४ ।

**अत्तपण्हहा**-आत्मनि प्रश्नः आत्मप्रश्नस्तं हन्त्यात्मप्रश्नहा । उत्त० ४३४ ।

**अत्तभासिओ** – अण्णस्स संतियलाभं णो भुंजति । नि० चू० प्र० ३३४ अ ।

**अत्तमाया**-आत्मना आदाय । भग० २८६ ।

**अत्त(त)रंतस्स**-अशक्नुवतः ग्लानादेः । ओघ० १२७ ।

**अत्तलद्धिउ**-यदात्मना लभते तदाहारयति । ओव० १५० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अत्तवं**-आत्मवान् , सचेतनः। दश० २३६।

**अत्तसंपग्गहिए**-आत्मसम्प्रगृहीतः, आत्मैव सम्यक् प्रकर्षेण गृहीतो येन। दश० २५६।

**अत्तसमाहिए**-आत्मसमाहितः, आत्मना समाहितः ज्ञानदर्शनचारित्रोपयोगेन सदोपयुक्त इत्यर्थः। आत्मा वा समाहितोऽस्येत्यात्मसमाहितः। सदा शुभव्यापारवानित्यर्थः। आचा० १९१।

**अत्तसरिसो**-आत्मसदृशः, कुलानुरूपः। उत्त० ४०।

**अत्तहिय**-आत्महितः, मोक्षः। दश० १५०। मोक्खो। दश० चू० ६८।

**अत्ता**-आत्मा। आव० २९८। मोक्षः, संयमो वा। सूत्र० ९०। आत्ताः-गृहीताः, स्वीकृताः। ठाणा० ६३। आ-अभिविधिना त्रायन्ते-दुःखात् संरक्षन्ति सुखं चोत्पादयन्तीति आत्राः आप्ता वा-एकान्तहिताः। भग० ६५६। आर्ताः-क्षुत्तृड्भ्यां पीडिताः, आप्ताः-रागद्वेषरहिताः, आत्ताः-गीतार्थाः। बृ० द्वि० १४३ अ।

**अत्ताणओ**-अत्राणः। आव० २११।

**अत्ताणा**-यष्टिद्वितीयाः पान्थाः, कार्पटिकाः, संयता वा। बृ० द्वि० ८२ आ।

**अत्ताणो**-अत्राणः, अनर्थप्रतिघातवर्जितः। प्रश्न० १९। त्राणरहितः, अनर्थप्रतिघातकाभावात्। प्रश्न० ११। गवादिहारिणो। नि० चू० द्वि० ११ अ।

**अत्ताहिट्ठिय**-आत्माधिष्ठितः। ओघ० १५०।

**अत्ति(ति)मुत्तय**-अतिमुक्तकः, पुष्पप्रधानवनस्पतिविशेषः। जं० प्र० ४६।

**अत्तुक्कोसे**-आत्मोत्कर्षः। सम० ७१। आत्मगुणाभिमानः। ठाणा० २७५।

**अत्तेय**-आत्रेय ऋषिनाम। आव० ३७२।

**अत्तो**-आप्तः, मोक्षमार्गः, प्रक्षीणदोषः, सर्वज्ञः। सूत्र० १९५। रागादिरहितः। दश० १२८।

**अत्तोवणीए**-आत्मैवोपनीतः-तथा निवेदितो-नियोजितो यस्मिन्। ठाणा० २५९।

**अत्थं**-अस्त्रम् , नाराचादि क्षेप्यायुधम्। प्रश्न० ११६। अर्थः, विषयः। आव० २८३। अर्थः-ज्ञेयत्वात् सर्व्वमेव वस्तु, अभिधेयः। उत्त० ३६८। अभिधेयः, जीवादितत्त्वरूपो वा। उत्त० ३८५। अर्थ्यत इत्यर्थः-स्वर्गापवर्गादिः। उत्त० ४४८। व्याख्यानं। ठाणा० ५२। सूत्रस्य व्याख्यानं। ठाणा० १७०। विशे० ५९२।

**अत्थंगओ**-अत्थे पव्वए गतो, अचक्खुविसयपंथे वा गतो। दश० चू० ११३।

**अत्थंतमयम्मि**-अस्तमयति। उत्त० ४३५।

**अत्थंतरं**-अर्थान्तरम् , पृथग्भूतम्। आव० ६०१।

**अत्थंतरभावे**-अर्थान्तरभावः-भेदः। आव० ४७६।

**अत्थ**-अर्थः, शब्दादिविषयभावेन परिणतद्रव्यसमूहः। विशे० १६२।

**अत्थ**-(अत्थपुरिसे) अर्थपुरुषः, अर्थार्जनपरः। आव० २७७। अर्थः, निरुपमसुखरूपमोक्षः। दश० १८९। अर्थनम् , असम्प्राप्तकामभेदः, तदभिप्रायमात्रम्। दश० १९४। अस्तः, अस्तपर्वतः अदर्शनं वा। दश० २३२। आदेशः। बृ० प्र० २२ आ।

**अत्थअवगमो**-अर्थावगमः, अर्थपरिच्छेदः। दश० १२५।

**अत्थई**-गुच्छविशेषः। प्रज्ञा० ३२।

**अत्थकंखिया**-प्राप्तेऽप्यर्थेऽविच्छिन्नेच्छाः। भग० ६७१।

**अत्थकरो**-अर्थकरः, विद्यार्थकरणशीलः, भाण्डकरविशेष। आव० ४९९।

**अत्थकहा**-अर्थकथा, विद्या शिल्पमुपायोऽनिर्वेदः सञ्चयश्च दक्षत्वं साम दण्डो भेद उपप्रदानम्। दश० १०७।

**अत्थक्के**-अकाण्डः-अनवसरः। दश० ९३।

**अत्थगवेसणया**-अर्थगवेषणया, अर्थगवेषणनिमित्तम्। सूर्य० २९२।

**अत्थग्घं**-अस्ताघः। ओघ० ३२। अस्ताघम्। आव० ४१९।

**अत्थजुत्ती**-अर्थयुक्तिः, हेयेतररूपा अर्थयोजना। दश० १६२।

**अत्थजुत्तो**-अर्थयुक्तः, अर्थसारः, अपुनरुक्तो, महार्थत्तः। जीवा० २५५।

**अत्थदूसणं**-अर्थदूषणव्यसनम्। अर्थोत्पत्तिहेतवो ये सामाद्युपायचतुष्टयप्रभृतयः प्रकारास्तेषां दूषणम्। व्य० प्र० १५७ अ।

**अत्थधम्मगई**-अर्थश्च धर्मश्चार्थधर्मौ यदि वाऽर्थ्यते-हितार्थिभिरभिलष्यते, गतिः-गत्यर्थानां ज्ञानार्थतया हिताहितलक्षणा स्वरूपपरिच्छित्तिः। उत्त० ४७२।

**अत्थनिउरंगे**-संख्याविशेषः। सूर्य० ९१।

**अत्थनिउरे**-संख्याविशेषः। सूर्य० ९१।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अत्थनिकुरं**-अर्थनिकुरं, चतुरशीतिरर्थनिकुराङ्गशतसहस्राणि । जीवा० ३४५ ।

**अत्थनिकुरंगं** - अर्थनिकुराङ्गम् , चतुरशीतिर्नलिनशतसहस्राणि । जीवा० ३४५ ।

**अत्थपज्जाया**-अर्थपर्यायाः, ये तु तेषामेव वाचकशब्दानामभिधेयार्थस्यात्मभूता भेदाः, यथा कनकस्य कटककेयूरादयः, ते सर्वेऽप्यर्थपर्याया भण्यन्ते। विशे० २२८। ये तु तदेकदेशमभिदधति तेऽर्थैकदेशप्रतिपादकाः पर्याया अर्थपर्याया उच्यन्ते। विशे० २२७ ।

**अत्थपयं**-अर्थपदम् , युक्तिर्हेतुर्वा। सूत्र० १५३ ।

**अत्थपलिमंथो**-अर्थपरिमन्थः । विशे० ६२८ ।

**अत्थपिवासिय** - अप्राप्तार्थविषयसंजाततृष्णाः । भग० ६७१ ।

**अत्थपुहुत्त**-अर्थपृथक्त्व-श्रुताभिधेयोऽर्थः तस्मात् सूत्रं पृथक्, अर्थेन वा पृथु अर्थपृथु तद्भावः अर्थपृथुत्वं। आव० ६१। अर्थात् पृथक्त्वं कथञ्चिद्भेदो यस्य, विस्तीर्णमर्थपृथु। विशे० ४९२ ।

**अत्थमणमुहुत्तं** - अस्तमनमुहूर्त्तम् , अस्तोपलक्षितं मुहूर्तम् । जं० प्र० ४५९ ।

**अत्थमंत**-अर्थवताम् , प्रयोजनवताम् । भक्षणाद्यर्हाणाम् । जं० प्र० २४३ ।

**अत्थमंतमेत्त** - अस्तमयति मित्रे-सूर्ये, सायम् । जं० प्र० २४३ ।

**अत्थरणं**-आस्तरणम् , आस्तरणं करोति । ओघ० ४१ ।

**अत्थरय** - आच्छादनम् । जं० प्र० ५५। आस्तरकेण, अस्तरजसा वा । भग० ५४२ ।

**अत्थलोला**-अर्थे लोलाः-अर्थलोलाः-लम्पटाः-चौरादयः । उत्त० ५९० ।

**अत्थविगप्पणा**-अर्थविकल्पना । आव० ४८४ ।

**अत्थविणिच्छय**-अर्थविनिश्चयः-अपायरक्षकं कल्याणावहं वा अर्थातिनिश्चयभावम्। दश० २३५ ।

**अत्थसंजुत्तं**-सद्भावसंजुत्तं । दश० चू० ८९ ।

**अत्थसंपयाणं**-सांवत्सरिकार्थदानम् । आचा० ४२२ ।

**अत्थसत्थं**-अर्थशास्त्रम् । आव० ४२२ । अर्थोपायप्रतिपादनं शास्त्रम् । प्रश्न० ९७। नीतिशास्त्रादि। जं० प्र० २१९।

**अत्थसिद्धे** - अर्थसिद्धः, शास्त्रीयदशमदिवसनाम । सूर्य० १४७, जं० प्र० ४९०।

**अत्थस्स**-अस्तो मेरुर्यतस्तेनान्तरितो रविरस्तं गत इति व्यपदिश्यते तस्य पर्वतराजस्य गिरिप्रधानस्य । सम० ६५।

**अत्था**-अर्थाः, द्रव्याणि। उत्त० ३८४। अर्थ्याः, प्रार्थनीया वा । उत्त० ३८४ । अर्यन्त - गम्यन्त इत्यर्थाः । ओघ० ५। शब्दादयः | ठाणा० २५३, आचा० २०१। फलानि, वस्तूनि। ठाणा० ३३। अर्थ्यन्ते-अभिलष्यन्ते क्रियार्थिभिरर्यन्ते वा अधिगम्यन्ते । ठाणा० ३३५। निर्युक्तिभाष्यसंग्रहणिवृत्तिचूर्णिपञ्जिकादिरूपाः । सम० १११।

**अत्थाणं**-देशविशेषः। भग० ६८०।

**अत्थाणमंडविया**-आस्थानमण्डपिका। आव० ८९।

**अत्थाणि**-आस्थानिका। उत्त० ११५।

**अत्थाणिमंडवो**-आस्थानमण्डपः। नि० चू० प्र० २७४ आ।

**अत्थाणियं**-आस्थानम्। उत्त० १४६।

**अत्थाणियमंडविया** - आस्थानमण्डपिका । बृ० प्र० २७ आ ।

**अत्थाणी**-आस्थानी। आव० ६७२। आस्थानिका । आव० १४५, २९८ ।

**अत्थाणीवरगओ**-आस्थानीवरगतः। आव० २१६।

**अत्थादाणं**-अष्टाङ्गनिमित्तं प्रयोगः। बृ० तृ० ८६ अ।

**अत्थामा** - अस्थामानः, सामान्यतः शक्तिविकलाः | जं० प्र० २३९। अस्थामा, सामान्यतः शक्तिविकलः। भग० ३२३ ।

**अत्थायणयं**-आस्थानिका। आव० ३४२।

**अत्थायाणं**-अर्थादानं-द्रव्योपादानकारणमष्टांगनिमित्तं तद्दत्-प्रयुञ्जानः। ठाणा० १६४।

**अत्थावत्ती**-सामर्थ्यगम्या। बृ० द्वि० १२१ आ।

**अत्थावत्तीदोसो**-अर्थापत्तिदोषः, यत्रार्थादनिष्टापत्तिः, सूत्रदोषविशेषः। आव० ३७४।

**अत्थाहं**-अस्ताघम् , अविद्यमानस्ताघम् , अगाधम्। भग० ८२। अस्ताधः-निरस्ताधस्तलम्। भग० ८२। अप्रमाणम् । आव० ३७४।

**अत्थि**-येन येन यदा यदा प्रयोजनं तत्तत्तदा तदाऽस्ति-भवति जायते इति सुखमानन्दहेतुत्वादिति। ठाणा० ४८८। अस्ति, विद्यन्ते, सन्तीत्यर्थः, अथवाऽस्ति अयं पक्षो यदुत।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भग० ३२। प्रदेशः। भग० १४९, जीवा० ६। अस्ति, निपातः सर्वलिङ्गवचनः। प्रज्ञा० ५६३। प्रदेशः। आव० ६००। त्रिकालवचनो निपातः। अभूत्, भवति, भविष्यति च। आव० ७६८। अस्तिद्वारम्, अस्त्यन्यश्चैतन्यरूपः। दश० १२५। स्वामी। विशे० ६७२।

**अत्थिकाए**-अस्तिकायः प्रदेशराशिः। भग० ३२४।

**अत्थिकाय**-अस्तिकायः, प्रदेशराशिः, अस्तीति सन्ति आसन् भविष्यन्ति च ये कायाः प्रदेशराशयस्ते अस्तिकायाः। भग० १४८। प्रदेशसङ्घातः। जीवा० ६। धर्मास्तिकायादिः। दश० १३४।

**अत्थिकायउद्देसए**-भगवतीद्वितीयशतकस्य दशमोद्देशकनाम। भग० ६०८।

**अत्थिकायधम्म**-अस्तिकायधर्मः। दश० २१।

**अत्थिकायधम्मे**-अस्तयः-प्रदेशास्तेषां कायो-राशिरस्तिकायः स एव धर्मो-गतिपर्याये जीवपुद्गलयोर्द्धारणात्। ठाणा० ५१५।

**अत्थिक्क**-आस्तिक्यम्-जीवस्यास्तित्वनित्यत्वकर्तृत्वभोक्तृत्वमोक्षतत्साधनश्रद्धानम्। आव० ५९१।

**अत्थिनत्थि**-अस्तिनास्तिनामपूर्वः। ठाणा० १९९।

**अत्थिय**-अस्थिक-बहुबीजवृक्षविशेषः। प्रज्ञा० ३२। अस्तिकायः। भग० ८१। अत्थिकम्, अस्थिकवृक्षफलम्। दश० १७६।

**अत्थिया**-बहुबीजकवृक्षः। भग० ८०३।

**अत्थी**-अर्थज्ञाता। बृ० प्र० ११२ अ।

**अत्थीनत्थिपवायं**-यद्यथा लोके अस्ति नास्ति च तद्यत्र तथोच्यते चतुर्थपूर्वनाम। सम० २६।

**अत्थुआ**-आस्तृता। आव० १७३।

**अत्थुरणं**-पाउरणं। नि० चू० द्वि० ६१ अ।

**अत्थुव्वइ**-(अत्थुरइ) आस्तीर्यते। ओघ० ८३।

**अत्थे**-अनेन ह्यन्तरितः सूर्यादिरस्त इत्यभिधीयते। मेरुनाम। जं० प्र० ३७५।

**अत्थेगइया**-सन्त्येकके। प्रज्ञा० ५४५।

**अत्थो**-अर्थः, अभिधेयः, प्रयोजनं वा। प्रश्न० ११५। कारणं, तात्त्विकः पदार्थो वा। जीवा० ९८। अर्यते-गम्यत इति। आव० १०। पव्वओ, अचक्खुविसयपयत्थो वा। दश० चू० १२३। अर्थः-यः सूत्रस्याभिप्रायः। विशे० ५८८। अर्यत इति, विवृतं प्रबोधितं विकचकल्पम्। आव० ८६। अभिप्रेतपदार्थः। आव० ४१५। द्रव्यम्। आव० ६०७। अर्थ्यत इति। उत्त० ६८। विद्यादिः। दश० ११४।

**अत्थोग्गहणं**-फलनिश्चयम्। भग० ५४१।

**अत्थोग्गहे**-अर्थावग्रहः, अर्थस्यावग्रहणम्, अनिर्देश्यसामान्यरूपाद्यर्थग्रहणम्। व्यञ्जनावग्रहोत्तरकालमेकसामायिकमनिर्देश्यं सामान्यमात्रार्थग्रहणम्। प्रज्ञा० ३११। अर्थस्य-सामान्यनिर्देश्यस्वरूपस्य शब्दादेः अवेति-प्रथमं व्यञ्जनावग्रहानन्तरं ग्रहणं-परिच्छेदनमर्थावग्रहः। सम० १२। भग० ३४४। व्यञ्जनावग्रहचरमसमयोपात्तशब्दाद्यर्थावग्रहणलक्षणः। आव० १०। अर्यते-अधिगम्यतेऽर्थ्यते वा अन्विष्यत इत्यर्थः-सामान्यरूपादेः प्रथमपरिच्छेदनमर्थावग्रहः। ठाणा० ५१।

**अत्थोभं**-अस्तोभकं, वैहिहकारादिपदच्छिद्रपूरणस्तोभकनिपातशून्यम्, सूत्रगुणः। आव० ३७६।

**अथंडिलं**-सचित्तभूमी। नि० चू० प्र० ३८ आ।

**अथ**-अथशब्दः प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेष्वित्यानन्तर्यार्थः। ठाणा० ४९५। वाक्योपन्यासार्थः परिप्रश्नार्थो वा। भग० १४। प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु। प्रज्ञा० २४७।

**अथक्क**-अप्रस्तावः। बृ० प्र० ५५ आ।

**अथक्कागओ**-अकाण्डागतः। आव० ८००।

**अथक्को**-अविश्रान्तः। आव० १०२।

**अथालंदोग्गहो**-यथालन्दिकावग्रहः। नि० चू० प्र० २३९ अ।

**अथाहं**-जत्थ पुण बुड्डति नासिया तं। नि० चू० द्वि० ७८ आ।

**अथिरो**-अस्थिरः, क्षणावस्थायी। सूत्र० ६।

**अदंडे**-अदण्डः, प्रशस्तयोगत्रयमहिंसामात्रं वा। सम० ५।

**अदंसणो**-अन्धः। ठाणा० १६५।

**अदक्खु**-अदक्षः, अनिपुणः। सूत्र० ७४। अदृष्टः, अर्वाग्दर्शनः। सूत्र० ७४।

**अदक्खुदंसणो**-अचक्षुर्दर्शनः अचक्षुर्दर्शनमस्यास्ती, केवलदर्शनः, सर्वज्ञः। सूत्र० ७४।

**अदक्खेयव्वं**-ग्राह्यम्। ओघ० १६३।

**अदट्ठुमेव**-अदृष्ट्वैव। उत्त० २१३।

**अदढो**-विणावि गेलण्णएण जो दुब्बलो। नि० चू० प्र० १९८ अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अद्दणा**-विषादीकृता। नि० चू० प्र० ३२१ अ।
**अदत्तं**-अदत्तम्, अदत्तद्रव्यग्रहणम्। प्रश्न० ४। अवितीर्णम्, अधर्मद्वारस्य तृतीयं नाम। प्रश्न० ४३।
**अदन्न**-आत्मरक्षणपरा। बृ० प्र० १९० आ।
**अदसा**-अदशा-दशिकारहिता क्षौमा। ओघ० २१७।
**अदसी**-अलसी। आव० ८५४।
**अदिच्छाविज्जिहिह**-अदित्सिष्येथे, निषेत्स्येथे। दश० १०।
**अदिट्ठ**-अदृष्टम्, प्रत्यक्षापेक्षया अदृष्टम्। भग० ११७, २००।
**अदिट्ठलाभिय** – अदृष्टिलाभिकः, योऽदृष्टपूर्वेण दीयमानं गृह्णाति सः। प्रश्न० १०६।
**अदिट्ठहडा**-अदृष्टाहृता, अदृष्टोत्क्षेपमानीता, प्राभृतिका। आव० ५७६।
**अदिट्ठि**-अदृष्टे-तिरोहिते। ओघ० १६७।
**अदिण्णे** – अदत्तादानक्रिया, अदत्तादानाय यत्करणम्, क्रियायाः सप्तमो भेदः। आव० ६४८।
**अदिन्नादाणवत्तिए**-अदत्तादानप्रत्ययः। सम० २५।
**अदिन्ने**-अदत्तादानक्रिया-आत्माद्यर्थमदत्तग्रहणम्। ठाणा० ३१६।
**अदिस्समाणे** – अदृश्यमानः, अनपदिश्यमानः। आचा० १३१।
**अदीणवं**-अदीनवन्तम्, अदीनं, दैन्यरहितम्। उत्त० २८२।
**अदीणसत्तु**-नमिनाथपूर्वभवनाम। सम० १५१।
**अदीणसत्तू** – अदीनशत्रुः, हस्तिशीर्षनगरनृपतिः। विपा० ८९। ठाणा० ४०१, ४०२।
**अदीणो**-पसण्णमणो। नि० चू० प्र० १८९ अ। अदीनः, अविक्लवः। उत्त० १२०। अदीनाकारयुक्तः। अनुत्त० ४। शोकाभावः। अन्त० २२।
**अदु**-अथ, 'अतः' इत्यर्थे। सूत्र० ६१। अथवा। उत्त० २९५।
**अदुअक्खरिय**-जुगुप्सिता, अद्वयक्षरिका। नि० चू० तृ० १८ अ।
**अदुआलिआ**-मथिका, मन्थनकारिणी। दश० ६०।
**अदुक्खणया**-अदुःखनता, दुःखस्य करणं दुःखनं तदविद्यमानं यस्यासावदुःखनः, तद्भावस्तत्ता अदुःखकरणमित्यर्थः। भग० ३०५।
**अदुगुंछिअं**-अजुगुप्सनीयम्, सामायिकाष्टमपर्यायः। आव० ४७४।
**अदुट्ठो**-अद्विष्टः अदुष्टो वा दायके आहारे वा। प्रश्न० १०९।
**अदुतं**-अद्रुतं, अनुत्सुकम्। प्रश्न० ११२।
**अदुत्तरं**-अथोत्तरम्, अथापरम्। भग० १५५, ३०६। अथान्यत्। जीवा० १६६। अथापरं। औप० ३७।
**अदुयं**-अशीघ्रम्। भग० २९४।
**अ(अं)दुयबंधणं**-अन्दुकबन्धनम्। सूत्र० ३२८।
**अदुवं**-अथवा। उत्त० ११०।
**अदुव**-अथवा। भग० १३०।
**अदुवा**-अथवा, पक्षान्तरोपन्यासद्वारेणाभ्युच्चयोपदर्शनार्थः। आचा० ४७।
**अदूयालियं**-उन्मिश्रितम्। उत्त० १४६।
**अदूरं**-प्रत्यासन्नम्। आव० २३२।
**अदूरसामंते** – अदूरसामन्तम्, नातिदूरे नातिनिकटे। सूर्य० ५।
**अदेसकालप्पलावी**-जहा भायणं पडिक्कमियं अट्टकरणंपि से कयं लेवितं, रूढं ततो पमाणतं भग्गं ताहे सो अदेसकालप्पलावी मए पुव्वं चेव णायं एयं भजिहिति। नि० चू० तृ० ८० आ। अदेशकालप्रलापी, अतीते कार्ये यो वक्ति-यदिदं तत्र देशे काले वाऽकरिष्यत ततः सुन्दरमभविष्यदिति। उत्त० ३४७।
**अद्द**-आर्द्रम्, सरसम्। प्रज्ञा० ९१। सूत्रकृताङ्गस्य षष्ठमध्ययनम्। उत्त० ६१६। आव० ६५८। गुच्छविशेषः। प्रज्ञा० ३२।
**अद्दइज्जं**-आर्द्रकीयम्, सूत्रकृताङ्गस्य षष्ठमध्ययनम्। सूत्र० ३८५। सूत्रकृताङ्गाध्ययननामविशेषः। सम० ४२।
**अद्दए**-आर्द्रकम्, अनन्तकायभेदः। भग० ३००।
**अद्दकुमारिज्जं**-आर्द्रककुमारीयम् (महाध्ययनम्)। ठाणा० ३८७।
**अद्दक्खु**-अद्राक्षु, दृष्टवन्तः। भग० २१९।
**अद्दण्णो**-पीडितः। आव० ७००। अधृतिमापन्नः, कातरः। आव० ८००। अधृतिमुपगतः। आव० ४१६। अधृतिमापन्नः। दश० ४८। अक्षणिकः। बृ० द्वि० ४६ अ अधृतिमुपगतः। आव० १९०।
**अद्द(ट्ट)न**-मल्लविशेषनाम। व्य० द्वि० ३५७ अ।
**अद्दन्ना**-आकुलीभूताः। बृ० प्र० २९० आ।
**अद्दपुरं**-आर्द्रपुरं, आर्द्रकराजधानी। सूत्र० ३८५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अद्दया**–आर्द्रका, हरिद्रा। उत्त० २१८।
**अद्दवद्दं**–आर्द्रवद्रवम्, निगालितम्। आव० ८५४।
**अद्दसुतो**–आर्द्रसुतः, आर्द्रकराजकुमारः। सूत्र० ३८५।
**अद्दहिज्जति**–आद्रहति। नि० चू० प्र० ३१७ अ।
**अद्दहिया**–आद्रहणम्। आव० ८५४।
**अद्दा**–आद्रानामनक्षत्रम्। ठाणा० ७७।
**अद्दाए**–आदर्शः। नि० चू० प्र० ३४७ अ।
**अद्दाओ**–आदर्शः। आव० २९८, ४१६।
**अद्दागं**–आर्द्रकं। ओघ० १७२। दर्पणः। बृ० प्र० १३६ आ। आदर्शः। ठाणा० २४३, सम० १२४। ओघ० १४८।
**अद्दागो**–आदर्शः। ठाणा० ५१२।
**अद्दाणक्खत्ते**–आर्द्रानक्षत्रम्। सूर्य० १३०।
**अद्दामलगमेत्तं**–आर्द्रामलकमात्रं। आव० ८५७।
**अद्दायं**–आदर्शः। आव० ६५।
**अद्दाय**–आदर्शः। प्रज्ञा० २९३।
**अद्दारिट्ठे**–आर्द्रारिष्टः, कोमलकाकः। जं० प्र० ३२।
**अद्दिज्जमाणेहिं**–आर्द्रैः–पुत्रकलत्राद्यनुषङ्गजनितस्नेहादार्द्रीक्रियमाणैः। आचा० २१२।
**अद्दी**–अर्दिः, याञ्चा। प्रश्न० ९३।
**अद्दीण**–अदीनः, अक्षुभितः। प्रश्न० १०९।
**अद्दीणमाणसे**–अदीनमनसा। आचा० ४२४।
**अद्दीणा**–अदीनाः, कथं वयममुत्र भविष्याम इति वैक्लव्यरहिताः परीषहोपसर्गादिसम्भवे वा न दैन्यभाजः। उत्त० २८२।
**अद्ध**–अर्द्धम्। सूत्र० १६।
**अद्धंसं**–उत्तरासङ्गः। बृ० तृ० २५४ अ। नि० चू० प्र० १९१ अ।
**अद्ध**– अद्धाकालः–चन्द्रसूर्यादिक्रियाविशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती समयादिलक्षणः। आव० २५७। कालो। नि० चू० प्र० ३३७ अ। अर्द्धम्, भागमात्रा। भग० २०८। तिर्यग्वलितम्। जं० प्र० ५२।
**अद्धकविट्ठगसंठाणसंठिते**– अर्द्धकपित्थसंस्थानसंस्थितम्, चन्द्रविमानस्वरूपम्। सूर्य० २६२।
**अद्धकवित्थसंठाणसंठियं** – अर्द्धकपित्थसंस्थानसंस्थितम्, उत्तानीकृतमर्द्धकपित्थं तस्येव यत्स्थानं तेन संस्थितम्। जीवा० ३७८।
**अद्धकायसमाणा**–आलोककव्यन्तरादिकायार्धप्रमाणा। जं० प्र० ५७।
**अद्धखलुया**–पादार्धाच्छादकं चर्म। बृ० द्वि० २२२ आ।
**अद्धखल्ला**–अद्धं जाव खल्लया जीए उवाणहा। नि० चू० प्र० १३६ आ।
**अद्धखित्तं** – अर्द्धक्षेत्रम्। यदहोरात्रप्रमितस्य क्षेत्रस्यार्द्धं चन्द्रेण सह योगमश्नुते तन्नक्षत्रम्। सूर्य० १७७। जं० प्र० ४७८।
**अद्धचंदं**–अर्द्धचन्द्रः, बाणविशेषः। आव० ६९७।
**अद्धचंदा**–अर्द्धचन्द्राः, खण्डचन्द्रप्रतिबिम्बानि चित्ररूपाणि। जं० प्र० २०१।
**अद्धचंदो** – अर्द्धचन्द्रः, सोपानविशेषः। प्रश्न० ८। द्वारादिषु रत्नमयशिरोविशेषः। प्रज्ञा० ९९, सूर्य० २६४। आव० ४२५, जीवा० १७५।
**अद्धचक्कवाला**–चक्रवालार्धरूपा। भग० ८६६। अर्धवलयाकारः। ठाणा० ४०७।
**अद्धजंघा**–जङ्घार्धपिधायि चर्म। बृ० द्वि० २२२ आ।
**अद्धजंघमेत्तो**–अद्धजङ्घा। नि० चू० द्वि० ७९ आ।
**अद्धद्धामीसग** – अद्धद्धमिश्रा, सत्यामृषाभाषाभेदः। दश० २०९।
**अद्धद्धामीसए**–अद्धद्धामिश्रकं, अद्धा–दिवसो रजनी वा तदेकदेशः प्रहरादिः अद्धद्धा तद्विषयं मिश्रकं–सत्यासत्यं। ठाणा० ४९१। अद्धाद्धा, दिवसस्य रात्रेर्वा एकदेशः। प्रज्ञा० २५९। अद्धद्धा, दिवसरजन्येकदेशः। दश० २०९।
**अद्धद्धामिस्सिया**–अद्धाद्धामिश्रिता, दिवसस्य रात्रेर्वा एकदेशोऽद्धाद्धा सा मिश्रिता यया सा भाषा। प्रज्ञा० २५६।
**अद्धनारायं**–अर्द्धनाराचम्, यत्रैकपार्श्वे मर्कटबन्धो द्वितीये च पार्श्वे कीलिका तत्। जीवा० १५, ४२। प्रज्ञा० ४७२।
**अद्धपत्थए**–मानविशेषः। भग० ३१३।
**अद्धपलितंका** – अर्द्धपर्यङ्का – ऊरावेकपादनिवेशनलक्षणा। ठाणा० २९९, ३०२।
**अद्धपलियंकसंठिते**–अर्द्धपल्यङ्कसंस्थितम्। सूर्य० १३०।
**अद्धपलंका**–एकं जानुमुत्पाट्योपवेशनम्। बृ० तृ० २०० अ।
**अद्धपेडा**–गोचरचर्याभिग्रहविशेषः। उत्त० ६०५। ठाणा० ३६६।
**अद्धपेला**–गोचरचर्याभिग्रहविशेषः। नि० चू० तृ० १२ अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अद्धमंडलं**-अर्द्धमण्डलम्। जं० प्र० ४७८।

**अद्धमंडलसंठिती** - अर्द्धमण्डलसंस्थितिः, अर्द्धमण्डलव्यवस्था। सूर्य० १६।

**अद्धमागहविब्भमं**-अर्द्धमागधविभ्रमम्, गृहविशेषः। जीवा० २६९। जं० प्र० १०७।

**अद्धमागहा** - अर्द्धमागधी, अर्द्धं मागध्या इत्यर्द्धमागधी भाषा। भग० २२१। मागधभाषालक्षणं किञ्चित्किञ्चिच्च प्राकृतभाषालक्षणं यस्यां सा, अर्द्धं मागध्या इत्यर्द्धमागधी। भग० २२१। मगहद्धविसयभासानिबद्धं, अट्ठारसदेसीभासाणियतं। नि० चू० द्वि० ३६ अ।

**अद्धमासिपसु**-अर्धमासिका। आचा० ३२७।

**अद्धरत्तकालसमओ**-अर्द्धरात्रकालसमयः। आव० १२१।

**अद्धसंकासा**-अर्द्धसङ्काशा, सर्वकामविरक्तताविषये देवलासुतराजस्य तापसावस्थायामुत्पन्ना पुत्री। आव० ७१४।

**अद्धसम**-अर्द्धसमम्, पद्यविशेषः। दश० ८८। एकतरसमम्। ठाणा० ३९७।

**अद्धसेलसुत्थियं**-अर्द्धशैलसुस्थितम्। जीवा० २६९।

**अद्धहारा**-अर्धहारा, नवसरिकः। जं० प्र० २४, १०५।

**अद्धहारभद्दो**-अर्धहारभद्रः, अर्द्धहारे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारमहाभद्दो**-अर्द्धहारमहाभद्रः, अर्द्धहारे द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारमहावरो** - अर्द्धहारमहावरः, अर्द्धहारे समुद्रेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरभद्दो** - अर्द्धहारवरभद्रः, अर्द्धहारवरे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरमहाभद्दो**-अर्द्धहारवरमहाभद्रः अर्द्धहारवरे द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरमहावरो** - अर्द्धहारवरमहावरः, अर्द्धहारवरे समुद्रेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरावभासभद्दो**-अर्द्धहारवरावभासभद्रः, अर्द्धहारावभासे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरावभासमहाभद्दो**- अर्द्धहारवरावभासमहाभद्रः, अर्द्धहारावभासे द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरावभासमहावरो** - अर्द्धहारवरावभासमहावरः, अर्द्धहारवरावभासे समुद्रेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरावभासवरो**-अर्द्धहारवरावभासवरः, अर्द्धहारवरावभासे समुद्रे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९।

**अद्धहारवरावभासो** - अर्द्धहारवरावभासः, द्वीपविशेषः समुद्रविशेषश्च। जीवा० ३६९।

**अद्धहारवरो**-अर्द्धहारवरः, अर्द्धहारवरे समुद्रे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९। द्वीपविशेषः, समुद्रविशेषश्च। जीवा० ३६८।

**अद्धहारो**-अर्द्धहारः, नवसरिकः। औप० ५५। जीवा० १८१। भूषणविधिविशेषः। जीवा० २६८। द्वीपविशेषः, समुद्रविशेषश्च। जीवा० ३६८। प्रज्ञा० ३०७।

**अद्धा**-अध्वा, पन्थाः। आव० ६६२। समयः। विशे० ९६१। कालः, अर्धतृतीयद्वीपसमुद्रान्तर्वर्ती समयादिलक्षणः। विशे० ८३७। कालम्। ठाणा० ४४। कालस्याख्या। प्रज्ञा० ९। अवधिलब्धिकालः। आव० ४३। अध्वा-मार्गः। आव० ६१७। कालः। आव० ८४०। दिवसो रात्रिर्वा। प्रज्ञा० २५९। अद्धा, षट्षष्ट्यधिकरात्रिन्दिवशतत्रयपरिमाणा। सूर्य० ११। जङ्घाए अद्धं जाव कोसो। नि० चू० प्र० १३६ आ।

**अद्धाउए** - अद्धा-कालः तत्प्रधानमायुः-कर्मविशेषोऽद्धायुः, भवात्ययेऽपि कालान्तरानुगामी। ठाणा० ६६।

**अद्धाए**-कालस्य पौरुष्यादिकालमानमाश्रित्य इति। ठाणा० ४९८। काले अर्थादागामिन्याम्। उत्त० २८०।

**अद्धाकालः**-अद्धैव कालः, कालशब्दो हि वर्णप्रमाणकालादिष्वपि वर्त्तते, ततोऽद्धाशब्देन विशिष्यत इति। ठाणा० २०१। चन्द्रसूर्यादिक्रियाविशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्त्यद्धाकालः। दश० ९।

**अद्धाकाले**-चन्द्रसूर्यादिक्रियाविशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तवर्त्ती समयादिः। भग० ५३३।

**अद्धाढए**-अर्द्धाढकः, मानविशेषः। भग० ३१३।

**अद्धाणं**-पहो। नि० चू० प्र० ५१ आ। महदरण्यं। बृ० द्वि० १७४ आ। अध्वा-पन्थाः। बृ० द्वि० १२२ अ। महंता अडवी। नि० चू० प्र० ५० आ। छिन्नापातं महदरण्यम्। बृ० द्वि० २१ आ। उत्पत्तिप्रलयरूपम्। उत्त० २६८।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अद्धाण**-अध्वनः । आव० ५३५ । अध्वा-विप्रकृष्टो मार्गः । बृ० प्र० २३८ आ ।

**अद्धाणतेणो**-पंथे मुसंतो । नि० चू० द्वि० ३८ आ ।

**अद्धाणपडिवन्ने**-अध्वप्रतिपन्नः, मार्गप्रतिपन्नः । भग० ११६ ।

**अद्धाणपरिस्संतो**-अद्धानपरिश्रान्तः । ओघ० १०७ ।

**अद्धाणपवण्णगो**-अध्वप्रपन्नकः । आव० ५७८ ।

**अद्धाणसीसए**-यतः परं समुदायेन गन्तव्यं सम्यग्मार्गावहनात् । बृ० तृ० ६१ आ ।

**अद्धाणसुत्ते**-अद्धाणविहिजयणाविदंसणसुत्तगं । नि० चू० द्वि० १४८ अ ।

**अद्धामिस्सिया**-अद्धामिश्रिता, अद्धा-कालः स चेह प्रस्तावाद्दिवसो रात्रिर्वा, स मिश्रितो यया सा भाषा । प्रज्ञा० २५६ ।

**अद्धामीसए**-कालविषयं सत्यासत्यम् । ठाणा० ४९० ।

**अद्धामीसग**-अद्धामिश्रा, सत्यामृषाभेदः । दश० २०९ ।

**अद्धासमय**-कालसमयः, अद्धाया निर्विभागो भागो वा । जीवा० ६ ।

**अद्धिती**-अधृतिः । आव० ३५३ ।

**अद्धुट्ठाई**-अर्द्धचतुर्थानि । आव० ३९ ।

**अद्धुट्ठाण**-अध्युष्टानाम्, अर्द्धाधिकतिसृणाम् । प्रश्न० ७३ ।

**अद्धोवमिए**-अद्धौपमिकम् - यत्कालप्रमाणमनतिशयिना ग्रहीतुं न शक्यते तत् । ठाणा० ९० ।

**अद्भुतम्**-वाण्यतिशयः । सम० ६३ ।

**अधम्मजुत्ते**-येन उक्तेन प्रतिपाद्यस्याधर्म्मबुद्धिरुपजन्यते तदधर्म्मयुक्तम् । ठाणा० २५३ ।

**अधम्मपलज्जणो**-अधर्मप्ररक्तः, अधर्मप्रायेषु कर्मसु प्रकर्षेण रज्यत इति । सूत्र० ३२९ ।

**अधम्मपलोई**-अधर्मप्रलोकी, अधर्मानेव-परसम्बन्धिदोषानेव प्रलोकयति-प्रेक्षते इत्येवंशीलः । विपा० ४८ ।

**अधम्मो** - अधर्मः, अचारित्ररूपत्वात् । अब्रह्मणः षोडशं नाम । प्रश्न० ६६ । अधर्मास्तिकायः स्थित्युपष्टम्भगुणः । ठाणा० ४० । अधर्म्मे-श्रुतलक्षणविहीनत्वादनागमे अपौरुषेयादौ । ठाणा० ४८७ । अधर्मास्तिकायः । सम० ६ । अविद्यमानसदाचारः । उत्त० ४३४ ।

**अधरं**-आत्यन्तिकं कारणम् । बृ० तृ० १९ अ ।

**अधरफाणू**-पार्ष्णिका । व्य० द्वि० २९९ अ ।

**अधरिमं** - अविद्यमानधारणीयद्रव्याम् ऋणमुत्कलनात् । भग० ५४४ ।

**अधरो**-अधरः, अधस्तनौष्ठः । प्रश्न० १४० । अधीरः । उत्त० १५३ ।

**अधरोट्ठा**-अधरोष्ठः, अधस्तनो दन्तच्छदः । जं० प्र० ११२ । प्रश्न० ८१ ।

**अधस्तनकाय**-पादपाणिशिरोग्रीवमुच्यते । ठाणा० ३५७ ।

**अधस्तारका**-पिशाचभेदविशेषः । प्रज्ञा० ७० ।

**अधारणिज्जं**-अधारणीयं, धारयितुमशक्यम्, स्थातुं वाऽशक्यम् । विपा० ६२ । अविद्यमानाधमर्णम् । विपा० ६३ । अप्रशस्तप्रदेशखञ्जनादिकलङ्काङ्कितत्वात् । आचा० ३९६ ।

**अधिकरणं**-अधिकं-अतिरिक्तं उत्सूत्रं करणं, अवरा अधमा जघन्या गतिः तामात्मानं ग्राहयति । कषायभावः । नि० चू० प्र० २९४ अ । अधोकरणं, अधितिकरणं, अबुद्धिकरणम् । नि० चू० प्र० २१३ आ । कलहो । नि० चू० प्र० ३४४ आ, २३९ अ ।

**अधिकरणनिर्वर्त्तिनी** - खड्गादिनिर्वर्त्तिनी, अधिकरणिकीक्रियाया द्वितीयो भेदः । आव० ६११ ।

**अधिकरणप्रवर्त्तिनी**-चक्रमहःपशुबन्धादिप्रवर्त्तिनी क्रिया, अधिकरणिकीक्रियायाः प्रथमो भेदः । आव० ६११ ।

**अधिकरणसाला**-अधिकरणशाला, लोहपरिकर्मगृहम् । भग० ६९७ ।

**अधिकरणाणं**-अधिकरणानां-कलहानां यन्त्रादीनां वोत्पादयिता । सम० ३७ ।

**अधिकरणिखोडी**-अधिकरणिखोडी-यत्र काष्ठेऽधिकरणी निवेश्यते । भग० ६९७ ।

**अधिकरणिसंठिते**-अधिकरणीसंस्थितम् । ठाणा० ४३४ ।

**अधिकरणीतो**-चुल्ली । नि० चू० द्वि० १०१ अ ।

**अधिकासिका**-याः सञ्ज्ञावेगेनापीडितः सुखेनैव गन्तुं शक्नोति ताः । ओघ० १९९ ।

**अधिके**-अर्गले । उत्त० ६६० ।

**अधिक्खाउ**-अधिकतरं खाए सो । नि० चू० प्र० १५१ अ ।

**अधिगमजं**-दर्शनभेदः । आव० ५२७ ।

**अधिगरणं**-अधिकरणं, अधिक्रियते-स्थाप्यते-नरकादिष्वात्माऽनेनेति, अनुष्ठानविशेषः । प्रज्ञा० ४३५ ।

**अधिगरणंसि**-विरोधे । ठाणा० ४४१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अधिगरणिया**-आधिकरणिकी, अधिकरणेन निर्वृत्ता। प्रज्ञा०

**अधिगारो**-अधिकारः, नियोगः। प्रश्न० ६६। [४३५।

**अधिघटिकया**-कपिलदरिद्रदृष्टान्तविशेषः। आचा० १६३।

**अधिट्ठणं**-संगिसेज्जवेढिए चेव उपवेसणं। नि० चू० प्र० २४६ आ।

**अधिट्ठाणं**-अधिष्ठानम्। ओघ० १४८।

**अधिट्ठिज्जा**-अधितिष्ठेत्-योन्याकर्षणेन संगृह्णीयात्। ठाणा० ३१३।

**अधिट्ठेति**-परिभुञ्जति। नि० चू० प्र० २२५ आ।

**अधिमरगा**-अहिवत् अनपकृतेऽप्यपकारे मारका। नि० चू० द्वि० ११ अ।

**अधियं**-अधिकम्, वर्णादिभिरभ्यधिकं, सूत्रदोषविशेषः। आव० ३७४।

**अधियासितो**-अध्यासितः, अधिवासितः। आव० ३४३।

**अधिशय**-आश्रयतः। आचा० २५५।

**अधिष्ठानम्**-गुदास्थानम्। दश० ११८।

**अधीकारो**-प्रयोजनम्। बृ० द्वि० २२५ अ।

**अधीकारवशः**-प्रसङ्गः। आचा० २४१।

**अधीता**-अधीता, श्रुतनिबद्धा सती पठिता। प्रश्न० १०५।

**अधीतान्वीक्षिकीकस्य**-दुर्गृहीतहेतुदृष्टान्तलेशस्य। आचा० २२३।

**अधुवं**-अध्रुवं-नावश्यभाविनम्। प्रश्न० ९६। प्रातिहारिकम्। नि० चू० द्वि० ११७ आ।

**अधुववग्गणा**-अध्रुववर्गणा, इतश्चोर्ध्वमित्थमेवैकोत्तरवृद्धिक्रमेण वर्द्धमाना ध्रुववर्गणाभ्य इतरा अनन्ता भवन्ति। विशे० ३३१।

**अधुवे**-न ध्रुवः, सूर्योदयवन्न प्रतिनियतकालेऽवश्यंभावी। भग० ४६९। अध्रुवं-स्वल्पकालानुज्ञापनात्। आचा० ३९६। नित्यो न। उत्त० २८९।

**अधो**-भूमौ। ओघ० १६२।

**अधेणू**-सुक्का वञ्झा वा। नि० चू० प्र० ३२७ अ।

**अधोघट्टना**-अधो भुवं घट्टयति। ओघ० १०९।

**अधोणता**-गजदंतवत् अवनता। नि० चू० द्वि० ४९ आ।

**अधोदृष्टिता**-दोषविशेषः। उत्त० ४९०।

**अधोभागा**-भूमिभागः। जं० प्र० ३२१।

**अधोभावो**-अधोभावः, तिरस्कारबुद्धिः। आव० ६९९।

**अधोविवृतम्**-अनाच्छादितममालगृहम्। ठाणा० १५७।

**अधोवेदिका**-जानुनोरधो हस्तयोर्निवेशः। ठाणा० ३६२।

**अध्यसनं**-अजीर्णे भोजनम्। ठाणा० ४४७।

**अध्यास्यन्ते**-सह्यन्ते। प्रज्ञा० ८०।

**अध्याहार**-व्याख्याङ्गम्। आचा० ५५।

**अध्येषणा**-यदृच्छया। सम० ३७।

**अध्वर**-यज्ञः। उत्त० ५२५।

**अनंगप्रविष्टं**-गणधरानन्तराद्याचार्यदृब्धम्। तत्त्वा० १-२०।

**अनक्कभिन्नेहिं**-अनस्तितैः। भग० ३७२।

**अनग्गओ**-अनग्नकः, द्रुमविशेषः। जीवा० २६९।

**अनङ्गसेन**-चंपावासिसुवर्णकारः। बृ० तृ० १०८ आ।

**अनतिचारम्**-छेदोपस्थापनीयभेदविशेषः। ठाणा० ३२३।

**अनतिविलम्बितम्**-वाण्यतिशयविशेषः। सम० ६३।

**अनध्यवसायः**-संशयो विपर्ययो वा। आचा० १५०।

**अनानुक्रमाद्**-पश्चानुपूर्व्या। विशे० २८४।

**अनन्तकम्**-समयभाषया वस्त्रमिति। ठाणा० ३४६।

**अनन्तगुणितम्**-अनन्तगुणितं, अनन्तशो गुणितम्। विशे० २६८।

**अनन्तरवल्ली**-माम्राद्यः षट्। बृ० तृ० ४२ आ।

**अनन्यत्वद्रव्यशुद्धिः**-आदेशतो द्रव्यशुद्धेर्भेदः, यथा शुद्धदन्तः। दश० २११।

**अनपनीतम्**-वाण्यतिशयविशेषः। सम० ६३।

**अनब्भुवगओ**-अनभ्युपगतः, श्रुतोपसम्पदानुपसम्पन्नः। आव० १००।

**अनभिग्रहिकः**-मिथ्यात्वविशेषः। ठाणा० २७।

**अनममाणे**-अनममानान्, निर्घृणतया सावद्यानुष्ठायिनः। आचा० २५४।

**अनर्गलितकपाटम्**-उद्घाटकपाटम्। ओघ० १६६।

**अनर्थकम्**-अर्थशून्यम्। आव० ५१।

**अनलं**-अनलम्-अभिष्टकार्यासमर्थं हीनादित्वात्। आचा० ३९६। न अलो अनलः-अपचलः। नि० चू० द्वि० २५ आ।

**अनलगिरी**-अनलगिरिः, प्रद्योतस्य हस्ती, तृतीयं रत्नम्। आव० ६७३।

**अनलसा**-उत्साहवन्तः। ओघ० १८०।

**अनवत्राप्यता**-अविद्यमानमवत्राप्यं-अवत्रपणं लज्जनं यस्य सः, अवत्रापयितुं-लज्जयितुमर्हः, शक्यो वाऽवत्राप्यो लज्जनीयः न तथा तद्भावः। उत्त० ३९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अनवगतानि**-असङ्कल्पितान्यनालोचितानि। विशे० १४५।
**अनवद्याङ्गी**-महावीरभगवद्दुहिता। विशे० ९३५।
**अनवयग्ग**-अनवदग्रम्, अनन्तम्। भग० २४८।
**अनवसर**-अनागमः। आचा० १२२।
**अनाकारा**-सामान्यांशग्रहणशक्तिः। भग० ७३।
**अनाघात**-(अणघायं), अमारिघोषणा। आचा० २६०।
**अनाचारश्रुतम्**-सूत्रकृताङ्गस्य पञ्चममध्ययननाम। ठाणा० ३८७।
**अनाचीर्णम्**-अनारब्धम्। आचा० १४८।
**अनायुक्ता**-(अणाजुत्ता)-लोपकृता। ओघ० १८६।
**अनाद्यन्तं**-आद्यन्तरहितम्। ठाणा० १२०।
**अनानुगामिकः**-अनानुगामिकः-शृङ्खलाप्रतिबद्धदीप इव यो गच्छन्तं पुरुषं नानुगच्छति। प्रज्ञा० ५३९।
**अनाभवद्व्यवहार**-अस्वामित्वव्यवहार। आव० ८२१।
**अनाभोगिक**-मिथ्यात्वविशेषः। ठाणा० २७।
**अनालीढं**-(अणालीढं)-अनवबुद्धः। ओघ० २२७।
**अनालोचितानि**-असङ्कल्पितान्यनवगतानि। विशे० १४५।
**अनाहो**-अनाथः, नाथरहितः, योगक्षेमकारिनायकाभावात्। प्रश्न० ११। योगक्षेमकारिविरहितः। प्रश्न० १९।
**अनिंदं**-अनिन्द्यम्, सामायिकसप्तमपर्यायः। आव० ४७४।
**अनिन्द्रियं**-मनः। बृ० प्र० ९आ।
**अनिकामं**-परिमितम्। बृ० द्वि० ४ अ।
**अनिन्दितः**-किन्नरभेदविशेषः। प्रज्ञा० ७०।
**अनिउणमई**-अनिपुणमतिः। आव० ४९२।
**अनिग्गहे**-अनिग्रहः-न विद्यते इन्द्रियनिग्रहः-इन्द्रियनियमात्मकोऽस्येति। उत्त० ३४४।
**अनिज्जूहित्ता**-अदत्त्वा। भग० ७०१।
**अनिट्ठं**-अनिष्टम्, इष्यन्ते स्मेतीष्टास्तन्निषेधादनिष्टाः। भग० ७२।
**अनिट्ठता**-अनिष्टता, अवल्लभता। भग० २३।
**अनिट्ठुभओ**-अनिष्ठीवकः, मुखश्लेष्मणोऽपरिष्ठापकः। प्रश्न० १०७।
**अनित्थंत्थं**-अनित्थंस्थं, इदंप्रकारमापन्नमित्थं, इत्थं तिष्ठतीति इत्थंस्थं, न इत्थंस्थं अनित्थंस्थं-वदनादिशुषिरप्रतिपूरणेन पूर्वाकारान्यथाभावतोऽनियताकारमिति। प्रज्ञा० १०९।
**अनित्यत्वम्**-अतादवस्थ्यम्। जं० प्र० २६।
**अनिद्देस**-अनिर्देशदोषः, यत्रोद्देश्यपदानामेकवाक्यभावो न क्रियते, एतादृशः सूत्रदोषविशेषः। आव० ३७४।
**अनिभृता**-निष्ठुरवक्रोक्त्यादिरूपा। बृ० प्र० २१३ अ।
**अनिदोज्जं**-अनिर्भयं, अस्वस्थम्। व्य० द्वि० २४३ आ।
**अनियट्टि**-अनिवृत्ति-शुक्लध्यानचतुर्थभेदरूपम्। उत्त० ५८९। आ सम्यग्दर्शनलाभाद् न निवर्तते। विशे० ५३५।
**अनियट्टी**-ग्रहविशेषः। ठाणा० ७९। जं० प्र० ५३५।
**अनियओ**-अनियतः, अनियतवृत्तिः। उत्त० २६९।
**अनियतवृत्ति**-अनियतविहाररूपा। उत्त० ३९। अनियतविहारः। ठाणा० ४२३।
**अनियाओ**-अनियता। ओघ० ७३।
**अनियाणे**-अनिदानः, न विद्यते निदानमस्येति निराकाङ्क्षोऽशेषकर्मक्षयार्थी संयमानुष्ठाने प्रवर्तेत। सूत्र० २६४।
**अनिरक्खिय**-क्षिप्तः। आव० ६८१।
**अनिरुद्धे**-अनिरुद्धः, अन्तकृद्दशानां चतुर्थवर्गस्याष्टमाध्ययनम्। अन्त० १४।
**अनिरुद्धो**-अनिरुद्धः, कृष्णवासुदेवापत्यनाम। प्रश्न० ७३।
**अनिर्विष्ट**-न दत्तफलम्। बृ० प्र० ५० आ।
**अनिव्वुइ**-अनिर्वृतिः, अस्वास्थ्यनिबन्धना कायादिचेष्टा। आव० ४९९।
**अनिलः**-अनिलनरेन्द्रः यवराजर्षिपिता। बृ० प्र० १९० आ।
**अनिलसुओ**-अनिलसुतः यवराजा। बृ० प्र० १९१ अ।
**अनिलुंछिएहिं**-अवर्द्धितकैः। भग० ३७२।
**अनिवृत्तिकरण**-सम्यक्त्वप्राप्तौ करणविशेषः। ठाणा० ३१। अनिवृत्तिकरणं, न निवर्त्तनशीलम्। आव० ७५।
**अनिवृत्तिबादरः**-दर्शनसप्तकलोभोपशमयोरन्तरम्। आव० ८२।
**अनिव्वाणि**-अनिर्वाणिः-असुखम्। व्य० प्र० ६२ अ। खेदः (गणि०)
**अनिव्वुइकरो**-अनिवृतिकरः, अस्वास्थ्यनिबन्धनकायादिचेष्टाकरः। आव० ४९९।
**अनिव्वुडं**-अचित्तभोजी त्रिदण्डोद्वृत्तभोजी। दश० चू० ५१।
**अनिश्रितवचनता**-रागाद्यकलुषितवचनता। उत्त० ३९।
**अनिष्पन्नातापना**-(अणिप्फण्णायावणा)-आतापनाया भेदः। औप० ४०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अनिसाइ**-अनिशादी। सम० २०।
**अनिसीहं**-अनिशीथम्, निशीथाद्विपरीतम्। उत्त० २०४। बद्धश्रुतम्। आव० ४६४।
**अनिहुआ**-त्रिदण्डिनः। बृ० द्वि० २३५ आ। कन्दर्पबहुला मायिनश्च। बृ० तृ० १९५ आ।
**अनिहो**-अनिहः-अमायः, न निहन्यत इति वा परीषहैरपीडितः, अस्निहः-स्नेहरूपबन्धनरहितः। सूत्र० ४००।
**अनीकाधिपतयः**-दंडनायकस्थानीयाः। तत्त्वा० ४-४।
**अनीहडं**-अनिर्गतम्। आचा० ३२५।
**अनीहारिमे**-अनिर्हारितम्। अटव्यादिकृतमनशनम्। भग० १२०। गिरिकन्दरादौ अनशनम्। ठाणा० ९४। भग० ६२५।
**अनु**-पश्चात्। आव० २४२। सातत्यम्। उत्त० ६२७।
**अनुकूलं**-अनुगुणं, अनुलोमं च। जीवा० ३।
**अनुगमः**-सूत्रस्य न्यासानुकूलः परिच्छेदः। ठाणा० ४। संहितादिव्याख्यानप्रकाररूपः, उद्देशनिर्देशनिर्गमादिद्वारकलापात्मको वा। सम० ११५। अनुगमनम्, अनुगतः। उत्त० ६३१।
**अनुगामि**-यन्मोक्षाय अनुगच्छति। व्य० द्वि० ३९८ अ।
**अनुगामिकता**-परम्परया शुभानुबन्धसुखम्। जीवा० २४२।
**अनुगुणं**-अनुकूलमनुलोमं च। जीवा० ३।
**अनुग्गहे**-अनुग्रहकृत्स्नं, यत् षण्णां मासानामारोपितं षट् दिवसा गतास्तदनन्तरमन्यत् षण्मासान् आपन्नस्ततो यत् अव्यूढं तत्समस्तं झोषितं पश्चात् यदन्यत् षाण्मासिकमापन्नं तद्वहति। व्य० प्र० ११८ आ।
**अनुज्येष्ठ**-पश्चाद्वृत्त्यङ्कः। विशे० ४४३।
**अनुज्ञा**-विधिः। आव० ७१३।
**अनुज्ञातभक्तादिभोजनम्** - अदत्तादानविरमणचतुर्थभावना। प्रश्न० १२८।
**अनुज्ञातसंस्तारकग्रहणम्** - अदत्तादानविरमणद्वितीयभावना। प्रश्न० १२७।
**अनुज्ञापनाय**-अनुमत्यै। आव० ५४२।
**अनुतटभेदः**-वंशवत् तटभेदः। ठाणा० ४७५।
**अनुत्संकलितम्**-अवितीर्णम्। आचा० ३६।
**अनुदिशं**-उपाध्यायप्रवर्त्तिनीलक्षणम्। व्य० द्वि० २०० अ। अनुदिक्। व्य० द्वि० १९६ आ। व्य० द्वि० २०४ आ।
**अनुद्धातकृत्स्न** - कालगुरु निरन्तरं वा। व्य० प्र० ११८ आ।
**अनुद्धरिः**-कुन्थुविशेषः, त्रीन्द्रियजीवभेदः। उत्त० ६९५। चलन्नेव कुन्थुः स विभाव्यते। ठाणा० ४३०।
**अनुनादि**-वाण्यतिशयविशेषः। सम० ६३।
**अनुपथ**-मार्गमध्यः। आचा० २६५।
**अनुपरतम्**-उत्सन्नं, बाहुल्येन। आव० ५९०।
**अनुपरिहारकाः**-पारिहारकवैयावृत्यकराः। ठाणा० ३२४।
**अनुप्रवाचयति**-(अनुपयाएइ), अनु-परिपाट्या प्रकर्षेण विशिष्टार्थावगमरूपेण वाचयति। जीवा० २५४।
**अनुप्रास**-अलङ्कारविशेषः। जं० प्र० १४३।
**अनुप्रेक्षा**-मनसा ग्रन्थार्थयोरभ्यासः। तत्त्वा० ९-२५।
**अनुप्रेक्षितम्**-ध्यातम्। ठाणा० १७३।
**अनुभवसञ्ज्ञा**-स्वकृतासातवेदनीयादिकर्मविपाकोदयसमुत्था। जीवा० १५।
**अनुभूयते**-लक्ष्यते। विशे० १७६।
**अनुमतं**-कामम्। आव० ५२७।
**अनुमानं** - साधनधर्म्ममात्रात् साध्यमात्रनिर्णयात्मकम्। ठाणा० ४९२।
**अनुयोगद्वाराणि**-व्याख्याङ्गानि। आचा० ३।
**अनुलिखन्**-अभिलङ्घयन्। जीवा० १७५।
**अनुलेपनेन**-सकृल्लिप्तस्य पुनः पुनरुपलेपनेन। सम० ११६।
**अनुलोम**-उत्सर्गः। ओघ० ६५।
**अनुलोमवचनसहितत्वं**-प्रतिरूपविनयविशेषः। व्य० प्र० २२ अ।
**अनुल्वण**-अनुद्भटः। जीवा० २७५।
**अनुपातनम्**-उच्चारणम्। आव० ८३५।
**अनृतम्**-असत्यम्। ठाणा० ५००।
**अनेकजातिसंश्रयाद्विचित्रम्**-वाण्यतिशयविशेषः। सम० ६३।
**अनैकान्तिकः**-हेतुदोषविशेषः। ठाणा० ४९३।
**अनुशयः**-क्रोधः। उत्त० ३७७।
**अनुश्रेणि**-ऋजुश्रेणिः। उत्त० ५९७।
**अनुष्ठानं**-(अणुट्ठाणं)-विहितम्। आव० ६१९।
**अनुसारगतिः**-अनुपातगतिः। सूर्य० १६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अन्नं**-अन्यत्। उत्त० ११७। मण्डकखण्डखाद्यादिसमस्तमपि भोजनम्। उत्त० ३६९।

**अन्नंति**-अनुयन्ति, आगच्छन्ति। ओघ० १२६।

**अन्नंदाइं**-असूया, अन्यामिदानीं वा। आव० ५०९।

**अन्न**-अन्यः। भग० ३१७। अन्न-भर्त्तः। दश० २१६।

**अन्नइलाय**-अन्नतिलाए, दोषान्नभोजी। प्रश्न० १०६।

**अन्नइलायए**-अन्नं विना ग्लानो भवति। भग० ७०५।

**अन्नइलायचरए**-अन्नग्लानको दोषान्नभुगिति, अथवा अन्नं विना ग्लायकः-समुत्पन्नवेदनादिकारण एव, अन्यस्मै वा ग्लायकाय भोजनार्थं चरतीति अन्नग्लानकचरकोऽन्न-ग्लायकचरकोऽन्यग्लायकचरको वा। ठाणा० २९८।

**अन्नउत्थिए** - अन्यतीर्थिकः, चरकपरिव्राजकभिक्षुभौतादिकः। आव० ८११।

**अन्नउत्थिता**-अन्ययूथिकाः-अन्यतीर्थिकाः। ठाणा० १३५।

**अन्नउत्थिय**-अन्ययूथिकः, अन्यतीर्थिकः, चरकादिकः। जीवा० १४३।

**अन्नकाले**-अन्नकालः, सूत्रार्थपौरुष्युत्तरकालं भिक्षाकालः। सूत्र० ३०१।

**अन्नकिच्चकरो**-अन्यतृप्तिकरः। आव० ७२०।

**अन्नगिलाय**-पर्युषितम्। आचा० ३१३।

**अन्नत्थ**-अन्यत्र, परिवर्जनार्थे। प्रज्ञा० २५३। व्य० प्र० १६४ आ।

**अन्नधम्मिय**-अन्यधार्मिकः, मिथ्यादृष्टिः। ओघ० २८।

**अन्नपर**-अन्यपरं-अन्यरूपतया परमन्यत्। आचा० ४१५।

**अन्नपाणं**-अन्नपानम्, ओदनकाञ्जिकादि। उत्त० ३६३।

**अन्नभयं**-परचक्रभयं। नि० चू० द्वि० २१ अ।

**अन्नभावेणं**-अन्यभावः-योऽसौ गन्ता सोऽन्यभावः, उन्नि-ष्क्रमितुकामः। ओघ० २२।

**अन्नमन्नं**-अन्योऽन्यं-परस्परं। ठाणा० १६२।

**अन्नमन्नओगाढाइं**-एकक्षेत्राश्रितानि। भग० ७५८।

**अन्नमन्नगढिया** - अन्योऽन्यग्रथिता, परस्परगुम्फिता। भग० २१५।

**अन्नमन्नगुरुयत्ता** - अन्योऽन्यगुरुकता, अन्योऽन्येन ग्रन्थनाद्गुरुकता-विस्तीर्णता। भग० २१५।

**अन्नमन्नगुरुयसंभारियत्ता** - अन्योऽन्यगुरुकसम्भारिकता, अन्योऽन्येन गुरुकं यत्सम्भारिकं तद्भावस्तत्ता। भग० २१५।

**अन्नमन्नघडत्ताए**-परस्परसमुदायता। भग० ७५८।

**अन्नमन्नपुट्ठाइं**-आगाढाश्लेषतः। भग० ७५८।

**अन्नमन्नबद्धाइं**-गाढाश्लेषतः। भग० ७५८।

**अन्नमन्नभारित्ता**-अन्योऽन्यभारिकता, अन्योऽन्यस्य यो भारः स विद्यते यत्र तदन्योऽन्यभारिकं तद्भावस्तत्ता। भग० २१५।

**अन्नयरंसत्थं**-अन्यतरत् शस्त्रम्: सर्वशस्त्रम्, एकधारादि-शस्त्रव्यवच्छेदेन सर्वतोधारशस्त्रकल्पम्। दश० २०१।

**अन्नयर**-अन्यतरम्, स्तोकम्। दश० १९८। प्रतिकूलम्। आचा० ३४२।

**अन्नयरायम्मि**-अन्यतरस्मिन्। उत्त० ५४३।

**अन्न भण**-अन्येनाकृष्यमाणः। ओघ० १६५।

**अन्नलिंगे**-अन्यलिङ्गम्, साधुलिङ्गम्। आव० १३४।

**अन्नवत्थुवन्नास**-अन्यवस्तूपन्यासः, उपन्यासस्य द्वितीयो भेदः। दश० ५५।

**अन्नवालए**-अन्यपालः-अन्ययूथिकः। भग० ३२३।

**अन्नवेल**-तत्रान्यस्यां - भोजनकालापेक्षयाऽऽद्यावसानरूपायां वेलायां-समये चरतीति। ठाणा० २९८।

**अन्नहाभावो**-अन्यथाभावः। बृ० द्वि० २८९ अ। उन्निष्क्रमणाभिप्रायः। ओघ० ८१।

**अन्नाइट्ठे**-अन्याविष्टः-अभिव्याप्तः। भग० ६८३।

**अन्नाओ**-अन्यस्मात्, अन्येन द्वारेण। उत्त० २१९।

**अन्नाणं**-अज्ञानम्, मिथ्याज्ञानम्। उत्त० १५१। मिथ्यात्वतिमिरोपप्लुतदृष्टेर्जीवस्य विपर्ययः। विशे० ८७३। द्रव्य-पर्यायविषयबोधाभावः। ठाणा० १५४। लौकिकश्रुतम्। ठाणा० ४५१।

**अन्नाणतावादा**-अज्ञानमेव श्रेय इत्येवंप्रतिज्ञाः। ठाणा० २६८।

**अन्नाणकिरिया** - अज्ञानात् वा चेष्टा कर्म वा सा। ठाणा० १५३।

**अन्नाणदोसे** - अज्ञानदोषः-अज्ञानात् - कुशास्त्रसंस्कारात् हिंसादिष्वधर्मस्वरूपेषु नरकादिकारणेषु धर्मबुद्ध्याऽभ्युदयार्थं वा प्रवृत्तिस्तल्लक्षणो दोषः, अज्ञानमेव दोषः। ठाणा० १९०।

**अन्नाणियवाइ**-कुत्सितं ज्ञानमज्ञानं तदेषामस्ति तेऽज्ञानिकास्ते च ते वादिनश्चेत्यज्ञानिकवादिनः। भग० ९४४।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अन्नाणी**-अज्ञानी, मिथ्याज्ञानः। जीवा० ४३९। ज्ञाननिह्नववादी। सूत्र० २०८।

**अन्नाणमूढा**-जो सक्कादिमता अन्नाणा णाणबुद्धीए गेह्णति, णो जतिणं हेउसएहिं दंसियं घडमाणमत्थंपि गिह्णंति। नि० चू० द्वि० ४३ अ।

**अन्नातचरते**-अज्ञातः-अनुपदर्शितस्वाजन्यर्द्धिमत्प्रव्रजितादिभावः सन् चरति-भिक्षार्थमटतीत्यज्ञातचरकः। ठाणा० २९८।

**अन्नायउंछं** - अज्ञातोञ्छम्, विशुद्धोपकरणग्रहणविषयम्। दश० २८०।

**अन्नायएसी** - अज्ञातैषी-अज्ञातः-तपस्वितादिभिर्गुणैरनवगतः एषयते-ग्रासादिकं गवेषयति। उत्त० ४१४।

**अन्नि**-अन्यदीयम्। सूत्र० ३०८।

**अन्निआपुत्तो**-गङ्गाप्राप्तकेवल आचार्यः। (सं०)

**अन्निकापुत्रिक**-आचार्यविशेषनाम। व्य० प्र० १९२ आ।

**अन्नितो**-अन्वितः-युक्तः। उत्त० ४४८।

**अन्नियपुत्ता**-अर्णिकापुत्राः, वैनयिक्यामाचार्याः। आव० ४२९।

**अन्नियपुत्तो**-अन्निकापुत्रः, आर्यिकालाभद्वारे आर्यिकाऽऽनीताहारभोक्ता आचार्यः। आव० ५३७।

**अन्ने** - नानादेशापेक्षया गौरवकुत्सादिगर्भमामन्त्रणवचनमिदम्। दश० २१६।

**अन्नेसमाण**-अन्वेषमाणः, भगवदाज्ञामनुपालयन्। दश० १८७।

**अन्नेसिं**-अन्वेषयेत्-गवेषयेत्। आचा० ७७।

**अन्नो**-अन्यदीयम्। सूत्र० ३०८।

**अन्नोन्नं**-अन्यदन्यद्। ओघ० १४३।

**अन्नोन्नकारणं**-परस्परवैयावृत्यकरणम्। बृ० द्वि० २९२ अ।

**अन्नोन्नघडत्ता** - अन्योऽन्यघटता, परस्परसम्बद्धता। जीवा० ९३।

**अन्यत्वम्** - अनगारद्वयसम्बन्धिनो ये पुद्गलास्तेषां भेदः। भग० ७४१।

**अन्यत्वद्रव्यशुद्धि**-अन्यद्रव्यशुद्धिः, आदेशतो द्रव्यशुद्धेर्भेदः, यथा शुद्धवासा। दश० २११।

**अन्यद्रव्यनानाता**-परमाणोद्व्यणुकादिभेदभिन्नता। आव० २८१।

**अन्यपुष्टः (अण्णपुट्ठ)**-कोकिलः। उत्त० ६५३।

**अन्योऽन्यक्रियासप्तैकक**-सप्तमसप्तकम्। ठाणा० ३८७।

**अन्योऽन्यप्रगृहीतम्**-वाण्यतिशयविशेषः। सम० ६३।

**अन्योऽन्याविभागसम्बद्ध**-क्षीरनीरादिकसम्बद्धम्। आव० ३२२।

**अन्वीक्षिष्यामि**-अन्वेषयिष्यामि। आचा० २८२।

**अन्वेषयेत्**-प्रार्थयेत्। आचा० २९०।

**अन्यतीर्थिकः**-सरजस्कादयः। आचा० ३२४। अन्यानि च तान्यर्हत्प्रणीततीर्थादन्यत्वेन तीर्थानि च-निजनिजाभिप्रायेण भवजलधेस्तरणं प्रति करणतया विकल्पितत्वेनान्यतीर्थानि तेषु भवाः, ते च शाक्यसरजस्कादयः। उत्त० २९९।

**अपइट्ठाणे**-अप्रतिष्ठानः, सप्तम्यां नरकावासविशेषः। प्रज्ञा० ८३।

**अपकर्षणं**-ह्रासः। ठाणा० २२२।

**अपकसंती**-परिहसन्ती नीयमाना वा। ठाणा० ३२८।

**अपकिट्ठ**-अपकृष्टम्। किञ्चिदूनम्। भग० २९२।

**अपक्खग्गाही**-अपक्षग्राही, न पक्षं शास्त्रबाधितं गृह्णाति इति। ठाणा० ४४१।

**अपक्खो**-कालपक्खो। नि० चू० द्वि० ३३ आ।

**अपचयद्रव्यमन्दः**- कृशशरीरतया प्रवासं न कर्तुमीष्टे। बृ० प्र० ११३ अ।

**अपचयभावमन्दः**-बुद्धेरभावेन हिताहितप्रवृत्ति-निवृत्ती न कर्तुमीशः। बृ० प्र० ११३ अ।

**अपच्चक्खाणकसाए**-देशविरतिप्रतिबन्धको मोहः। सम० ३१।

**अपच्चक्खाणकिरिआ**-सूत्रकृताङ्गे द्वितीयश्रुतस्कन्धाध्ययनविशेषः। सम० ४२।

**अपच्चक्खाणकिरिया**-अप्रत्याख्यानक्रिया, विंशतिक्रियामध्ये पञ्चमीक्रिया। आव० ६१२। अविरतिस्तन्निमित्तः कर्मबन्धः। ठाणा० ४१। निवृत्त्यभावेन क्रिया-कर्मबन्धकारणम्, सम्यग्दृष्टेश्चतुर्थी क्रिया। प्रज्ञा० ३३४। प्रत्याख्यानक्रियाया अभावः, अप्रत्याख्यानजन्यः कर्मबन्धो वा। भग० १०१।

**अपच्चक्खाणा**-अप्रत्याख्यानः। प्रज्ञा० ४६८। कषाया एव। आव० ७७। देशविरत्यावारकः। ठाणा० १९४।



Jain Education International 2010_05　For Private & Personal Use Only　www.jainelibrary.org

**अपञ्चलो**–अपचलः, असमर्थः। आव० ५३७। अयोग्यः। नि० चू० द्वि० २५ आ।

**अपच्छिमं**–अपश्चिमम्, चरमम्। आव० ५४४। पश्चात्कालभाविन्यः। सम० १२०।

**अपच्छिमा**–अपश्चिमा। आव० ८३९। पश्चिमैवामङ्गलपरिहारार्थमपश्चिमा। ठाणा० ५७।

**अपज्जत्तं**–अपर्याप्तम्–अशक्तः। उत्त० ४०८।

**अपज्जत्ता**–अपर्याप्ता, पर्याप्तभाषाविपरीतो भाषाभेदः। दश० २१०।

**अपज्जत्तिया**–अपर्याप्तिका, या मिश्रतया उभयप्रतिषेधात्मकतया वा न प्रतिनियतरूपतयाऽवधारयितुं शक्यते सा, भाषाया द्वितीयो भेदः। प्रज्ञा० २५५।

**अपज्जोसवण**–अपत्ते अतीते वा जो पज्जोसवति। नि० चू० प्र० ३३६ अ।

**अपडिकम्म**–शरीरप्रतिकर्मवर्जितम्। भग० ६२६।

**अपडिण्णे**–अप्रतिज्ञः, नास्य प्रतिज्ञा विद्यते। आचा० १३२। अनिदानो, वसुदेववत् संयमानुष्ठानं कुर्वन् निदानं न करोति। आचा० १३३। यदि वा स्याद्वादप्रधानत्वान्मौनीन्द्रागमस्यैकपक्षावधारणं प्रतिज्ञा तद् रहितः। आचा० १३३। अनिदानः। आचा० ३०६।

**अपडिबद्धया**–अप्रतिबद्धता, स्वजनादिषु स्नेहाभावः। भग० ९७।

**अपडिभाणी**–अप्रतिभाषी। आचा० ३०६।

**अपडिरूवा**–अप्रतिरूपा। उत्त० ११३।

**अपडिलेह**–अल्पार्थे नञ्, ततोऽप्रत्युपेक्षित इति अल्पोपकरणत्वादल्पप्रत्युपेक्षः। उत्त० ५९०।

**अपडिवाती**–अवधिज्ञानभेदः। ठाणा० ३७०।

**अपढमसमयनियंठो**–अप्रथमसमयनिर्ग्रन्थः, यः शेषेषु समयेषु वर्त्तमानः सः। उत्त० २५७।

**अपतिट्ठिए**–अप्रतिष्ठितः – आक्रोशादिकारणनिरपेक्षः केवलं क्रोधवेदनीयोदयाद् यो भवति सः। ठाणा० १९३।

**अपत्तं**–अपात्रं–अभाजनम्। नि० चू० तृ० ८० अ।

**अपत्तपडिच्छण**–अप्राप्तामपि वेलाम् प्रतिपालयति। ओघ० ४९।

**अपत्ति**–अप्रीतिः। आव० २०१।

**अपत्तियं**–अप्रीतिकम्। आव० २७३। अपात्रिकाम्–अविद्यमानाधाराम्। भग० ७०५।

**अपत्तियंते**–अप्रत्येति। बृ० द्वि० २२८ आ।

**अपत्थं**–अपथ्यं–अहितम्। उत्त० २७६।

**अपत्थिअपत्थिआ**–अप्रार्थितप्रार्थकः। आव० १९२।

**अपत्थियपत्थए**–अप्रार्थितं प्रार्थयते यः सः। भग० १७४।

**अपदंसो**–पित्तारुअं। नि० चू० प्र० ११७ अ।

**अपदपतितं**। जीवा० १९९।

**अपद्रापयेत्**–जीविताद्व्यपरोपयेत्। आचा० ४२८।

**अपदलम्**–अपशदं द्रव्यं (दलं) कारणभूतं मृत्तिकादि यस्यासावपदलः, अवदलति वा दीर्यत इत्यवदलः आमपक्वतयाऽसार इत्यर्थः। ठाणा० २७९।

**अपद्रावन्ति**–प्राणान्मुञ्चन्ति। आचा० ५५।

**अपद्वारं**–कुत्सितद्वारम्। ठाणा० ४०२।

**अपद्वारिका**–(अवदारिआ)–स्थानविशेषः। बृ० द्वि० २७२ आ।

**अपध्यानम्**–विस्रोतसिका। आव० ६०२।

**अपनीतः**–विधूतः प्रकम्पितो वा। आव० ५०७।

**अपनीता**–विनाशिता। ओघ० ४६।

**अपभ्रंशः**–तत्तद्देशेषु शुद्धं भाषितम्। जं० प्र० २५९।

**अपमज्जियं**–अप्रमार्जितम्, द्वितीयासमाधिस्थानम्। आव० ६५३।

**अपमज्जियचारि**–अप्रमार्जितचारी, असमाधिस्थाने द्वितीयो भेदः। सम० ३७।

**अपमज्जियदुप्पमज्जियसिज्जासंथारए**–अप्रमार्जितदुष्प्रमार्जितशय्यासंस्तारकः, शय्यादेश्चक्षुषा न प्रत्युपेक्षणं, शय्यादेरुद्भ्रान्तचेतसा प्रत्युपेक्षणं दुष्प्रत्युपेक्षणं यस्य सः। आव० ८३५।

**अपमत्ते**–अप्रमत्तः–निद्रादिप्रमादरहितः। आचा० ३०७।

**अपमानभीरु**–भिक्षां भ्रमन्नपि न यस्य तस्यैव वेश्मनि प्रवेष्टुमिच्छति, यदि वा 'ओमाणं' ति प्रवेशः, स च स्वपक्षपरपक्षयोस्तद्भीरुर्गृहिप्रतिबन्धेन मा मां प्रविशन्तमवलोक्यान्ये साधवः सौगतादयो वाऽत्र प्रवेक्ष्यन्तीति। उत्त० ५५२।

**अपमित्यकः**–षष्ठः शबलदोषः। प्रश्न० १४४।

**अपयं**–अपदम्, पद्यविधौ पद्ये विधातव्येऽन्यच्छन्दोऽभिधानम्। सूत्रदोषविशेषः। आव० ३७४। न विद्यते पदम्–अवस्थाविशेषो यस्य स। आचा० २३१।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अपयाण**-अपादानं-मर्यादया दानं (खण्डनं)। आव० २७८।

**अपया**-लोमसीआदि। नि० चू० प्र० ३ आ।

**अपर**-संयमः। आचा० १६७।

**अपरच्छं**-अपराक्षम्, असमक्षं, अधर्मद्वारस्य त्रिंशत्तमं नाम। प्रश्न० ४३।

**अपरद्धो**-अपराद्धः, व्याप्तः। आव० १०८।

**अपरमं**-दुक्खम्। दश० चू० ६२।

**अपरमविद्धम्**-वाण्यतिशयविशेषः। सम० ६३।

**अपराइआ**-वप्रावतीविजये अपराजिता राजधानी। जं० प्र० ३५७।

**अपराइए**-प्रतिवासुदेवनाम। सम० १५४।

**अपराइय**-पद्मबलदेवस्य पूर्वभवनाम। सम० १५३।

**अपराजिअ**-अपराजितः, अरजिनप्रथमभिक्षादाता। आव० १४७।

**अपराजिआ** - अपराजिता, राजधानीनाम। जं० प्र० ३५२। पौरस्त्यरुचकवास्तव्याऽष्टमी दिक्कुमारी। जं० प्र० ३९१। रात्रिनाम। जं० प्र० ४९१। चन्द्रस्याग्रमहिषीनाम। जं० प्र० ५३२। पञ्चबलदेवमाता। आव० १६२।

**अपराजिए**-ग्रहविशेषः। ठाणा० ७९।

**अपराजित**-जगतीद्वारनामविशेषः। सम० ८८।

**अपराजिता** - अपराजिता, अञ्जनपर्वते पुष्करणीविशेषः। ठाणा० २३१। अनुत्तरोपपातिकविमानविशेषः। प्रज्ञा० ६९।

**अपराजिते**-जगतीद्वारनामविशेषः। ठाणा० २२५।

**अपराजिय**-कुन्थुजिनप्रथमभिक्षादाता। सम० १५१।

**अपराजिया** - अपराजिता-सैद्धान्तिकरात्रिनाम। सूर्य० १४७। अष्टमबलदेवमाता। सम० १५२। अङ्गारकमहाग्रहस्याग्रमहिषी। भग० ५०५, ठाणा० २०४। सुविधिनाथदीक्षाशिबिका। सम० १५१। विदेहेषु राजधानीविशेषनाम। ठाणा० ८०। राजधानीविशेषः। ठाणा० ८०।

**अपराधालोचना**-आलोचनाभेदः। व्य० प्र० ४८ आ।

**अपरिआविआ** - अपरितापिताः, स्वतः परतो वाऽनुपजातकायमनःपरितापाः। जं० प्र० १२६।

**अपरिकम्म**-अपरिकर्म-व्याघाते गिरिभित्तिपतनाभिघातादिरूपे संलेखनामविधायैव भक्तप्रत्याख्यानादि क्रियते तत्। उत्त० ६०३।

**अपरिक्खिउ**-अनालोच्य। नि० चू० प्र० ९८ आ।

**अपरिखेदित्तं**-वाण्यतिशयविशेषः। सम० ६३।

**अपरिग्गहियागमणे** - अपरिगृहीतागमनम्, वेश्या अन्यसत्कगृहीतभाटी कुलाङ्गना अनाथा वा तस्या गमनं-मैथुनासेवनम्। आव० ८२५।

**अपरिग्गहो**-अपरिग्रहः, धर्मोपकरणवर्जपरिग्राह्यवस्तुधर्मोपकरणमूर्च्छावर्जितः। प्रश्न० १४२। न विद्यते धर्मोपकरणादृते शरीरोपभोगाय स्वल्पोऽपि परिग्रहो यस्य सः। सूत्र० ४९। अगीतार्थः तदायत्ताश्च। व्य० प्र० २३३ अ।

**अपरिणत**-अमार्गस्थः। आव० ८५१।

**अपरिणते**-भोजनपरिणत्यभावः। ओघ० २३।

**अपरिणय**-स्नेहप्रायः। ओघ० ८९। कालग्रहणभावोऽपगतोऽन्यचित्तो वा जातः। ओघ० २०३। अपरिणतः-एषणादोषविशेषः। आचा० ३४५। अविश्वस्तः। आचा० ३४८।

**अपरिणामा** - अपरिणामाः, अपरिणतजिनवचनरहस्या। विशे० ९३१। अपरिणामिकः। व्य० प्र० ७२ अ।

**अपरितंतजोगी** - अपरितान्तयोगी, अविश्रान्तसमाधिः। अन्त० २३, अनुत्त० ४। अपरितान्ताः-अश्रान्ताः योगाः-मनःप्रभृतयः सदनुष्ठानेषु यस्य सः। प्रश्न० १०९।

**अपरितंतो**-वैयावृत्त्यादौ अनिर्वेदी। बृ० तृ० ९२ आ। अनिर्विण्णो। बृ० प्र० २२१ अ।

**अपरिताविय**-अपरितापितः, स्वतः परतो वाऽनुपजातकायमनःपरितापः। जीवा० २८४।

**अपरिपुण्णं**-अपरिपूर्णम्, सद्गुणविरहात्तुच्छम्। सूत्र० ३२६।

**अपरिभुत्तं**-अपरिभुक्तम्। आचा० ३२५।

**अपरिभुत्त**-अपरिभुक्तः, अनाक्रान्तः। ओघ० ५७।

**अपरिमाण**-अपरिमाणः-अनन्तः। आचा० २४१।

**अपरिमितम्**-अमितम्। आव० ५९५।

**अपरिमियपरिग्गहं**-अपरिमितपरिग्रहः। आव० ८२५।

**अपरिमियमणंता** - अपरिमितानन्ताः - अत्यन्तानन्ताः। प्रश्न० ९२।

**अपरियाइत्ता**-अपर्यादाय-समन्तादगृहीत्वा। ठाणा० ९०। अपर्यादाय-अगृहीत्वा। भग० ६४३। जीवा० ३७५। ठाणा० ४६।

**अपरियाणित्ता**-अपरिज्ञाय। ठाणा० ४६।

**अपरियावणया**-शरीरपरितापानुत्पादनेन। भग० ३०५।

**अपरिसाडिं**-अनवयवोज्झनम्। भग० २९४।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अपरिसाडि**-अपरिशाटि, परिशाटिवर्जितम् । प्रश्न० ११२ ।

**अपरिसाडी**-वंसकंषिमादी । नि० चू० प्र० १६८ अ ।

**अपरिसुद्धं**-अपरिशुद्धम्, अयुक्तियुक्तम् । आव० ५७६ ।

**अपरिस्साइ** - न परिश्रवति-नालोचकदोषानुपश्रुत्यान्यस्मै प्रतिपादयति य एवंशीलः सोऽपरिश्रावीति । ठाणा० ४२४ ।

**अपरिस्सावी**-अपरिश्रावी-अबन्धको निरुद्धयोगः । भग० ८९१ । अङ्गरकः ( आउ० )

**अपरिहत्थो**-अदक्षः । आव० ५६७ ।

**अपरिहरित्ता** - अपरिहृत्य - द्वित्रैर्मासैर्व्यवधानमकृत्वा । आचा० ३६६ ।

**अपरिहारिया**-अपरिहारिका-साधर्मिकाः । आचा० ३५२ ।

**अपरीत्ता**-साधारणशरीराः । ठाणा० १३२ ।

**अपर्याप्ति**-तत्परिणामयोग्यदलिकद्रव्यमात्मना नोपात्तं (सत्यपि तत्पुद्गलेषु स परिणामो रुध्यते) । तत्त्वा० ८-१२ ।

**अपवरगो**-अपवरकः । जीवा० २६९ । अपवरकम्, अन्तर्गृहम् । ओघ० १५३ ।

**अपवरिका**-अपवरकम् । व्य० द्वि० २०७ आ ।

**अपवर्त्तनम्**-कर्मणां स्थित्यादेरध्यवसायविशेषेण हीनताकरणम् । भग० २५ । उपक्रमैराशुष्कस्य शीघ्रः पाकः । तत्त्वा० २-५२ ।

**अपवर्त्तना**-हानिकरणम् । सूर्य० ११३ ।

**अपवर्त्तयन्**-तिरश्चीनं कुर्वन् । आचा० ३४३ ।

**अपवादः**-कारणं, विशेषवचनं च । जं० प्र० ५४१ । विभागः । नि० चू० तृ० १०५ आ ।

**अपवादम्**-प्रवचनरहस्यम् । बृ० प्र० १३१ अ ।

**अपवादापवादरूपम्**-शाक्यादीनां प्रयोजने रुद्राज्ञो विज्ञापनम् । ठाणा० ३१२ ।

**अपव्वावितो**-न प्रव्रजितः न मुंडितानि कृतानि । व्य० द्वि० २८ आ ।

**अपसत्थविहायगति** - अप्रशस्तविहायोगतिः - नामकर्मविशेषः । प्रज्ञा० ४७४ ।

**अपसिणा**-अप्रश्नाः-या पुनर्विद्या मंत्रविधिना जप्यमाना अपृष्टा एव शुभाशुभं कथयन्ति एताः । सम० १२४ ।

**अपसू**-अपशुः-द्विपदचतुष्पदादिरहितः । आचा० ४०३ ।

**अपहार**-मत्स्यः । ठाणा० ३०९ ।

**अपहुप्पंते**-अप्रभवति, अपूर्यमाणे । पिण्ड० ८८ ।

**अपहृतान्योत्तरम्**-वाण्यतिशयविशेषः । सम० ६३ ।

**अपाईणवाए**-अप्राचीनवातः, यः प्रतीच्या दिशः समागच्छति वातः स । प्रज्ञा० ३० ।

**अपाचीनैः**-अशुभैः । आचा० २५० ।

**अपान्तरालम्**-अबाधा । जीवा० ९४ ।

**अपान्तरालसामान्यम्**-वृक्षत्वगोत्वगजत्वादिकम् । विशे० ८९५ ।

**अपायं**-अपादम्, विशिष्टच्छन्दोरचनायोगात् पादवर्जितं गद्यगुणः । दश० ८८ ।

**अपाय**-सम्यगसम्यगिति गुणदोषविचारणाध्यवसायापनोदः । तत्त्वा० १-१५ ।

**अपायतो**-विश्लेषतः । ठाणा० ४२८ ।

**अपारंगमा**-अपारङ्गमाः, पारः-तटः परकूलं तद्गच्छन्तीति पारङ्गमाः न पारङ्गमाः अपारङ्गमाः । आचा० १२४ ।

**अपावते**-अपापकः-शुभचिन्तारूपः । ठाणा० ४०९ ।

**अपावभाव**-अपापभावः, शुद्धचित्तः । दश० २३ ।

**अपाश्रयः**-आधारः । विशे० ४१५ ।

**अपिः** - सम्भावनानिवृत्त्यपेक्षासमुच्चयगर्हाशिष्यामर्षणभूषणप्रश्नेष्विति । ठाणा० ४९५ । बाढम् । जीवा० १९८ । विद्यमानः । आव० ४५० । च । उत्त० १८२ । इति । ओघ० ३६ । यथाशब्दार्थः, समुच्चयार्थश्च । आचा० ६५ । पुनः । आचा० २८२ । बाढार्थे । जं० प्र० ४६ । एवकारार्थे । आव० ५८९ । अभ्युपगमवादसंसूचकः । आव० ५३१ । बाढम् । जं० प्र० ४१३ ।

**अपिट्टणया**-यष्ट्यादिताडनपरिहारेण । भग० ३०५ ।

**अपियत्ता**-अप्रियता, सर्वेषामेव द्वेष्यतया । भग० २३ ।

**अपीओ**-अपीतः, न पीतः । उत्त० ८७ ।

**अपुज्जो**-अपूज्यः, अवन्दनीयः । आव० ५१९ ।

**अपुट्ठवागरणं**-अपृष्टव्याकरणम्, अपृष्टे सति प्रतिपादनम् । भग० १५७ ।

**अपुणरावत्तयं**-अपुनरावर्त्तकम्ः, कर्मबीजाभावाद्भवावताररहितम् । भग० ७ ।

**अपुणरावित्ति**-अपुनरावर्तकम्-अविद्यमानपुनर्भवावतारम् । सम० ५ ।

**अपुत्तो**-अपुत्रः, स्वजनबन्धुरहितः, निर्मम इत्यर्थः । आचा० ४०३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अपुप्फिय**–अपुष्पितं–तरिकारहितम्। ओघ० १२२। मच्छम्। बृ० प्र० ६८ अ।

**अपुम**–नपुंसकम्। ओघ० ९०।

**अपुरिसंतरकडं** – अपुरुषान्तरकृतं–तेनैव दात्रा कृतम्। आचा० ३२५।

**अपुरिस**–अपुरुषः, नपुंसकः। ठाणा० ३७२।

**अपुव्वो**–अपूर्वः, अननुभूतपूर्वोऽनुभूतपूर्वो वा। अनु० १३७।

**अपुव्वं**–अपूर्वम्, अपूर्वकरणम्। आव० ८५२।

**अपूर्वश्रुतप्रत्याख्यानम्**–आतुरप्रत्याख्यानादिकम्। आव० ४७९। अप्राप्तपूर्वं, स्थितिघात–रसाघाताद्यपूर्वार्थनिर्वर्तकम्। विशे० ५३५। अवृत्तपूर्वम्। आव० २३०, बृ० प्र० १९४अ।

**अपुव्वकरणं**–अपूर्वकरणं–असदृशाध्यवसायविशेषम्। भग० ४३६। अप्राप्तपूर्वम्। आव० ७५। सम्यक्त्वप्राप्तौ करणविशेषः। ठाणा० ३१।

**अपुहुत्ते**–अपृथक्त्वं, अपृथग्भावः, चरणधर्मसङ्ख्याद्रव्यानुयोगानां प्रतिसूत्रमविभागेन वर्तनम्। आव० २८५। अपृथक्त्वानुयोगः–एकस्मिन्नेव सूत्रे सर्व एव चरणादयः प्ररूप्यन्ते। दश० ४।

**अपूरेंतो**–अपूरयन्, अकुर्वन्। आव० २७१। अकुर्वन्, अनाचरन्। आव० २६३।

**अपूर्वभक्तिकम्**–अपूर्वरचनाकम्। ठाणा० ४०१।

**अपेक्षाकारणम्** – दिग्देशकालाकाशपुरुषचक्रादि। ठाणा० ४९४।

**अपेज्जं**–अपेयम्। जीवा० ३७०। अपेयम्–सुरादिकम्। व्य० प्र० ८ अ।

**अपोद्धारः**–साक्षादुक्तिः। आचा० ४९। निरासः। आव० ३०९।

**अपोरसीय**–अपौरुषेयम्, अपुरुषप्रमाणम्। भग० २९०।

**अपोरुसियं**–अपौरुषेयम्, पुरुषप्रमाणरहितम्। भग० ८२।

**अपोह**–अपोहः, पृथग्भावः। ओघ० १२। अपोहनं–निश्चयः। आव० १८। विपक्षनिरासः। भग० ४३३। अपोहनमपोहो–निश्चयः। विशे० २२६।

**अपोहए**–यदादिष्टं गुरुभिरेवं निश्चिनोति। विशे० ३०३।

**अपोहते**–एवमेतत् यदादिष्टमाचार्येणेति पुनस्तमर्थमागृहीतं धारयति करोति च सम्यक्तदुक्तमनुष्ठानमिति। आव० २६।

**अप्पं**–अल्पम्, मूल्यत एरण्डकाष्ठादि। दश० १४७। अभावः, स्तोकं वा। आव० ५८६।

**अप्पइट्ठाणे**–अप्रतिष्ठानः। सम० २। मोक्षः। आचा० २३१।

**अप्पइट्ठिते** – अप्रतिष्ठितः–निरालम्बन एव केवलक्रोधवेदनीयादुपजायते यः क्रोधः। प्रज्ञा० २९०।

**अप्पईकारं**–अप्रतीकारम्, सूतिकर्मादिरहितम्। प्रश्न० २२।

**अप्पउलिओसहिभक्खणया**–अपक्वौषधभक्षणता। आव० ८२८।

**अप्पए**–शरीरे। आव० ५५५।

**अप्पकम्मपच्चायाते** – अल्पकर्मप्रत्यायातः –अल्पैः–स्तोकैः कर्म्मभिः करणभूतैः प्रत्यायातः–प्रत्यागतो मानुषत्वमिति, अथवा एकत्र जनित्वा ततोऽल्पकर्मा सन् यः प्रत्यायातः स तथा लघुकर्मतयोत्पन्नः। ठाणा० १८०।

**अप्पकिरियतराए** –अल्पक्रियत्वम् – तथाविधकायिक्यादिकष्टक्रियाऽपेक्षम्। भग० ७६९।

**अप्पकुक्कुई** – अल्पकौत्कुचः, अल्पस्पन्दनः, अल्पं–असत् 'कुकुयं' कौत्कुचं–करचरणभ्रूभ्रमणाद्यसच्चेष्टात्मकमस्येति। उत्त० ५९।

**अप्पक्खमं**–आत्मक्षमां–आत्महिताम्। ओघ० १८९।

**अप्पक्खरं**–अल्पाक्षरम्, सूत्रगुणः। आव० ३७६।

**अप्पग्घ**–अल्पार्घम्, स्वल्पमूल्यम्। भग० १९९।

**अप्पच्चओ**–अप्रत्ययः, प्रत्ययाभावः। अधर्मद्वारस्य चतुर्विंशतितमं नाम। प्रश्न० २६। अप्रत्ययकारणत्वात्। अधर्मद्वारस्य सप्तदशं नाम। प्रश्न० ४३।

**अप्पच्चक्खाण**–अप्रत्याख्यानम्, सर्वप्रत्याख्यानं देशप्रत्याख्यानं च येषां उदये न लभ्यते। विशे० ५४४।

**अप्पच्चक्खाय**–अप्रत्याख्याय–अनिराकृत्य। उत्त० २६६।

**अप्पच्छन्दमईओ**–आत्मच्छन्दमतिः,आत्मच्छन्दा–स्वाभिप्रायकार्यकारी। आव० १००।

**अप्पजूहिए**–सिद्धेऽप्योदनादिके। आचा० ३३५।

**अप्पउज्झं**–आत्मवशं, स्वस्थचित्तम्। बृ० द्वि० २१० अ।

**अप्पज्झाणं**–आत्मध्यानम्, अमुकोऽहं अमुककुले अमुगसिस्से अमुगधम्मट्ठाणट्ठिइए न य तव्विराहणेत्यादिरूपम्। प्रश्न० १२८।

**अप्पझंझे**–अल्पझञ्झः, अविद्यमानकलहविशेषः। औप० ३९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अप्पझंझा** – अल्पझंझाः – विगततथाविधविप्रकीर्णवचनाः। ठाणा० ४४२।

**अप्पडिकुट्ठाइं**–अप्रतिकुष्टे–अनिवारिते। ठाणा० ९३।

**अप्पडिबद्धे**–अप्रतिबद्धः–मनसि निरभिष्वंगता। उत्त० ५८७।

**अप्पडिबुज्झमाणे** –अप्रतिबुद्धयमानः–शब्दान्तराण्यनवधारयन् अप्रत्युह्यमानो वा – अनपह्रियमाणमानसो। भग० ४८३।

**अप्पडिरूवा**–अप्रतिरूपा। आव० ६७५।

**अप्पडिरूवे**–अप्रतिरूपः, अविद्यमानं प्रतिरूपमतिप्रकर्षवत्त्वेनानन्यतुल्यमस्येति। उत्त० १८८।

**अप्पडिलेहणा**–अप्रत्युपेक्षणा, मूलत एव चक्षुषाऽनिरीक्षणा। आव० ५७६।

**अप्पडिलेहियदुप्पडिलेहियउच्चारपासवणभूमि**– अप्रतिलेखितदुष्प्रतिलेखितोच्चारप्रश्रवणभूमिः–पौषधेऽतिचारः। आव० ८३५।

**अप्पडिलेहियदुप्पडिलेहियसिज्जासंथारए** – अप्रतिलेखितदुष्प्रतिलेखितशय्यासंस्तारकः–पौषधेऽतिचारः। आव० ८३५।

**अप्पडिलेहियदूसे**–अप्रतिलेखितदूष्यः। ठाणा० २३४।

**अप्पडिलेहियपणयं**–अप्रतिलेखितदूष्यपञ्चकम्, दूष्यपञ्चकस्य प्रथमो भेदः, तूल्यु१पधानक२गण्डोपधाना३लिङ्गिनी४पोतमयमसूर५भेदभिन्नम्। आव० ६५२।

**अप्पडिवाइ**–अप्रतिपाति, अनुपरतस्वभावम्। आव० ६०८।

**अप्पडिसुणणं**–अप्रतिश्रवणम्, अप्रतिश्रोता। आव० ७२६।

**अप्पडिसेवी**–अप्रतिसेवी–न कुत्सितं कर्म आचरति। ओघ० १६५।

**अप्पडिहओ**–अप्रतिहतः, सौगन्धिकानगर्यधिपतिः। विपा० ९५।

**अप्पडिहट्टु**–अणप्पिणित्ता। नि० चू० प्र० १६९ अ।

**अप्पडिहयं**–अप्रतिहतं, अप्रतिस्खलितम्। जीवा० २५६।

**अप्पडिहयपच्चक्खायपावकम्मे** – अप्रतिहतप्रत्याख्यातपापकर्मा, न प्रतिहतं तपोविधानेन मरणकालादारात्क्षपितं प्रत्याख्यातं च मरणकालेऽप्याश्रवनिरोधेन पापकर्म येन सः। न प्रतिहतं सम्यग्दर्शनप्रतिपत्तितः प्रत्याख्यातं च सर्वविरत्यङ्गीकरणतः पापकर्म–ज्ञानावरणाद्यशुभं कर्म येन सः। भग० ३६।

**अप्पडिहयवरनाणदंसणधरे** – अप्रतिहतवरज्ञानदर्शनधरः, योऽप्रतिहते कटकुड्यादिभिरस्खलितेऽविसंवादके वा वरे–प्रधाने ज्ञानदर्शने–विशेषसामान्यबोधात्मके धारयति सः। भग० ७।

**अप्पडिहो**–अप्रतिघः (भक्त०)

**अप्पणं**–अर्पणं, प्राधान्येन विवक्षणम्। विशे० १२७७, ७७१।

**अप्पणच्चिय**–आत्मीयम्, स्वकीयम्। भग० १३२।

**अप्पणट्ठा**–आत्मार्थम्, आत्मनिमित्तम्। दश० २४९।

**अप्पणियं**–आत्मीयं। आव० १८९।

**अप्पणिया**–आत्मीया। आव० २१२।

**अप्पतिट्ठाणं**–अप्रतिष्ठानम्, नरकविशेषः। आव० ३४८।

**अप्पतुमंतुमा** – अल्पतुमन्तुमाः – विगतक्रोधकृतमनोविकारविशेषाः। ठाणा. ४४२।

**अप्पतुमंतुमे**–अल्पम्–अविद्यमानं त्वं त्वमिति स्वल्पापराधिन्यपि त्वमेवं पुराऽपि कृतवान् त्वमेवं सदा करोषीत्यादि पुनः पुनः प्रलपनं यस्य सः। उत्त० ५८९।

**अप्पतेअं**–अल्पतेजः–तेजशून्यः। दश० २७६।

**अप्पत्तियं**–अप्रीतिकम्। उत्त० ९०। दश० चू० १२५। पच्चामरिसकरणम्। नि० चू० प्र० ३१ अ। मनसः पीडां कुर्यात्। आचा० ४०५। क्रोधः। सूत्र० ३४। अप्रेम। भग० २९२। मनसः दुष्प्रणिधानम्। सूत्र० ३३१।

**अप्पपरिकम्मं**–तूननं, सन्धानं दशाछेदनं वा। बृ० द्वि० २०२ आ।

**अप्पपाणं**–अल्पप्राणम्, अल्पाः–अविद्यमानाः प्राणाः–प्राणिनो यस्मिंस्तत्, अवस्थितागन्तुकजन्तुविरहितम्। उत्त०६०।

**अप्पपुण्णेहिं**–अपुण्यैः–अनार्यैः पापाचारैः। आचा० ३०३।

**अप्पभाए**–अप्रभातः। आव० ३०१।

**अप्पभक्खी**–अल्पलघुभक्षी–अल्पानि–स्तोकानि लघूनि निःसाराणि निष्पावादीनि भक्षयितुं शीलमस्य। उत्त० ४२०।

**अप्पभु**–अप्रभवः–भृतकादयः। ओघ० १६३।

**अप्पभूतं**–अल्पभूतां–अल्पां। ठाणा० २९४।

**अप्पमज्जणा**–अप्रमार्जना, मूलत एव रजोहरणादिनाऽस्पर्शना। आव० ५७६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अप्पमज्जियदुप्पमज्जियउच्चारपासवणभूमी** – अप्रमार्जितदुष्प्रमार्जितोच्चारप्रश्रवणभूमिः–पौषधेऽतिचारः। आव० ८३५।

**अप्पमत्तो**–अप्रमत्तः, गुरुपारतन्त्र्यापहारिप्रमादपरिहर्त्ता। उत्त० २२३। अप्रमत्तसंयतग्रामः, भूतग्रामस्य सप्तमं गुणस्थानम्। आव० ६५०। आत्महितेषु जाग्रन्। आचा० १७२। प्रयत्नवान्। ओघ० २२१।

**अप्पमाए**–अप्रमादः, योगसङ्ग्रहे षड्विंशतितमो योगः। आव० ६६४। अकर्मकम्। सूत्र० १६९।

**अप्पमाओ**–अप्रमादः, उत्तराध्ययनेषु एकोनत्रिंशत्तममध्ययनम्। उत्त० ९। सम० ६४। उवओगपुव्वकरणक्रियालक्खणो। नि० चू० प्र० २९ अ।

**अप्पमाणभोती** – अप्रमाणभोजी, द्वात्रिंशत्कवलाधिकाहारभोक्ता। प्रश्न० १२५।

**अप्पमातो**–अप्रमादः प्रमादवर्जनम्, अहिंसाया एकोनपञ्चाशत्तमं नाम। प्रश्न० ९९।

**अप्पयं**–आत्मानम्। अल्पमेव वा। उत्त० ९०।

**अप्पयाणयं**–अप्रयाणम्। आव० ३८५।

**अप्परए** – अल्परतः, अल्पं–अविद्यमानं रतमिति क्रीडितं मोहनीयकर्मोदयजनितमस्येति, लवसप्तमादिः, अल्परजाः, प्रतनुबध्यमानकर्मा। उत्त० ६७।

**अप्परिसाडियं**–अपरिसाटिकम्, परिसाटविरहितम्। उत्त० ६१।

**अप्परिहारिए**– अपरिहारिकः-पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दरूपः। आचा० ३२४।

**अप्पलीयमाणा** – अप्रलीयमानाः–अनभिषक्ताः। आचा० २४१।

**अप्पलेवा**–अल्पलेपा, निर्लेपा, चतुर्थी पिण्डैषणा। आव० ५७२। अप्पलेवा–जस्स दिज्जमाणस्स णिप्पावचणगादिगस्स लेवो ण भवति सा। नि० चू० तृ० १२ अ।

**अप्पवणिज्जोदग**–अपातव्यजला मेघाः। भग० ३०६।

**अप्पवुट्ठिकाए**– अल्पवृष्टिकायः, अल्पः–स्तोकोऽविद्यमानो वा वर्षणं वृष्टिः–अधःपतनं वृष्टिप्रधानः कायो–जीवनिकायो व्योमनि पतदप्काय इत्यर्थः, वर्षणधर्म्मयुक्तं वोदकं वृष्टिः, तस्याः कायो–राशिर्वृष्टिकायः अल्पश्चासौ वृष्टिकायश्चाल्पवृष्टिकायः। ठाणा० १४१।

**अप्पसत्थाओ**-अप्रशस्ताः-आश्रेयस्योऽनादेयाः। ठाणा० १७५।

**अप्पसद्दा** – अल्पशब्दाः–विगतराटीमहाध्वनयः। ठाणा० ४४२।

**अप्पससरक्खं**–अल्परजस्कम्। आचा० ३३७।

**अप्पसागारियं**–अल्पसागारिकम्। आव० १९५। अल्पगृहस्थम्। उत्त० ९०। आव० ३५८।

**अप्पसावज्जं** – अल्पसावद्यम्, अपापं, स्तोकपापं वा। आव० ५८६।

**अप्पसाहणो**–अल्पसाधनः, बलादिरहितः। आव० ७१२।

**अप्पहाणो**–अप्रधानः, लघुः। उत्त० १४९।

**अप्पहिट्ठे**–अप्रहृष्टम्, अहसन्। दश० १६६।

**अप्पा**–आत्मा, अभिहितरूपस्तदाधाररूपो वा देहः। उत्त० ५३। शरीरम्। प्रज्ञा० ३०५। अतति सन्ततं गच्छति शुद्धिसङ्क्लेशात्मकपरिणामान्तराणीति। उत्त० ५२। नि० चू० प्र० १५ अ। आत्मा–स्वभावः। ठाणा० ६१।

**अप्पाइय**–आप्यायितः। आव० ७१६।

**अप्पाउरण**–अप्रावरणः, अभिग्रहविशेषः। आव० ८५४।

**अप्पाणं** – आत्मानम्, अतीतसावद्ययोगकारिणमश्लाघ्यम्। अत्राणम्–अतीतसावद्ययोगत्राणविरहितम्। अतनम्–अतीतं सावद्ययोगं सततभवनप्रवृत्तं निवर्तयामि। आव० ४८६।

**अप्पाणमेव**–आत्मनैव। उत्त० ३१४। आत्मानं–अंतरात्मानम्। आचा० २८३।

**अप्पायंक**–अल्पातङ्कः, रोगरहितः। आव० ७९३। अरोगी। आचा० ३९३।

**अप्पाहंति**–सन्दिशन्ति। बृ० तृ० ४४ आ।

**अप्पाहट्टु**–आहृत्य, व्यवस्थाप्य, अपाहृत्य वा। सूत्र० २७४।

**अप्पाहणया**–सन्देशकस्तथैव दातव्यः। ओघ० १०२।

**अप्पाहारं**–अप्पधारणा, सामर्थ्यम्, अप्पाहारता जत्थ तं। नि० चू० तृ० ८२ आ।

**अप्पाहार**–अल्पाहारः, ऊनोदरतायाः प्रथमो भेदः। दश० २७। ठाणा० १४९।

**अप्पाहारे**–अल्पाधारः–तमेव पृष्ट्वा सूत्रार्थवाचनां ददाति। बृ० तृ० १३३ आ। अल्पाहारः, अष्टकवलाहारः। औप० ३८। भग० ९२१। स्तोकाहारः, साधुः। भग० २९२। स्तोकाशी, षष्ठाष्टमादिसंलेखनाक्रमायातं तपः कुर्वन् यत्रापि पारयेत्तत्राप्यल्पमित्यर्थः। आचा० २९०।



Jain Education International 2010_05　　For Private & Personal Use Only　　www.jainelibrary.org

**अप्पाहारो**-जो आयरिओ संकियसुत्तत्थो तं चेव पुच्छिउं वायणं देति, तारिसं ति मोत्तुं ण गंतव्वं । नि० चू० तृ० ९३ आ ।

**अप्पाहिंति**-सन्दिशन्ति । बृ० द्वि० ११४ आ । सन्दिशतः । आव० ३०२ ।

**अप्पाहिकरणे**-अल्पाधिकरणं-निष्कलहं । ठाणा० ४१६ ।

**अप्पाहितो**-सन्दिष्टः । उत्त० २१९ ।

**अप्पाहे**-तद्गुरोस्तत्प्रवर्तिन्या वा एवं सन्दिशति-यथैतामात्मसकाशे कुरुत । ओघ० ४३ ।

**अप्पाहेइ**-सन्दिशति । दश० १०३ ।

**अप्पाहेति**-संदिसइ । नि० चू० प्र० २११ आ ।

**अप्पाहेत्ता**-सन्दिश्य । उत्त० १७३ । आव० ३१० ।

**अप्पिच्छे**-अल्पेच्छः, अल्पा-स्तोका, अल्पशब्दस्याभाववादित्वेनाविद्यमाना वा इच्छा-वाञ्छा वा यस्येति । उत्त० १२४ । न्यूनोदरतयाऽऽहारपरित्यागी । दश० २३१ ।

**अप्पिणिच्चिया**-आत्मीया । आव० २०२ ।

**अप्पितणप्पिते**-अर्पित-विशेषितं, अनर्पितं-अविशेषितम् । ठाणा० ४८३ ।

**अप्पियं**-अर्पितम्, आहितम् । भग० ८९ ।

**अप्पिय**-अप्रियम्, अनिष्टम् । भग० ७२ । अर्पितः, विशेषः । विशे० १३४६ ।

**अप्पियणियं**-अप्रीतिकम्, कलहः । उत्त० ३५५ ।

**अप्पियत्ता**-अप्रियता, अप्रेमहेतुता । भग० २५३ । प्रज्ञा० ५०४ ।

**अप्पियवहा**-अप्रियवधाः-अप्रियं-दुःखकारणम् तत् घ्नन्ति । आचा० १२२ ।

**अप्पुणणकप्पिया**-अपूर्णकलिका-अन्योन्यस्य सुखदुःखोपसंपदं प्रतिपद्यते । व्य० द्वि० ३७८ आ ।

**अप्पुत्थायी** - अल्पोत्थायी, अल्पमुत्थातुं शीलमस्येति । प्रयोजनेऽपि न पुनः पुनरुत्थानशीलः । उत्त० ५८ ।

**अप्पुस्सुए**-अल्पौत्सुक्यः । भग० १७४ । त्वरारहितः । भग० १२३ । अविमनस्कः । आचा० ३७९ ।

**अप्पे**-आप्यः, अपां प्रभवः ह्रदः । भग० १४१ ।

**अप्पो**-अल्पः, सर्वथाऽविद्यमानः । जीवा० १२१ । नास्ति किञ्चिदित्यर्थः । ओघ १७७ । निषद्याद्वयोपेतं रजोहरणं मुखवस्त्रिका चोलपट्टकाश्च । बृ० प्र० १५० आ ।

**अप्पोदए**-अल्पोदके-भौमान्तरिक्षोदकरहिते । आचा० २८५

**अप्पोलं**-दृढवेष्टनाद् घनवेष्टनात् । ओघ० २१४ ।

**अप्पोवही** - अल्पोपधिः, अनुल्बणयुक्तस्तोकोपधिः । दश० २८० ।

**अप्पोसे** - अल्पावश्याये - अधस्तनोपरितनावश्यायविप्रुड्वर्जिते । आचा० २८५ ।

**अप्फंदणया** - भाण्डोचितहस्तपादादिचेष्टाविकलता । व्य० प्र० २३६ अ ।

**अप्फच्चितो**-अइक्कंते । नि० चू० प्र० १४७ आ ।

**अप्फालिया**-शिक्षिताः-उपालब्धाः, उक्ताः । आव० ५५७ ।

**अप्फालेइ** - आस्फालयति, हस्तेनाऽऽताडयति-उत्तेजयति । औप० ६४ ।

**अप्फिडिऊण**-आस्फाल्य । आव० ३४४ ।

**अप्फुण्णा**-व्याप्ताः । बृ० तृ० ७० आ ।

**अप्फुण्णे**-आपूर्णः-परिपूर्णशरीरः । उत्त० ४८३ ।

**अप्फुण्णो**-व्याप्तः । आव० ३५४ ।

**अप्फेया**-वल्लीविशेषः । प्रज्ञा० ३२ ।

**अप्फोआ**-वनस्पतिविशेषः । जं० प्र० ४६ ।

**अप्फोडेइ**-आस्फोटयति, करास्फोटं करोति । भग० १७५ ।

**अप्फोया**-वनस्पतिविशेषः । जीवा० २०१ ।

**अप्फोव**-आस्तीर्णे, वृक्षगुच्छगुल्मलतासंछन्नः । उत्त० ४३८ ।

**अप्रकीर्णप्रसृतं**-वाण्यतिशयविशेषः । सम० ६३ ।

**अप्रतिहत**-( अप्पडिहय ) -कटकुड्यपर्वतादिभिरस्खलिते, अविसंवादके वा । सम० ४ ।

**अप्रत्याख्यानम्**-द्वितियकषायचतुष्कम् । आचा० ९१ ।

**अप्रमार्जितचारित्वम्** - द्वितीयमसमाधिस्थानम् । प्रश्न० १४४ ।

**अप्रोषितः**-सामानिकः, सन्निहितः । विशे० १०६५ ।

**अप्सरा**-दक्षिणपश्चिमरतिकरपर्वतस्य दक्षिणस्यां भूतावतंसिकाराजधान्यधिष्ठात्री, शक्रदेवेन्द्रस्य द्वितीयाग्रमहिषी । जीवा० ३६५ । शक्रस्याग्रमहिषी । जं० प्र० १५९ ।

**अफलवंतकी**-अफलवान्, अप्राप्तिकः । प्रश्न० ६४ ।

**अफव्वंता**-अलभमानाः । नि० चू० प्र० १८३ आ ।

**अफासुअ**-अप्रासुकम्, सचित्तसम्मिश्रादि । दश० २३१ । सचित्तम् । आचा० ३२१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अफासुए**-अप्रासुकम्, न प्रगता असवः-असुमन्तो यस्मात्तदप्रासुकम्-सजीवमित्यर्थः। भग० २२६।

**अफुडिय**-अस्फुटितः-राजीरहितः। आव० २३९।

**अफुण्णे**-आपूर्णम्। प्रज्ञा० ५९२।

**अफुसं**-अस्पृश्यम्, अबन्धनीयम्। भग० १०४।

**अफुसमाणगतिपरिणामे**-अस्पृशद्गतिपरिणामः, अस्पृशतो गतिपरिणामः। प्रज्ञा० २८९।

**अफुसमाणगती**-अस्पृशद्गतिः, यत्परमाण्वादिकमन्येन परमाण्वादिना सह परस्परसम्बन्धमननुभूय गच्छति सा, विहायोगतेर्द्वितीयो भेदः। प्रज्ञा० ३२७।

**अबंधव**-अबान्धवः, स्वजनरहितः। पश्न० १९।

**अबंधवो**-अबान्धवः, बान्धवरहितः, स्वजनसम्पाद्यकार्याभावात् कर्मनिगडबद्धः। प्रश्न० ११।

**अबंधिउं**-पात्रकबन्धग्रन्थिमदत्त्वा। ओघ० १४४।

**अबंभं**-अब्रह्म, अकुशलं कर्म, मैथुनम्। प्रश्न० ६५। अकुशलानुष्ठानम्, अब्रह्मगः प्रथमं नाम। प्रश्न० ६६। मैथुनम्। आव० ६५३। बस्त्यनियमलक्षणं। आव० ७६१।

**अबंभ**-अब्रह्मवर्जकः, श्रावकस्य षष्ठी प्रतिमा। आव० ६४६।

**अबंभचारिणो**-अब्रह्मचारिणः, मैथुनं आसेवितुं शीलं धर्मो वा येषां ते। उत्त० ३५८।

**अबद्धिआ**-अबद्धिकाः, अबद्धं सत्कर्म कंचुकवत्पार्श्वतः स्पृष्टमात्रं जीवं समनुगच्छन्तीत्येवं वदन्ति। औप० १०६।

**अबद्धिगा**-अबद्धिकाः, स्पृष्टकर्मविपाकप्ररूपकाः। आव० ३११। अबद्धिकः, बद्धं-जीवप्रदेशैरन्योऽन्याविभागेन सम्पृक्तं न बद्धं-अबद्धं, अर्थात्कर्म, तदभ्युपगमविषयमेषामस्तीति। उत्त० १५२।

**अबद्धिता**-अबद्धिकाः-स्पृष्टकर्मविपाकप्ररूपकाः। ठाणा० ४१०।

**अबला**-अबलाः, शारीरशक्तिविकलाः। जं० प्र० २३९।

**अबले**-अबलः, शरीरशक्तिवर्जितः। भग० ३२३।

**अबहुस्सुए**-अल्पश्रुताय-अवगाढस्तोकशास्त्राय। सूय० २९६।

**अबहुस्सुतो**-जेण आयारपगप्पो ण ज्झातितो। नि० चू० तृ० २५ अ।

**असन्नी**-असञ्ज्ञी, मिथ्यादृष्टिरमनस्को वा। प्रज्ञा० ३३९। यथोक्तमनोविज्ञानविकलः। प्रज्ञा० ५३३, ४०७।

**असबलायारे**-अशबलो यस्य सितासितवर्णोपेतबलीवर्द इव कर्बुर आचारो-विनयशिक्षाभाषागोचरादिकः। व्य० प्र० २३५ अ।

**असबलो**-अशबलः, एकान्तशुद्धः। उत्त० २५७।

**असब्भं** - असभ्यम्, अनुचितं जकारमकारादि। आव० ५८८।

**असब्भावं**-असद्भावम्, अविद्यमानाः सन्तः-परमार्थसन्तो भावा-जीवादयोऽभिधेयभूता यस्मिन् तत्। उत्त० १५१।

**असब्भावगिहंतरं**-गृहस्य पार्श्वतः पुरोहडेऽङ्गणे मध्ये वा। बृ० तृ० २३ आ।

**असब्भावठवणा** - एक एवाक्षः पिण्डकल्पनया बुद्धया कल्प्यते तत्। ओघ० १२९। असद्भावस्थापना, असद्भावकल्पना। जीवा० १२२।

**असब्भावपट्ठवणा**-असद्भावप्रस्थापना। आव० १५१।

**असब्भावभावणा**-असद्भावभावना। उत्त० १६५, २२३।

**असब्भावुब्भावणा** - असद्भावोद्भावना। उत्त० १५७। आव० ३१४।

**असब्भावो**-असद्भावः। आव० ३२०।

**असब्भूए** - असद्भूतम्, अभूतोद्भावनरूपमशोभनरूपं वा। भग० २३२।

**असब्भूय**-असद्भूतम्, अनृतम्। आव० ५८८।

**असभ्यम्**-अश्लीलम्। आव० ८३४। खरपरुषादि। उत्त० ३४७।

**असमंजसं**-अननुकूलम्। उत्त० २२६।

**असमओ** - असमयः, असम्यगाचारः, द्वितीयाधर्मद्वारस्य पञ्चविंशतितमं नाम। प्रश्न० २६।

**असमणपाउग्गो**-अश्रमणप्रायोग्यः। आव० ७७८।

**असमणुन्न** - असमनुज्ञः, आचाराङ्गेऽष्टमाध्ययनस्य प्रथमोद्देशकः। आचा० २६०। असमनोज्ञाः, असाम्भोगिकाः। ओघ० ५४।

**असमर्था**-अतिभारेण न शक्नुवन्ति फलानि धारयितुम्। आचा० ३९१।

**असमाणो**-असमानः, न विद्यते समानोऽस्य गृहिष्वाश्रयामूर्च्छितत्वेनान्यतीर्थिकेषु वाऽनियतविहारादिनेति, असदृशः समानो वा साहङ्कारो न तथेति। उत्त० १०७।

**असमारभमाणस्स** - असमारभमाणस्य, सङ्घट्टादीनामविषयीकुर्वतः। ठाणा० ३२४।

**असमासदोसो**-असमासदोषः, समासव्यत्ययः सूत्रदोषविशेषः। आव० ३७४।

**असमाहडा**-असमाहृता, अनङ्गीकृता। सूत्र० ३१४।

**असमाहडाए**-अशुद्धया लेश्यया-उद्गमादिदोषदुष्टमिदमित्येवं चित्तविप्लुत्या। आचा० ३३२।

**असमाहि**-असमाधिः, अस्वास्थ्यनिबन्धना कायादिचेष्टा। आव० ४९९। समाधिः-समाधानं-ज्ञानादिषु चित्तैकाग्र्यं, न समाधिः। उत्त० ६१४। चित्तोद्वेगरूपम्। उत्त० ५५१।

**असमाहिकरो**-असमाधिकरः, अस्वास्थ्यनिबन्धनकरः। आव० ४९९।

**असमाहिठाणा** - असमाधिस्थानानि, न चित्तस्वास्थ्यस्याश्रयाः। प्रश्न० १४४। सम० ३७।

**असमिक्खियप्पलावी** - बुद्धीए अणूहियं पुव्वावरं इहपरलोयगुणदोसं वा जो सहसा भणइ। नि० चू० तृ० ८० आ। असमीक्षितप्रलापी, अपर्यालोचितानर्थकवादी। प्रश्न० ३६।

**असमित्त**-अश्वमित्रः। विशे० ९३४।

**असमीक्ष्य**-अनालोच्य। उत्त० ३४७।

**असमोहएणं**-अनुपयुक्तेनात्मना। भग० २८९।

**असमोहयावि**-दण्डादुपरता असमुद्धाता वा। भग० ७६४।

**असम्मोहे** - असम्मोहः, देवादिकृतमायाजनितस्य सूक्ष्म-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पदार्थविषयस्य च सम्मोहस्य मूढताया निषेधात्। ठाणा० १९२।

**असरण**-अशरणः, शरणरहितः, अर्थप्रापकाभावात्। प्रश्न० ११। अर्थकारकविरहितः। प्रश्न० १९। गृहं नात्र शरणमस्तीत्यशरणः संयमः। आचा० ३०३। शरणमनालम्बमानोऽदीनमनस्कः। आचा० ३०६।

**असहीण**-असत्। बृ० द्वि० १८७ अ। अस्वाधीनः, परायत्तः। आचा० १५२।

**असहु**-सुकुमारो राजपुत्रादिप्रव्रजितः। ठाणा० १३८। अशक्तिष्टः। नि० चू० प्र० ३६० अ। असहिष्णुः। ओघ० १४३। सुकुमारशरीरं। उप० मा० गा० ४०३। असमर्थः-राजपुत्रादिः। ओघ० १३८।

**असहू**-असमर्थः-क्षुत्पीडितः। ओघ० ४४। राजादिदीक्षितः। बृ० द्वि० २२४ अ। रायाजुवराया सेट्ठि अमच्चपुरोहिया य एते असहू। नि० चू० प्र० १०१ अ। भिक्षावेलां प्रतिपालयितुमशक्तः। ओघ० ८६। असहिष्णुः। आव० ८५८। असमर्थः। ओघ० १९५।

**असांव्यवहारिकः**-छेकः। आव० ५२७।

**असाए**-असातः, असातोदयकलितः। जीवा० १३०।

**असाढभूई**-आसाढभूतिः, मायापिण्डोदाहरणे धर्मरुचिशिष्यः। पिण्ड० १३७।

**असाढए**-तृणविशेषः। प्रज्ञा० ३३।

**असाढा**-अषाढा, पूर्वोत्तराषाढानक्षत्रविशेषः। आव० १२०।

**असाधू**-असाधवः, असंयताः। ठाणा० ३९९।

**असामन्नं** असामान्यम्, अनाचीर्णपूर्वम्। सूर्य० २३८।

**असारजरढा**-अकालवृद्धा। ओघ० २१८।

**असारणा**-अगवेषणा। बृ० प्र० १५६ अ।

**असारवणा**-अगवेसणा। नि० चू० द्वि० १३६ अ।

**असारहिए**-असारथिकः, सारथिरहितः। भग० ३२२।

**असारिए**-असागारिके। नि० चू० द्वि० ३१ आ।

**असावज्जं**-असावद्यम्, आयतनस्य प्रथमः पर्यायः। ओघ० २२२।

**असासए**-अशाश्वतम्, प्रतिक्षणमावीचीमरणेन मरणम्। आचा० ६६। क्षणनश्वरत्वम्। भग० ४६९।

**असासयं**-अशाश्वतम्, प्रतिक्षणं विशरारुत्वम्-अनित्यम्। प्रश्न० ९६।

**असाहुया**-असाधुता, द्रोहस्वभावता। उत्त० ११४।

**असाहू**-असाधुः, अपगतभावसाधुत्वः। उत्त० ५८।

**असि**-असिः, खड्गः। जीवा० ११७। भग० १८२। प्रज्ञा० ९७। तलवारः। आव० ५८८, ४८७, ३६०। खड्गाभ्यासम्। प्रश्न० ९७। खड्गः-करवालः। भग० १९१। शस्त्रविशेषः। आव० ३६०।

**असिअं**-असितम्, कृष्णमशुभं च संसारानुबन्धित्वात्। आव० ४३९।

**असिअएणं**-दात्रेण। भग० ६५०।

**असिए**-असितः-अबद्धः-तैः सार्धं संगमकुर्वन् भिक्षुः। अचा० ४३०।

**असिकच्छप**-अस्थिकच्छपः, कच्छपविशेषः। सम० १३५।

**असिक्खग**-अशिक्षकः, चिरप्रव्रजितः। दश० ३९।

**असिखेडगं**-असिखेटकम्, असिना सह फलकम्। प्रश्न० २१।

**असिचम्मपायं**-असिचर्मपात्रम्-स्फुरकः, अथवा असिः-खड्गश्चर्मपात्रं च-स्फुरकः, खड्गकोशको वा। भग० १९१।

**असिचम्मपायहत्थकिच्चगए**-असिचर्मपात्रहस्तकृत्वाकृतः, असिचर्मपात्रं हस्ते यस्य स तथा कृत्यं-सङ्घादिप्रयोजनं गतः-आश्रितः कृत्यगतस्ततः कर्मधारयः, अथवाऽसिचर्मपात्रं कृत्वा हस्ते कृतं येनासौ असिचर्मपात्रहस्तकृत्वाकृतः, प्राकृत्वाच्चैवं समासः, अथवाऽसिचर्मपात्रस्य हस्तकृत्यां-हस्तकरणं गतः-प्राप्तो यः स तथा। भग० १९१।

**असिट्ठो**-अशिष्टः, अप्रतिपादितः। प्रश्न० १११। अशिष्टः। आव० २१८।

**असिणाइ**-अन्ये श्रमणादयो येऽमुमग्रपिण्डमशितवन्तः। आचा० ३३७।

**असिणाणए**-अस्नानतया। आचा० ३६४।

**असिता**-गृहवासविमुक्ता। आचा० २२२।

**असिद्ध**-न सिद्धः, हेतुदोषविशेषः। ठाणा० ४९३। संसारी। जीवा० ४३६।

**असिपंजरं**-असिपञ्जरम्, शक्तिपञ्जरम्। प्रश्न० ११५।

**असिपत्त**-असिपत्रं, असीनां पत्रम्। विपा० ७१। खड्गपत्रम्। जीवा० १०६। असिः-खड्गः स एव पत्रम्। ठाणा० २७३। असयः-खड्गास्तद्वच्छेदकतया पत्राणि-पर्णानि यस्मिँस्तत। उत्त० ४६०। प्रज्ञा० ८०। परमा-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धार्मिकेषु नवमः। उत्त० ६१४। नवमः परमाधार्मिकः। आव० ६५०। सूत्र० १२४। सम० २९।

**असिपुत्रिकः**। उत्त० ४५।

**असिय**-असितः, कृष्णः। प्रज्ञा० ९१।

**असियअं**-दात्रम्। आव० २९५।

**असियग**-असियगम्, दात्रम्। आचा० ६१।

**असिरयणं**-असिरत्नम्, चक्रवर्त्तेरेकेन्द्रियपञ्चमरत्नम्। जं० प्र० २३८। ठाणा० ३९८।

**असिलट्ठी**-असियष्टिः, खड्गलता। विपा० ५६। असिः-खड्गः स एव यष्टिः-दण्डोऽसियष्टिः,अथवा असिश्च यष्टिश्च। जं० प्र० २६४।

**असिलायं**-विस्वरम्। बृ० तृ० २५ आ।

**असिलिट्ठं**-अश्लिष्टम्। आव० ९९।

**असिलोगभते** - अश्लोकभयम्, अकीर्त्तिभयम्। ठाणा० ३८९। अश्लाघाभयम्। आव० ४७२।

**असिलोगो**-अश्लाघा, अयशः। आव० ६४६।

**असिव**-अशिवम्, व्यन्तरकृतं व्यसनम्। आव० ६२६। उद्दाइयाए अभिद्दुतं। नि० चू० प्र० ९७ अ। नि० चू० प्र० ७५ अ। व्यन्तरकृत उपद्रवः। बृ० प्र० २३१ अ। देवतादिजनितो ज्वराद्युपद्रवः। ओघ० १३, १४।

**असिवाइखेत्तं**-अशिवादिक्षेत्रम्, अशिवादिप्रधानं क्षेत्रम्, आदिशब्दादूनोदरताराजद्विष्टादिपरिग्रहः। दश० ३९।

**असिवुवसमणी**-अशिवोपशमनी कृष्णस्य चतुर्थी भेरी। आव० ९७।

**असिवोवसमणी**-अशिवोपशमनी, कृष्णस्य चतुर्थी भेरी, षण्मासान् सर्वे रोगोपशमनी। बृ० प्र० ५६ अ।

**असी**-असिः, अस्युपलक्षितः सेवकपुरुषः। जीवा० २७९। हीरो। नि० चू० द्वि० १४१ अ। खड्गः, यमुपजीव्य जनः सुखवृत्तिको भवति, यद्वा साहचर्यलक्षणया असिशब्देन अत्र अस्युपलक्षिताः पुरुषा गृह्यन्ते। जं० प्र० १२२।

**असील**-अशीलः, अविद्यमानशीलः, सर्वथा विनष्टचारित्रधर्मः। उत्त० ३४५। अशीलाः-दुःशीलाः। ठाणा० १५३।

**असीलया**-अशीलता चारित्रवर्जितत्वात्। अब्रह्मणः सप्तदशं नाम। प्रश्न० ६६।

**असुआ**-असूया, अव्याजम्, ईर्ष्या। दश० २४३।

**असुइ**-अशुचिः अश्रुतिर्वा। प्रश्न० ६३। स्नानब्रह्मचर्यादिवर्जितत्वात् अशुचिः, शास्त्रवर्जितो वा अश्रुतिः। भग० ३०८। स्नानब्रह्मचर्यादिवर्जिताः, अश्रुतयः, शास्त्रवर्जिताः। जं० प्र० १७०। विगन्धं शरीरमलादि। जीवा० २८२।

**असुण्णंतरा**-अशून्यान्तराः, एकोत्तरवृद्धया सर्वदैवाशून्यान्यव्यवहितान्यन्तराणि यासां ता अशून्यान्तरा। विशे० ३३१।

**असुति**-अशुचीनि, अमेध्यानि मूत्रपुरीषाणि। ठाणा० ४७६।

**असुद्ध**-अशुद्धम्, आधाकर्मादि। ओघ० १७७।

**असुन्नकाल**-अशून्यकालः, नारकभवानुगसंसारावस्थानकालस्य द्वितीयभेदः। भग० ४७।

**असुभ**-अशुभकार्ये मृतकस्थापनादौ। व्य० प्र० १६९अ।

**असुभजोग**-अशुभयोगः, अनुपयुक्ततया प्रत्युपेक्षादिकरणम्। भग० ३२।

**असुभणाम** - अशुभनाम, यदुदयवशात् नाभेरधस्तनाः पादादयोऽवयवा अशुभा भवन्ति तत्। प्रज्ञा० ४७४।

**असुभत्ता**-अशुभता, न शुभता। प्रज्ञा० ५०४। अमङ्गल्यता। भग० २५३।

**असुभाणुप्पेहा**-अशुभानुप्रेक्षा, अशुभत्वं संसारस्यानुप्रेक्षणं-अनुस्मरणम्। ठाणा० १८८।

**असुभाते**-असुखाय-दुःखाय। ठाणा० १४९। अशुभाय, अपुण्यबन्धाय असुखाय वा। ठाणा० २९२। पापाय, असुखाय वा-दुःखाय। ठाणा० ३५८।

**असुयंगं**-अश्रुताङ्गम्, नोश्रुताङ्गम्। उत्त० १४४।

**असुय**-अश्रुतं परवचनद्वारेण। भग० २००, ११७।

**असुर**-रौद्रकर्मकारी। उत्त० २७६।

**असुरकुमार**-असुरकुमाराः, देवविशेषाः। भग० ११७। असुराश्च ते नवयौवनतया कुमारा इव कुमाराश्चेत्यसुरकुमाराः। ठाणा० २८। भवनपतिभेदविशेषः। प्रज्ञा० ६९।

**असुरकुमारीओ**-असुरकुमार्यः, देवीविशेषाः। भग० १९७।

**असुरदारे**-सिद्धायतनस्य द्वितीयं द्वारम्। ठाणा० २३०।

**असुरसुरं**-असुरसुरम्, अनुकरणशब्दोऽयम्। भग० २९४। सरडसरडं अकरिंतो। ओघ० १८७। एवंभूतशब्दरहितम्। प्रश्न० ११२।

**असुरा** - असुराः, न सुरा असुराः, भवनपतिव्यन्तराः। ठाणा० २२। भवनपतिविशेषाः, भवनपतिव्यन्तरा वा।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ठाणा० १०४। असुरकुमारः। भग० १३५। भवनपति-व्यन्तरलक्षणः। ठाणा० ४६६।

**असुरो**-असुरः, आसुरभावान्वितत्वाद् यक्षः। उत्त० ३६६। भवनवासी। बृ० द्वि० २६४ अ।

**असुह**-अशुभम्, अशुभस्वभावम्। भग० ७२। अशुभः-अतीवासातरूपः। जीवा० १०३।

**असुहदुक्खभागी** - असुखदुःखभागी, दुःखानुबन्धिदुःख-भागी। भग० ३०८।

**असुहया**-अशुभदा, असुखदा। आव० २३६।

**असुहिय**-असुखितः, अविद्यमानसुहृद् वा। प्रश्न० ४१।

**असूइअ**-असूचितम्, व्यञ्जनादिरहितम्। दश० १८१।

**असूचया**-साक्षात्। ठाणा० ३०४।

**असूयपुत्तो**-असूयपुत्रः। आव० २११।

**असूया**-अप्पणो दोसं भासति ण परस्स। नि० चू० प्र० २७८ अ। आतगता। नि० चू० प्र० २७८ अ।

**असूचा**-स्फुटमेव परदोषोद्घट्टनम्। बृ० प्र० १२८ अ।

**असेयं**-मुखं। नि० चू० प्र० ८८ आ।

**असोंडो**-अमजपाणो। नि० चू० द्वि० १४४ अ।

**असोअ**-अशोकः, सुप्रभबलदेवपूर्वभवनाम। आव० १६३। अरुणद्वीपे महर्द्धिको देवविशेषः। जीवा० ३६७। द्विसप्ततितमग्रहः। जं० प्र० ५३५। वृक्षविशेषः। जीवा० २२२। किन्नरव्यंतराणां चैत्यवृक्षः। ठाणा० ४४२। अशोकनामदेवः। जं० प्र० ३२०। लताविशेषः। प्रज्ञा० ३२। बिन्दुसारपुत्रः। बृ० प्र० ४७ अ। वृक्षविशेषः। भग० ८०३। एकास्थिकवृक्षविशेषः। प्रज्ञा० ३१। ठाणा० ७९। मल्लिनाथस्य चैत्यवृक्षः। सम० १५२। विजयपुरस्य नन्दनवनोद्याने यक्षः। विपा० ९५। बिंदुसारपुत्तो। नि० चू० प्र० २४३ अ।

**असोगचंदो**-अशोकचन्द्रः, योगसङ्ग्रहेषु शिक्षायां दृष्टान्तः। आव० ६७९।

**असोगदत्तो**-अशोकदत्तः, मायोदाहरणे साकेतपुरे समुद्रदत्तसागरदत्तपिता। आव० ३९४।

**असोगललिए**-चतुर्थबलदेवपूर्वभवनाम। सम० १५३।

**असोगवण** - अशोकवनम्। आव० १८६। पुष्करिण्यां वनम्। ठाणा० २३०। वनखण्डनाम। जं० प्र० ३२०। भग० ३७।

**असोगसिरी** - पाडलिपुत्ते असोगसिरी राया। नि० चू० तृ० ४४ आ। बृ० द्वि० १५३ आ। अशोकश्रीः, बिन्दुसारपुत्रः। विशे० ४०९।

**असोगा**-अशोका, नलिनविजयराजधानी। जं० प्र० ३५७। नागकुमारेन्द्रस्याग्रमहिषी। भग० ५०४। ठाणा० २०४।

**असोच्चा**-अश्रुत्वा। भग० ४२५। आगमानपेक्षम्। भग० ४५५।

**असोणिअ**-अशोणितम्, रक्तरहितम्। आव० ७६४।

**असोत्थो**-अश्वत्थः। आव० ४१७।

**असोयणया**-अशोचनता, दैन्यानुत्पादनेन। भग० ३५।

**असोयलया**-अशोकलता, लताविशेषः। भग० ३०६।

**असोयवडेंसए**। भग० १९४।

**असोयाओ**। ठाणा० ८०।

**असोही**-अशोधिः, प्रतिसेवना, स्खलना। ओघ० २२५।

**अस्तमयनप्रविभक्तिः**-नवमनाट्यभेदः। जं० प्र० ४१६।

**अस्तान्ते**-अत्थंतमि, अस्तमयपर्यन्ते। उत्त० ४३५।

**अस्ति**-अत्थि, प्रदेशः। ठाणा० १५, ५१६।

**अस्तिकायः**- अत्थिकाय, धर्म्मादिपञ्चविधास्तिकायमाश्रित्य कायः। आव० ७६७।

**अस्तिकायधर्म** - अत्थिकायधम्म, अस्तिशब्देन प्रदेशा उच्यन्ते, तेषां कायो-राशिरस्तिकायः स चासौ संज्ञया धर्म्मश्चेति, गत्युपष्टम्भलक्षणः धर्मास्तिकायः। ठाणा० १५४। योऽस्तिकायानां धर्मादीनां धर्मो-गत्युपष्टम्भादिः। उत्त०५६६।

**अस्तिकायाः**-अत्थिकाया, अस्तीत्ययं त्रिकालवचनो निपातः, अभूवन् भवन्ति भविष्यन्ति चेति भावना, अतोऽस्ति च ते प्रदेशानां कायाश्च राशय इति, अस्तिशब्देन प्रदेशाः क्वचिदुच्यते, ततश्च तेषां वा काया अस्तिकायाः। ठाणा० १९६। अस्तीनां-प्रदेशानां सङ्घातात्मकत्वात् कायः। ठाणा० १५।

**अस्तिनास्तिप्रवादपूर्वम्** - अत्थिनत्थिप्पवातपुव्वं, चतुर्थं पूर्वम्। ठाणा० ४८४। तत्र यद्वस्तु लोकेऽस्ति धर्मास्तिकायादि यच्च नास्ति खरशृङ्गादि तत् प्रवदति, सर्वं वस्तु स्वरूपेणास्ति पररूपेण नास्तीति प्रवदति। नंदी १४१।

**अस्थानस्थापनम्** - अठाणठवणं - अयोग्यतास्थापनम्। ओघ० १३१।

**अस्थिका**-अट्ठिग, कपालिकापर्यायः। व्य० प्र० २०६ अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अस्थितकल्पिकः**-साधुभेदविशेषः । भग० ४ ।

**अस्थिमिंजा**-अट्ठिमिंजा, अस्थिमध्यरसः । ठाणा० १७० ।

**अस्थिमिंजानुसारि**-अट्ठिमिंजाणुसारी । ठाणा० ३७५ ।

**अस्थिरम्**-अथिरं, जीर्णम् । आचा० ३९६ ।

**अस्थिरणाम** -( अथिरणाम ), यदुदयवशाज्जिह्वादीनामवयवानामस्थिरता भवति तत् । प्रज्ञा० ४७४ ।

**अस्निहः**-(अणिह), स्निह्यते-श्लिष्यतेऽष्टप्रकारेण कर्म्मणेति स्निहः, न स्निहोऽस्निहः, यदि वा स्निह्यतीति स्निहो रागवान् यो न तथा सोऽस्निहः, उपलक्षणार्थत्वाच्चास्य रागद्वेषरहित इत्यर्थः । आचा० १९१ । स्नेहरहितः । आचा० २१० । स्निह्यतीति स्निहो, न स्निहोऽस्निहः-रागद्वेषरहितत्वात् अप्रतिबद्धः । आचा० २५८ ।

**अस्पृशद्गति**-समयप्रदेशान्तरमस्पृशती । आव० ४४१ ।

**अस्फुटितम्**-अफुडिआ, सर्वविराधनापरित्यागः । दश० १९६ ।

**अस्संजए**-असंयतः-गृहस्थः, स च श्रावकः प्रकृतिभद्रको वा । आचा० ३२९ । असंयताः-असंयमवन्तः, आरम्भपरिग्रहप्रसक्ताः, अब्रह्मचारिणः । ठाणा० ५२४ ।

**अस्संजतो**-गिहत्थो । नि० चू० प्र० ३० आ ।

**अस्संजमो** - असंयमः, प्राणातिपातादिलक्षणः । आव० ५१६ ।

**अस्संपडियाए** - न विद्यते स्वं-द्रव्यमस्य सोऽयमस्वो निर्ग्रन्थ इत्यर्थः, तत्प्रतिज्ञया । आचा० ३२५ ।

**अस्सकण्णी** - अश्वकर्णी, वनस्पतिविशेषः । आचा० ५७ । साधारणवनस्पतिकायिकभेदः । जीवा० २७ ।

**अस्सक.न्न**-साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**अस्सकन्नी**-अनन्तकायभेदः । भग० ३०० । भग० ८०४ । कन्दविशेषः । उत्त० ६९१ ।

**अस्सतरो**-अश्वतरः, खरतरः, एकखुरश्चतुष्पदः । जीवा० ३८ । एकखुरचतुष्पदः । प्रज्ञा० ४५ ।

**अस्सपुरं**-अश्वपुरम्, पुरुषसिंहपुरम् । आव० १६२ ।

**अस्सपुरा** - अश्वपुरी, पक्ष्मविजयराजधानी । जं० प्र० ३५७ ।

**अस्सरोनिवाए** - अप्सरोनिपातः, चप्पुटिका । जीवा० ३९९ ।

**अस्सलालापेलवं** । आचा० ४२३ ।

**अस्सलेसा**-नक्षत्रविशेषः । ठाणा० ७७ ।

**अस्सवाणियओ**-अश्ववणिक् । आव० २२० ।

**अस्सवाहणिया**-अश्ववाहनिका । उत्त० २७७ । आव० ५६ ।

**अस्ससेणे**-अश्वसेनः, सनत्कुमारपिता । आव० १६२ । पार्श्वपिता । आव० १६१ ।

**अस्सादणसगोत्ते** - आस्वादनसगोत्रम्, अश्विनीनक्षत्रगोत्रम् । सूर्य० १५० ।

**अस्सामिणी**-अस्वामिनी । आव० ३२४ ।

**अस्सायणे**-आश्वायनम्, अश्विनीगोत्रम् । जं० प्र० ५०० ।

**अस्सासणे** - अष्टाशीतिमहाग्रहे चतुर्दशमहाग्रहः । ठाणा० ७८ ।

**अस्सासो** - आश्वासः, प्राणिनामेव आश्वासनम्, अहिंसायाः पञ्चाशत्तमं नाम । प्रश्न० ९९ ।

**अस्सि**-अयम् । ठाणा० १३८ ।

**अस्सिंपडियाए**-एतत्प्रतिज्ञया एतान् साधून् प्रतिज्ञाय-उद्दिश्य । आचा० ३६१ ।

**अस्सिंलोए**-अयं लोकः, अयं मनुष्यलोकः । जीवा० ३४४ ।

**अस्सिणि**-अश्विनी, नक्षत्रविशेषः । सूर्य० १३० । ठाणा० ७७ । मेतार्यजन्मनक्षत्रम् । आव० २५५ ।

**अस्सीइ**-अश्विनी, नक्षत्रविशेषः । ठाणा० ४६९ ।

**अस्सेसा**-अश्लेषा । सूर्य० १३० ।

**अस्सो**-अश्वः, घोटकः, एकखुरश्चतुष्पदः । जीवा० ३८ । अर्शः । जीवा० २८४ । प्रज्ञा० ४५ ।

**अहं**-अधं-अधस्तात् । आचा० ६३ । अधः-बुध्ने । ओघ० १६८ ।

**अह**-एष । नि० चू० प्र० ११८ अ । व्य० प्र० १०७ आ । अयं । नि० चू० द्वि० ९२ आ ।

**अहक्खाओ**-यथास्थितः । ( सं० )

**अहक्खायं** - अथाख्यातम्, अथशब्दो यथार्थे, आङ्-अभिविधौ, याथातथ्येनाभिविधिना वा यत् ख्यातं-कथितं अकषायं चारित्रम् । प्रज्ञा० ६८ । यथाख्यातम्-अकषायमित्यर्थः । विशे० ५४७ । यथाख्यातं-सूक्ष्मसम्परायानन्तरं सर्वत्र साधुजीवलोके ख्यातं-प्रसिद्धं, पञ्चमं सर्वविशुद्धं चारित्रम् । विशे० ५५५ । यथाख्यातं-यथैवाख्यातम्-अकषायम् । आव० ७८ । यथैवाख्यातं-यथाख्यातं प्रसिद्धं सर्वस्मिन् जीवलोके, अकषायचारित्रमिति । आव० ७९ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथशब्दो यथार्थः, आख्यातं-अभिहितं अथाख्यातम्। ठाणा० ३२४।

**अहक्खित्तो** । नि० चू० प्र० १६४ अ।

**अहगुरु**-येन प्रव्राजितो यस्य वा पार्श्वे अधीतः, रत्नाधिकतरकः। व्य० द्वि० ३९५ अ।

**अहछंदो**-यथाछन्दः, यथैच्छयैवागमनिरपेक्षं प्रवर्त्तते यः। आव० ५१८।

**अहछंदिया**-अथाछन्दिका, अव्यापारिता, स्वयं प्रवृत्ता। बृ० द्वि० २६१ अ।

**अहण्णे**-अधन्यः। उत्त० ३२९।

**अहतहं**-यथातथं, सूत्रकृताङ्गाद्यश्रुतस्कन्धे त्रयोदशमध्ययनम्। आव० ६५१। सूत्रकृताङ्गस्य त्रयोदशमध्ययनम्। उत्त० ६१४।

**अहतानि** । भग० ५०६।

**अहत्ता**-अधस्ता, गुरुपरिणामता। प्रज्ञा० ५०४। भग० २३। जघन्यता। भग० २५३।

**अहत्थे**-यथास्थान्, यथावस्थितान् यथार्थान् वा-यथाप्रयोजनान् भावान् जीवादीन्, यथा द्रव्यान्, पर्यायान्। ठाणा० ३५१।

**अहप्पहाण**-यथाप्रधानः। भग० ६७९, ६८३। यथाप्रधानः, यो यत्र ग्रामादौ प्रधानः। ओघ० ५९।

**अहमं**-अधमम्, जघन्यम्। आव० ५८५।

**अहमंती**-अहं अंता इति अन्तो-जात्यादिप्रकर्षपर्यन्तोऽस्यास्तीत्यन्तः अहमेव जात्यादिभिरुत्तमतया पर्यन्तवर्त्ती। ठाणा० ४७३।

**अहमिंदा**-अहमिन्द्राणि, अहं अहं इत्येवमिन्द्राः। सम० ४३।

**अहमो**-अधमः, मलाविलत्वाज्जुगुप्सितः। सूत्र० ८२।

**अहम्म**-अधर्मः, असंयमः। दश० २७१। धर्मविपक्षः-पापम्। उत्त० २७४। धर्मप्रतिपक्षः। उत्त० २४८। अधर्म्मः, अधर्मपोषकं दानं अधर्मकारणत्वात्। ठाणा० ४९६। भारहरामायणादिपावसुतं। नि० चू० द्वि० ४ आ। धर्मविपक्षं विषयासक्तिरूपम्। उत्त० २८५।

**अहम्मक्खाई**-अधर्माख्यायिनः, न धर्ममाख्यान्तीत्येवंशीलाः, न धर्मात् ख्यातिर्येषां ते। भग० ५६०।

**अहम्मखाई**-अधर्माख्यायी, अधर्मभाषणशीलः। अधर्मख्यातिः-अधार्मिकप्रसिद्धिको वा। विपा० ४८।

**अहम्मजुत्तं**-अधर्मयुक्तम्, पापसम्बद्धम्। दश० ५२।

**अहम्मपलज्जणे**-अधर्मप्ररञ्जनः, अधर्मे हिंसादौ प्ररज्यते अनुरागवान् भवतीति। विपा० ४८।

**अहम्माणी**-अहंमानी, अहमेव विद्वान् इति मानोऽस्येति। आव० २४१।

**अहम्माणुए**-अधर्मानुगः, अधर्मान्-पापलोकान् अनुगच्छतीति। विपा० ४८।

**अहम्मिट्ठा**-अधर्मीष्टा अधर्मिष्ठा वा-धर्म्मः-श्रुतरूप एवेष्टो-वल्लभः पूजितो वा येषां ते धर्मेष्टाः, धर्मिणां वेष्टा धर्मीष्टाः अतिशयेन वा धर्म्मिणो धर्मिष्ठाहतन्निषेधादधर्मेष्टाः अधर्मीष्टा अधर्मिष्ठा वा। भग० ५६०।

**अहम्मिट्ठे**-अधर्मिष्ठः, अतिशयेनाधर्मो-धर्मरहितः। विपा० ४८। अधर्मेष्टः, अधर्मो-धर्मविपक्षः-पापमिति स इष्टः-अभिलषितोऽस्येति, यद्वा अधर्मगुणयोगादधर्मः, अतिशयेनाधर्मः। उत्त० २७४।

**अहम्मियं**-आधार्मिकं-अधार्मिकाणामिदम्। प्रश्न ११०।

**अहय**-अहतम्, मलमूषिकादिभिरनुपदूषितं, प्रत्यग्रमिति। औप० ६६। अव्यवच्छिन्नम्। औप० ७४। अपरिमलितम्। जीवा० २५४। तंतुग्गतं। नि० चू० प्र० २५३ अ। आख्यानकप्रतिबद्धम्, अव्याहतं, नित्यं, नित्यानुबन्धि वा। जीवा० २१७। प्रज्ञा० ८९। जं० प्र० ६३। अव्याहतम्। भग० १५४। सूर्य० २६७। अपरिभुक्तम्। भग० २५४।

**अहर**-अधरम्, अधः-नरकतिर्यक्। दश० २७२। नरकः। आव० ५३२।

**अहरगतिगमणं**-अधरगतिगमनम्, अधोगतिगमनकारणम्। प्रज्ञा० ३६८।

**अहराई**-अहोरात्रिकी। आव० ६४८।

**अहव**-अथवा-अथार्थे। विशे० ११३०।

**अहवण**-अथवा। बृ० द्वि० १४ आ। विकल्पप्रदर्शने। नि० चू० प्र० २९० अ। विकल्पार्थो निपातः। बृ० द्वि० २४६ आ।

**अहवा**-अनन्तरम्। नि० चू० प्र० १८ आ। अयं निपातः। नि० चू० प्र० १६८ आ।

**अहव्वणवेद**-अथर्वणवेदः, चतुर्णां वेदानां चतुर्थः वेदः। भग० ११२।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अहसंथडं**-निष्प्रकम्पं चम्पकपट्टादि। बृ० तृ० ३१ अ।
**अहसिता**-न सहेतुकमहेतुकं वा हसन्नेवास्ते। उत्त० ३४५।
**अहसुद्धो**-यथाशुद्धः, निर्दोषोपदेशदाता। बृ० तृ० ७१ आ।
**अहस्सिरे**-अहसनशीलः। उत्त० ३४५।
**अहस्ससच्चे**-अहास्यात्सत्यः, हास्यपरित्यागात्सत्यः, द्वितीयव्रतस्य प्रथमा भावना। आव० ६५८।
**अहाअत्थं**-यथार्थम्-निर्युक्त्यादिव्याख्यानानतिक्रमेणेत्यर्थः। ठाणा० ३८८। अर्थस्य निर्युक्त्यादेरनतिक्रमेण। ठाणा० ५१९।
**अहाउअकाल**-यथायुष्ककालः, देवाद्यायुष्कलक्षणः। दश० ९।
**अहाउनिव्वत्तिकाले**-यथायुर्निर्वृत्तिकालः, यथा-येन प्रकारेणायुषो निर्वृत्तिः-बन्धनं, तथा यः कालः-अवस्थितिरसौ। भग० ५३३।
**अहाउयं**-यथायुष्कम्, यथाबद्धमायुष्कम्। प्रश्न० १९। यथायुष्कम्। आव० ११५, २५८। यथायुः-आयुषोऽनतिक्रमेण। उत्त० १८८।
**अहाकडं**-यथाकृतम्, गृहस्थेन स्वार्थं निर्वर्त्तितम्। प्रश्न० १२७।
**अहाकडा**-आधाकृता, साधूनाधाय-सम्प्रधार्य कृता। बृ० प्र० ९२ अ।
**अहाकप्पं**-यथाकल्पम्, प्रतिमाकल्पानतिक्रमेण तत्कल्पवस्त्वनतिक्रमेण वा। भग० १२४। कल्पनीयानतिक्रमेण प्रतिमासमाचारानतिक्रमेण वा। ठाणा० ३८८।
**अहाकम्मं**-यथाकर्म, बद्धकर्मानतिक्रमेण। भग० ६५।
**अहाकम्मिए**। भग० ४६६।
**अहागडा**-प्राशुकानि, अल्पपरिकर्माणि। ओघ० ९२।
**अहागडे**-यथाकृतम्, आत्मार्थमभिनिर्वर्त्तितम्। दश० ७२।
**अहाचरा**-अधश्चराः-बिलवासित्वात्सर्पादयः। आचा० २९१।
**अहाच्चयं**-दृष्टिवादे सूत्रभेदः। सम० १२८।
**अहाच्छंदे**-यथाछन्दान्, स्वच्छन्दान्। ओघ० ५६।
**अहाछंद**-यथाछन्दाः-यथा कथञ्चिन्नागमपरतन्त्रतया छन्दः-अभिप्रायो-बोधः। भग० ५०२। यथा स्वाभिप्रेतं तथा प्रज्ञापयन्। नि० चू० द्वि० २३ आ।
**अहाजातो**-अप्पोवधी। नि० चू० द्वि १३१ आ।
**अहाजायं**-रजोहरणमुखवस्त्रिकाचोलपट्टयुतः रचितकरपुटश्च। बृ० तृ० १० आ।
**अहाडं**-यथाकृतम्, परिकर्मशून्यं। बृ० द्वि० २०२ आ।
**अहाणी**-असीयणं। नि० चू० प्र० ५ आ।
**अहातच्चं**-यथातत्त्वम्, तत्त्वानतिक्रमेण वर्त्तमानम्। भग० १२४। सप्तसप्तमिकेत्यभिधानार्थानतिक्रमेणान्वर्थसत्यापनेनेत्यर्थः। ठाणा० ३८८। शब्दार्थानतिक्रमेण। ठाणा० ५१९।
**अहातच्चे**-यथातथ्यो यथातत्त्वो वा, यथा-येन प्रकारेण तथ्यं-सत्यं तत्त्वं वा। भग० ७०९।
**अहातच्चो**-जहेव दिट्ठो तहेव जो भवति सो अहातच्चो भवति। नि० चू० द्वि० ८६ अ।
**अहापज्जत्तं**-यथापर्याप्तम्। भग० १३९।
**अहापडिरूवं** - यथाप्रतिरूपम्। आव० १९९। भग० ६६१।
**अहापदं**-यथापदम्। आव० ३५२।
**अहापरिग्गहिए**-यथाप्रतिगृहीतम्, यथाप्रतिपन्नम्। भग० १३६।
**अहापरिन्नायं**-यावन्मात्रं क्षेत्रमनुजानीषे तावन्मात्रं कालं तावन्मात्रं च क्षेत्रमाश्रित्य वयं वसाम इतियावत्। आचा० ४०३।
**अहापवत्तं**-यथाप्रवृत्तम्। आव० ११५।
**अहाबायरा**-यथाबादराः, यथोचितबादरा आहारपुद्गला इत्यर्थः। भग० १८९। यथाबादराणि, स्थूलतरस्कन्धान्यसाराणि। भग० २५१।
**अहाबायरे**-यथाबादरम्, स्थूलप्रकारम्। भग० २५१। असारम्। भग० १५४।
**अहाभद्दगो**-यथाभद्रकः। आव० ७३९।
**अहाभद्दे**-यथाभद्रः, शासनबहुमानवान्। बृ० प्र० ३३ अ।
**अहाभद्दो**-दाणरुयी। नि० चू० प्र० १९९ आ। दंसणविरहितो अरहंतेसु तस्सासणे साधू उभयभद्दसीलो। नि० चू० प्र० ३२५ अ।
**अहाभावो** - स्वपरिग्रहे धारणम्। बृ० द्वि० २४ आ। अधाप्रवृत्ति। नि० चू० प्र० २५१ आ। प्रतिस्वामितं-प्रतिगृहीतं न तु भुज्यते यत्पात्रादि। बृ० द्वि० २८६ आ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अहामग्गं**-यथामार्गम्, ज्ञानादिमोक्षमार्गानतिक्रमेण क्षायोपशमिकभावानतिक्रमेण वा वर्त्तमानम्। भग० १२४। मार्गः-क्षायोपशमिको भावस्तदनतिक्रमेण। ठाणा० ३८८।

**अहारिणो**-मनसोऽनिष्टाः। आचा० २४२।

**अहारियं**-यथारीतम्, रीतं-रीतिः-स्वभावः, तस्यानतिक्रमेण वर्तते तत्, यथास्वभावमित्यर्थः। भग० २१२। यथाऽऽर्यम्। आचा० ३७९। यथाऋजु। आचा० ३८१।

**अहालंदं** - मध्यममष्टपौरुषीमानम्। बृ० तृ० ३५ आ। पोरिसी। नि० चू० तृ० १८ अ। जघन्येन तरुणीदकार्द्रकरशोषकालः, उत्कृष्टतः पूर्वकोटी। बृ० द्वि० ३२ आ। संजोगवर्जिते तृतीयभेदः। नि० चू० प्र० २३९ अ। यावन्मात्रं कालं भवाननुजानाति। आचा० ४०३।

**अहालहुस्सए**-स्तोकप्रायश्चित्तदानम्। बृ० तृ० २०९ आ।

**अहालहुस्सगाइं**-यथालघुस्वकानि, 'यथे'ति-यथोचितानि लघुस्वकानि-अमहास्वरूपाणि, महतां हि तेषां नेतुं गोपयितुं वाऽशक्यत्वादिति यथालघुस्वकानि, अथालघूनि-महान्ति वरिष्ठानीति वृद्धाः। भग०।

**अहावच्चा**-यथापत्यानि, पुत्रस्थानीयाः। भग० १९७।

**अहासंथडं**-णिप्पकंपं पट्टं। नि० चू० प्र० १७० अ।

**अहासंथडा**-अचला। नि० चू० प्र० १६० आ।

**अहासच्चं**-यथासत्यम्, इदं यन्मया कथितं कथ्यमानं च तद्यथासत्यम्, याथातथ्यम्। आचा० १८३।

**अहासन्निहिआ**-यथासन्निहिताः। आव० १७५।

**अहासम्मं**-यथासाम्यम्, समभावानतिक्रमेण वर्त्तमानम्। भग० १२४।

**अहासुत्तं** - यथासूत्रम्, सूत्रानतिक्रमेण। ठाणा० ३८८। सामान्यसूत्रानतिक्रमेण वर्त्तमानम्। भग० १२४।

**अहासुहुमणियंठो** -- यथासूक्ष्मनिर्ग्रन्थः, यथासूक्ष्म एतेषु सर्वेषु। उत्त० २५७।

**अहासुयं**-यथाश्रुतं यथासूत्रं वा। आचा० ३०१।

**अहासुहुमकसायकुसील**-कषायकुशीलस्य पञ्चमो भेदः। भग० ८९०।

**अहासुहुमपुलाए**-पुलाकस्य पञ्चमो भेदः। भग ८९०। यथासूक्ष्मपुलाकः, पुलाकस्य पञ्चमो भेदः। पञ्चस्वपि पुलाकेषु यः स्तोकं स्तोकं विराधयति सः। उत्त० २५६।

**अहासुहुमबउस**-बकुशस्य पञ्चमो भेदः। भग० ८९०। उत्त० २५६। यथासूक्ष्मबकुशः, योऽक्ष्णोः पुष्पिकामपनयति, शरीराद्वा धूल्यादिकमपनयति। उत्त० २५६।

**अहासुहुमे**-यथासूक्ष्मान् सारान्। भग० १५५।

**अहि**-सर्पः, पृथिव्याश्रितो जीवविशेषः। आचा० ५५। सर्पः। उत्त० ६९९। उरःपरिसर्पभेदः। सम० १३५। परिसर्पविशेषः। प्रज्ञा० ४५।

**अहिंडंतओ**-अहिण्डमानः, असहिष्णोर्द्वितीयभेदः। आव० ८५८।

**अहिंसा**-अनुकम्पा। प्रश्न० १०३। प्राणातिपातविरतिः। दश० २१।

**अहिअ**-अधिकम्, अहितम्, अपथ्यम्। जं० प्र० १६७।

**अहिअगामिणिं** - अहितगामिनीम्, उभयलोकविरुद्धाम्। दश० २३५।

**अहिउत्थ**-अभ्युषितः। उत्त० १२०।

**अहिकरणं**-अधिकरणम्, गन्त्रीयन्त्रकादिः। भग० १३५।

**अहिकरणकरो** - अधिकरणकरः, योऽन्येषां कलहयति, द्वादशमसमाधिस्थानम्। आव० ६५३।

**अहिकरणोईरण**-अधिकरणोदीरणः, योऽन्येषां यन्त्रादीन्युदीरयति, त्रयोदशमसमाधिस्थानम्। आव० ६५३।

**अहिकिच्च**-अधिकृत्य-आश्रित्य। भग० २४।

**अहिक्खेव**-अधिक्षेपः, निन्दाविशेषः। प्रश्न० ४१।

**अहिगमरुइ**-अधिगमरुचिः, विशिष्टं परिज्ञानं तेन रुचिर्यस्यासौ। प्रज्ञा० ५८।

**अहिगमास**-अधिकमासः। दश० २७०।

**अहिगमो**-अधिगमः, विशिष्टं परिज्ञानम्। प्रज्ञा० ५०। ज्ञानम्। आव० ५३०। अभिगमः-सेवा। सम० ५३।

**अहिगरणं**-अधिकरणम्, कलहः। सूत्र० ६६। बृ० तृ० १५२ आ। कूटपाशरूपम्। भग० ९३। अधिक्रियते आत्मा नरकादिषु येन तदधिकरणं-अनुष्ठानं बाह्यं वा वस्तु चक्रमहादि। आव० ६११। कलहः यन्त्रादि वा। आव० ६५४। ज्योतिषादि। आव० ६६२। अनुष्ठानविशेषः, बाह्यं वा वस्तु चक्रखड्गादि। भग० १८१। अनुष्ठानं बाह्यं वा वस्तु। ठाणा० ४१। वास्तुदूषलशिलापुत्रकगोधूमयन्त्रकादि। आव० ८३१। रात्रिः। ओघ० १८२।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अहिगरणकिरिया** – अधिकरणक्रिया, दुर्गतौ ययाऽधिक्रियन्ते प्राणिनः सा। प्रश्न० ३७।

**अहिगरणि**–अधिकरणिः, सुवर्णकारोपकरणम्। जं० प्र० २२६।

**अहिगरणिए**–अधिकरणकरं–कलहकरम्। आचा० ४२५।

**अहिगरणिया**–अधिकरणिकी–अधिक्रियते नरकादिष्वात्माऽनेनेति अधिकरणं–अनुष्ठानविशेषः बाह्यं वा वस्तु चक्रखड्गादि, तत्र भवा तेन वा निर्वृत्ता, क्रियाभेदविशेषः। भग० १८१। अधिक्रियत आत्मा नरकादिषु येन तदधिकरणम्–अनुष्ठानं बाह्यं वा वस्तु चक्रमहादि, तेन निर्वृत्ता क्रिया। आव० ६११। सम० १०।

**अहिगरणी**–अधिकरणी, यत्र लोहकारा अयोघनेन लोहानि कुट्टयन्ति। भग० २५१।

**अहिगरणे**–अधिकरणसिद्धान्तः। बृ० प्र० ३१ आ।

**अहिगारनिउत्तो**–अधिकारनियुक्तः। आव० ७३८।

**अहिगारो**–अधिकारः, प्रयोजनं, प्रस्तावः। आव० २७६। विशे० ८५९। ओघतः प्रपञ्चप्रस्तावरूपः। दश० २७८। आ–अध्ययनपरिसमाप्तेर्योऽनुवर्त्तते स। दश० १३। नियोगः। प्रश्न० ६६। प्रयोजनम्। दश० १३५। व्य० प्र० ४ अ। तृप्तिः। उप० मा० गा० ३७१।

**अहिगरणिता** – अधिकरणिकी–खड्गादिनिर्वर्त्तनी। ठाणा० ३१७।

**अहिछत्ता** – अहिच्छत्रा – नगरीविशेषः। उत्त० ३७९। पार्श्वनाथस्य धरणेन्द्रमहिमास्थानम्। आचा० ४१८। जङ्गलेषु जनपदेष्वार्यक्षेत्रम्। प्रज्ञा० ५५। सङ्गपरिहरणविषये पुरी। आव० ७२३।

**अहिजुंजिय**–अभियुज्य, वशीकृत्य, आश्लिष्य वा। भग० १३२।

**अहिज्ज**–अधील्य। उत्त० ३६२।

**अहिज्जिउं**–अध्येतुम्, पठितुम्, श्रोतुं, भावयितुम्। दश० १३८।

**अहिट्ठए**–अधिष्ठाता, तपःप्रभृतीनां कर्त्ता। दश० २३८। अधितिष्ठति यथावत् करोति। दश० २५६।

**अहिट्ठग**–अधिष्ठाता, कर्त्ता। दश० २०६।

**अहिट्ठाणं**–अधिष्ठानम्, अपानप्रदेशः। आव० ४१९।

**अहिट्ठाणजुद्धं**–अधिष्ठानयुद्धम्। आव० ९८।

**अहिट्ठित्तए**–अधिष्ठातुम्–परिभोक्तुम्। बृ० द्वि० २१८ अ।

**अहिट्ठित्ता**–अधिष्ठाय, आरोहणं कृत्वा। दश० ६१।

**अहिठाणि**–अधिष्ठाने, अपानप्रदेशे। ओघ० ६९।

**अहित**–अनुचितविधायी। बृ० प्र० २१४ अ। अपथ्यम्। उत्त० २७६।

**अहितुंडए**–आहितुण्डिकः, गारुडिकः। दश० ३७।

**अहिनंदइ** – अभिनन्दति, बहु मन्यते। आव० ५९०।

**अहिन्नायदंसणे**–अभिज्ञातदर्शने–सम्यक्त्वभावनया भावितः। आचा० ३०४।

**अहिमडे**–अहिमृतः, मृताहिदेहः। जीवा० १०६।

**अहिमन्त्र**–मन्त्रसाधनोपायशास्त्राणि। सम० ४९।

**अहिमर**–अभिमरः, अभिमुखमाकार्य मारयति म्रियते वेति। ओघ० १८। राजादिघातकः। विशे० ७४७। त्रिशे० ९७१। अभिमुखं परं मारयति यः सः। प्रश्न० ४६।

**अहिमरका**–घातकाः। बृ० द्वि० ८२ आ।

**अहिमार**–अभिमारः, वृक्षविशेषः। उत्त० १४३।

**अहिमासयम्मि**–अधिकमासे। आव० ५५७।

**अहियं**–अधिकं, अहितं वा अधिकं, अपथ्यं वा। भग० ३०६। अर्गलम्। उत्त० ६२३। अर्गलं, शीघ्रतरम्। उत्त० ७। अतिशयेन। जीवा० २२९। जीवा० ३५५। अहितम्, अश्रेयः। आचा० ३८।

**अहियपिच्छणिज्जं**–अधिकप्रेक्षणीयम्। आचा० ४२३।

**अहियाते**–अहिताय, अपथ्याय। ठाणा० १४९। अपायाय। ठाणा० २९२। अपथ्याय। ठाणा० ३५८।

**अहियासपज्जा**–अभिसहेत्, वर्त्तयेत्, पालयेत्। सूत्र० १६४।

**अहियासणा**–अभिसहना, उपसर्गसहनम्। आव० ६६०। अतिसहना। आव० ७९९।

**अहियासेत्तए**–अध्यासितुम्। दश० ९३।

**अहियासेमि** – अध्यासयामि–वेदनायामवस्थानं करोमि। ठाणा० २४७।

**अहियोगो**–अभियोगः, बलात्कारः। बृ० तृ० २७ अ।

**अहिराया**–अभिराजा, मौलः पृथिवीपतिः। बृ० तृ० ४ अ।

**अहिरिक्कं**–उत्त्रासनम्। व्य० प्र० १४९ अ।

**अहिरीमाणा**–अह्रीमनसः–अलज्जाकारिणः। आचा० २४१।

**अहिर्बुध्न**–उत्तरभाद्रपदादेवता। जं० प्र० ४९९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अहिलाणं**-मुखसंयमनम्। भग० ४८०, जं० प्र० २६५। औप० ७१। मुखसंयमनविशेषः। जं० प्र० २३५।
**अहिलिंति**-समागच्छन्ति। बृ० द्वि० १०८ अ।
**अहिलोडिया** - गोपालिकाख्यो हिंसकजीवः। बृ० तृ० १९० आ।
**अहिल्लियाए**-अहिल्लिका, मैथुने दृष्टान्तः। प्रश्न० ८९।
**अहिवई**-अधिपतिः-आचार्यः। ओघ० ७४।
**अहिवास**-अधिवासः-अवस्थानः। भग० ४७०।
**अहिवासिऊण**-अधिवास्य। आव० २६१।
**अहिसंका**-अभिशङ्का, तथ्यनिर्णयः। सूत्र० ३९३।
**अहिसक्कणं**-उस्सूरे आगच्छंति। नि० चू० प्र० १४२ आ। अभिष्वष्कणं-तस्यैव विवक्षितकालस्य संवर्द्धनं, परतः करणमित्यर्थः। बृ० प्र० २६८ आ।
**अहिसरणेहिं**-अग्गतो वा सरेति। नि० चू० द्वि० ४९ आ।
**अहिसरिया**-अभिसृता। आव० ३७२।
**अहिसलागा**-मुकुलि-अहिभेदविशेषः। प्रज्ञा० ४६।
**अहिसेया**-अभिसेका, गणावच्छेदिनी। बृ० द्वि० २६३ अ।
**अही**-अहिः, सर्पः, उरःपरिसर्पविशेषः। जीवा० ३९। प्रज्ञा० ४५। मुकुलि-अहिभेदविशेषः। प्रज्ञा० ४६। सामान्यतः सर्पः। जं० प्र० १२५।
**अहीणपडिपुन्नपंचिंदियसरीरं**-अहीनप्रतिपूर्णपञ्चेन्द्रियशरीरः, प्रतिपूर्णानि स्वकीयस्वकीयप्रमाणतः, प्रतिपुण्यानि वा-पवित्राणि पञ्चेन्द्रियाणि-करणानि यस्मिंस्तत्तथा, अहीनमङ्गोपाङ्गप्रमाणतः प्रतिपूर्णपञ्चेन्द्रियं प्रतिपुण्यपञ्चेन्द्रियं वा शरीरं। ठाणा० ४५८।
**अहीणपुन्नपंचिंदियसरीरं**-अहीनानि-स्वरूपतः पूर्णानि सङ्ख्यया, पुण्यानि वा-पूतानि पञ्चेन्द्रियाणि यत्र तत्तथा तदेवविधं शरीरं यस्य स। भग० ५४१।
**अहीणो** - अहीनः, प्रकृष्टः, अधीनो वा स्वायत्तः। प्रश्न० १३६।
**अहीनग्रहणं**-समग्रहणम्। व्य० प्र० ८६ आ।
**अहीलणिज्जं** - अहीलनीयम्, अवज्ञातुमनुचितम्। उत्त० ३६५।
**अहुणुव्वासिय**-अधुना यदुद्वसितम्। ओघ० ५७।
**अहुणोत्तणो**-अधुनातनः। आव० ४२१।
**अहुणोववन्ने**-अधुनोपपन्नः, अचिरोपपन्नः। ठाणा० १८७।
**अहुमरेंतो**-उपद्रवन्। आव० २७३।
**अहे**-अधः, आकाशः। सूर्य० ४५। अथशब्दार्थे। बृ० द्वि० १७९ अ। आमन्त्रणार्थो निपातः। भग० ४६०। अथ-आनन्तर्यार्थोऽयं शब्दः। भग० ८३, ८६। गर्त्तायाम्। उत्त० २१३। भूमितले। प्रज्ञा० ८०। अधः। ठाणा० १६२। अथेति परिप्रश्नार्थः। ठाणा० ४०६। अधः-अधस्तात् नीचैः। भग० २६९। अथशब्दश्चेह पदत्रयेऽपि त्रयाणामप्याश्रयाणां प्रतिमाप्रतिपन्नस्य साधोः कल्पनीयतया तुल्यताप्रतिपादनार्थः। ठाणा० १५७। यथार्थः। ठाणा० ३२४। अथशब्दार्थे। बृ० द्वि० १७९ अ। आधाकर्म। बृ० प्र० ८३ अ।
**अहेपन्नगद्धरूवो**-अधःपन्नगार्द्धरूपः, अधस्तनं यत्पन्नगस्यार्द्धं तस्येव रूपमाकारो यस्य सः, अधःपन्नगार्द्धवदतिसरलो दीर्घश्च। जीवा० २०६। अधः-अधस्तनं यत्पन्नगस्यार्द्धं तस्येव रूपम्-आकारो यस्य सः। जीवा० ३६१।
**अहेऊहिं** - अहेतुभिः, क्रियावाद्यादिपरिकल्पितकुहेतुभिः। उत्त० ४४९।
**अहेवाए**-अधोवातः, योऽध उद्गच्छन् वाति वातः सः। जीवा० २९।
**अहेविगडे** - अधोविकटे-अधः-कुड्यादिरहिते छन्नेऽप्युपरि तदभावेऽपि च। आचा० ३०९।
**अहेवियडं**-पार्श्वतोऽप्यावृतं गृहम्। बृ० द्वि० १८१ अ।
**अहेसणिज्जे** - यथाऽसावुद्गमादिदोषरहित एषणीयो भवति तथाभूतो दुर्लभः। आचा० ३७६। यथाऽसौ मूलोत्तरगुणदोषरहितत्वेनैषणीयो भवति, तथाभूतो दुर्लभ इति। आचा० ३६८।
**अहेसि**-अभूवम्। आव० १४६। अभूत्। उत्त० ४९६।
**अहो**-अधः, अर्वाक्। आव० ८२७। दीणभावे, विम्हए, आमंतणे य। दश० चू० ९६। उद्गश्रोतोऽनुकूलम्। नि० चू० तृ० ६३ आ।
**अहोकायं**-अधःकायः पादलक्षणः। आव० ५४७।
**अहोत्था**-अभूत्। उत्त० ४७५।
**अहोधारं**-अहतधारा वर्षा। आव० २९१।
**अहोधिय** - नियतक्षेत्रविषयोऽवधिस्तद्रूपं ज्ञानदर्शनम्। ठाणा० ४७३।
**अहोरत्ता**-अहोरात्राः-त्रिंशन्मुहूर्त्तप्रमाणाः। ठाणा० ८६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**अहोरत्ते**-अहोरात्रम् । भग० ८८८ ।
**अहोराइयाभिक्खुपडिमा** – अहोरात्रप्रमाणा एकादश भिक्षुप्रतिमा । सम० २१ ।
**अहोलोए**-अधोलोकः, तिर्यग्लोकस्याधस्ताल्लोकः । प्रज्ञा० १४४ ।
**अहोलोयतिरियलोए**-अधोलोकतिर्यग्लोकः, यदधोलोकस्योपरितनमेकप्रादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वाधस्तनमेकप्रादेशिकमाकाशप्रदेशप्रतरम् , एतद्द्वयमपि । प्रज्ञा० १४४ ।
**अहोवाए**-अधोवातः, अध उद्गच्छन् यो वाति वातः स । प्रज्ञा० ३० ।
**अहोविहारो**-आश्चर्यभूतो विहारः । आचा० १०७ ।
**अहोवेइया** – अधोवेदिका, यत्र जान्वोरधो हस्तौ कृत्वा प्रतिलिख्यते सा । ओघ० ११० । जाणू हेट्ठाओ हत्थेसु पडिलेहेति । नि० चू० प्र० १८२ अ ।
**अहोसिरा**-अधःशिरसः, अधोमुखाः । जं० प्र० १५४ ।

## आ

**आंगुल**-व्याक्षिप्तः । नि० चू० प्र० ३४७ अ ।
**आंटरगमादि**-वनस्पतिविशेषः । नि० चू० द्वि० १५७ अ ।
**आइं**-निपातः । भग० ६७५ । विस्मयतश्चर्यन्ते । ठाणा० ५२३ । वाक्यालङ्कारे । भग० १७६ । वाक्यालङ्कारार्थः । प्रश्न० ११७ । अलङ्कारे । प्रश्न० १२६ । वाक्यालङ्कारे, अवधारणे वा निपातः । उपा० २७ । आदिः-धर्मस्य प्रथमा प्रवृत्तिः । जीवा० २५५ । गणितप्रक्रियाया आदिः (अंगांकसंख्यान्यासः)। सूत्र० ९ । यस्मात्परमस्ति न पूर्वम् । अनु० ५४ । स्वभेदः । अनु० ३४ ।
**आइंखिणिया**-डोम्बी तस्याः कुलदैवतं घंटीकयक्षोनाम स प्रष्टः सन् करणे कथयति, सा च तेन शिष्टं कथितं सदन्यस्मै कथयति, घंटीय सिट्ठं परिकहेइ । बृ० प्र० २१५ अ ।
**आइअत्ती**-सार्थचिन्तकः । बृ० तृ० २४९ अ ।
**आइक(ग)रे**-आदिकरः, आदौ-प्रथमतः श्रुतधर्मम्-आचारादिग्रन्थात्मकं करोति-तदर्थप्रणायकत्वेन प्रणयतीत्येवंशीलः । भग० ७ ।
**आइक्खंति**-आख्यान्ति, सामान्यतः कथयन्ति । भग० ९८ । ईषद् भाषन्ते । ठाणा० १३६ । आचक्षते । आचा० १७८ ।
**आइक्खगा**-आख्यायकाः, शुभाशुभकथकाः । जं० प्र० १४२ । यः शुभाशुभमाख्याति । प्रश्न० १४१ ।
**आइक्खणं**-संहितोच्चारणम् । बृ० तृ० २५ अ ।
**आइक्खिए**-मातंगविद्या यदुपदेशादतीतादि कथयन्ति डोण्ब्यो बधिरा इति लोकप्रतीताः । ठाणा० ४५१ ।
**आइगर**-आदिकरः, ऋषभनामा भगवान् । उत्त० ६२० ।
**आइच्च** – आदित्यः, अर्चिमालिविमानवासी द्वितीयो लोकान्तिकदेवः । भग० २७१ । आदित्यमासो येन कालेनादित्यो राशिं भुंक्ते । सम० ५६ । आदित्यः । आव० १३५ । सूर्य० २९२ ।
**आइच्चजसाई**-आदित्ययशःप्रभृतिः । नन्दी २४२ ।
**आइच्चजसे**-आदित्ययशा, भरतचक्रिपुत्रः । ठाणा० ४३० ।
**आइच्चपेढं**-आदित्यपीठम् । आव० १४६ ।
**आइच्चसंवच्छरे**-आदित्यसंवत्सरः, युगभाविसंवत्सरविशेषः । सूर्य० १६८ । 'पुढविदगाण' मित्यादिलक्षणः संवत्सरविशेषः । सूर्य० १७१ ।
**आइज्ज**-आदेयः-रम्यः । प्रश्न० ८३ ।
**आइज्जा**-आदेया, दर्शनपथमुपगता, उपादेया सुभगा च । जीवा० २७१ ।
**आइट्ठं**-विशिष्टम् । बृ० तृ० ६६ अ । आविष्टा-अधिष्ठिता । ठाणा० ३२८ ।
**आइ(य)ड्ढि** – आत्मर्द्धिः, आत्मशक्तिः, आत्मलब्धिर्वा । भग० १०७, ४९२ ।
**आइणग**-चर्ममयं वस्त्रम् । जं० प्र० ३६ । मूषकादिचर्मनिष्पन्नानि । आचा० ३९४ ।
**आजिनकं**-चर्ममयो वस्त्रविशेषः । भग० ५४० ।
**आइण्णं** – आकीर्णम्, समन्तान्निक्षिप्तम् । भग० १५३ । सम्बाधनं स्त्रीस्पर्शादिदोषाः । ओघ० ४८ । आचीर्णम् । नि० चू० द्वि० १५७ अ । भावितकुलम् । बृ० प्र० २७० अ ।
**आइण्णंतो**-प्रोतयन् । आव० ४२७ ।
**आइण्णपोग्गलं**-जं काकसाणादीहिं अणिवारियविप्पकिण्ण (मांसं) भिज्जति । नि० चू० तृ० ७२ अ ।
**आइण्णा**-आकुला । नि० चू० प्र० १८६ अ । साधूण कप्पणिज्जा । नि० चू० प्र० १८६ अ । संकुला । आचा० ३३१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आइण्णे**-षष्ठाङ्गे सप्तदशं ज्ञातम्। उत्त० ६१४। सम० ३६।

**आइण्णो**-आकीर्णः, गुणैर्व्याप्तः। जीवा० २७०। जात्यः। औप० ७१। खित्तमिव खलियं गुणेहिं जयविजयाईहिं आपूरिओ, अस्सो जातिरेव वा। दश० चू० १६५।

**आइद्ध**-आरब्धं। (मर०)। आदिग्धः, आलिङ्गितः। प्रश्न० ४१। आविद्धः, प्रेरितः। आव० ६०२।

**आइन्नं** – आचीर्णम्, आसेवितम्। आचा० ५। आयरियपरंपरएणं वालुंकलाओ आदिण्णं णिम्मीसोवक्खडं आसेवितं तं आइन्नं। नि० चू० द्वि० १५७ आ। आत्मीयात्मीयाऽऽवासमर्यादानुलंघनेन व्याप्ताः। भग० ३७। कल्प्यम्। पिण्ड० १६५। आकीर्णम्-राजकुलसङ्खड्यादि। दश० २८०।

**आइन्नवर**-जात्यप्रधानः। भग० ३२२, ४८१।

**आइन्नसंलिक्खं**-रूयादिचित्राकीर्णं। आचा० ३८१।

**आइन्ना**-आकीर्णानि, गुणवन्ति। जं० प्र० २३२।

**आइन्ने**-आकीर्णः, आकीर्यते-व्याप्यते विनयादिभिर्गुणैरिति जात्यादिगुणोपेतं। उत्त० ३४९। व्याप्तः। उत्त० ३४८।

**आइन्नो**-आकीर्णः, सङ्कीर्णः, गुणव्याप्तो मनुष्यजनः। औप० २। विनीतः। उत्त० ४८। आचार्यगुणैराचारश्रुतसंपदादिभिर्व्याप्तः-परिपूर्णः। उत्त० ५५०।

**आइमउ**-आदिमृदु, प्रथमतः कोमलम्। अनु० १३१।

**आइमूलं**-वृक्षादिमूलोत्पत्तावाद्यं कारणम्। आचा० ८७।

**आइयणं**-अदनं, भक्षणम्। आचा० ७२६। व्य० प्र० १८० अ। भोजनम्। बृ० द्वि० १२६ आ। समुद्देशनम्-भोजनम्। बृ० तृ० ४ आ। आपानम्। बृ० द्वि० ३४ अ। ठाणा० ३३१। भूयः प्रत्यापिबति। बृ० तृ० १८५ आ।

**आइयंति**-आददति, गृह्णन्ति, बध्नन्तीत्यर्थः। ठाणा० ३२०।

**आइयति**-आदत्ते। उत्त० १९८।

**आइलं**-आविलम्-गडुलम्। जीवा० ३७०।

**आइलचंदसहिय**-उद्दिष्टचन्द्रसहितः। सूर्य० २८०।

**आइसुए** – आदिश्रुतः, सामायिकादिश्रुतः। बृ० प्र० ३८ आ।

**आइसुयं**-पञ्चमङ्गलम्। बृ० तृ० २४९ आ।

**आइस्सइ**-आविश्यते-अधिष्ठीयते। भग० ७४९।

**आई**-आदिः, संसारः, धर्मकारणानां वाऽऽदिभूतं शरीरम्। सूत्र० १६२। सामीप्यम्, व्यवस्था, प्रकारः, अवयवश्च। प्रश्न० ७। निवेशः। औप० ५।

**आईए**-आतीतः, आ-समन्तादतीव इतो-गतोऽनाद्यनन्ते संसारे। आचा० २८५।

**आईणं**-आजिनकम्, चर्ममयं वस्त्रम्। जीवा० १९२।

**आईणगं**-आजिनकम्, चर्ममयं वस्त्रम्। जीवा० २१०। औप० ११। जं० प्र० ५५। जं० प्र० १०७। निरया० १।

**आईय**-आ-समन्तादतीव इतो-गतोऽनाद्यनन्ते संसारे भ्रमणम्। आचा० २८६।

**आईयट्ठे**-आ-समन्तादतीव इताः-ज्ञाताः परिच्छिन्ना जीवादयोऽर्था येन सोऽयमातीतार्थः आदत्तार्थो वा, यदिवाऽतीताः-सामस्त्येनातिकान्ता अर्थाः-प्रयोजनानि यस्य स तथा, उपरतव्यापारः। आचा० २८६।

**आउ** – वैद्यकम्। आव० ६६०। भवस्थितिहेतवः कर्म्मपुद्गलाः। आचा० १०२।

**आउंटणं** – आकुञ्चनम्, गात्रसङ्कोचलक्षणम्। आचा० ५७४।

**आउंटणपसारणं**-आकुञ्चनप्रसारणम्। आव० ८५३।

**आउंटियं**-संकोचितम्। भग० ६३१।

**आउ**-आयुः, स्थितिः। भग० २३६। उताहो। बृ० प्र० २५० अ। एति-उपक्रमहेतुभिरनपवर्त्यतया यथास्थित्यैवानुभवनीयतां गच्छतीति। उत्त० ३३५। जीवितं। ठाणा० १०८। आयुः, कर्म्मविशेषः। ठाणा० २२०।

**आउकाए**-अप्कायः, पूर्वसमुद्रः, पश्चिमसमुद्रो वा। सूर्य० ४७।

**आउक्खएणं**-आयुःक्षयेण, आयुःपूर्णीकरणेन। आचा० ४२१।

**आउखेम** – आयुःक्षेम-आयुषः सम्यक पालनं। आचा० २९०। जीवितं। आचा० २९१।

**आउज्जं**-आतोद्यम्, वादित्रं, मृदंगादि। आव० ५२८। पटहभेरीवंशवीणाझल्लर्यादीनि। आचा० ६१।

**आउज्जंगं**-आतोद्याङ्गम्, आतोद्यकारणम्। उत्त० १४३।

**आउज्जिय**-आयोगिकः, उपयोगवान्, ज्ञानी। भग० १४०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आउज्जिया**-आयोजिका, आ-मर्यादया केवलिदृष्टया योजनं-शुभानां योगानां व्यापारणम्। प्रज्ञा० ६०४।

**आउज्जियाकरणं**-आयोजिकाकरणम्। प्रज्ञा० ६०४।

**आउज्जीकरणं**-आवर्जीकरणम्, उदीरणावलिकायां कर्मप्रक्षेपव्यापाररूपम्। औप० ११०। आवर्जितकरणम्। प्रज्ञा० ६०४।

**आउज्जो**-आवर्जः, आत्मानं प्रति मोक्षस्याभिमुखीकरणं-आत्मनो मोक्षं प्रत्युपयोजनमिति, अथवा आवर्ज्यते-अभिमुखीक्रियते मोक्षोऽनेनेति वा-शुभमनोवाक्कायव्यापारविशेषः। प्रज्ञा० ६०४।

**आउट्ट**-आकुट्टम्, आलजालम्। उत्त० १४६। आवर्जितः। बृ० द्वि० ३४ आ।

**आउट्टइ**-आवर्त्तते, प्रवर्त्तते। भग० २८९।

**आउट्टणं**-आकम्पनम्। बृ० तृ० ८५ अ।

**आउट्टणया**-आवर्त्तना, आवर्त्तते-ईहातो निवृत्यापायभावं प्रत्यभिमुखो वर्त्तते येन बोधपरिणामेन सः, तद्भावः, अपायपर्यायः। नन्दी १७६।

**आवट्टति**-निवर्त्तते। सूत्र० १९०। आवर्त्तते-निवर्त्तते तमालोचयतीत्यर्थः। ठाणा० १३९। करोति। नि० चू० प्र० २५६ अ।

**आउट्टा** - आराधिता। बृ० द्वि० ११२ अ। आवर्जिता। ओघ० १५९।

**आउट्टामो**-प्रवर्त्तामहे। आचा० ३३१।

**आउट्टावेज्ज**-अभिमुखयेत्। आचा० ३६४।

**आउट्टिआए**-आकुट्या-उपेत्य। सम० ३९।

**आउट्टिज्जमाणं** -आकोट्यमानम्, सङ्कोच्यमानम्। सूत्र० २९८।

**आउट्टि**-उपेत्य। व्य० प्र० १६ आ।

**आउट्टिय**-ज्ञात्वा। आव० ७५८। उत्तमार्थकृतः आहारः। नि० चू० द्वि० ५७ आ।

**आउट्टिया**-आउट्टिया नाम आभोगो जानान इत्यर्थः। नि० चू० द्वि० ५९ आ। आवर्जिता। बृ० द्वि० १८६ आ।

**आउट्टी**-समाधानम्। बृ० तृ० ११३ आ।

**आउट्टे** - कर्तुमभिलषेत्। आचा० ४१७। निवर्त्तयेत्। आचा० १११। आवर्त्तयेत्-अनुकूलयेत्। व्य० द्वि० २८२ आ। आवृत्तः-व्यवस्थितः। आचा० २७९। समन्तात् व्यवस्थितः। आचा० २७९।

**आउट्टेउं**-आवर्ज्य। बृ० तृ० ३४ अ।

**आउट्टो**-व्यावृत्तः। उत्त० ३३२। आवर्जितः। हृष्टः। उत्त० ३३२। स्वस्थः। उत्त० ३५५। आव० २२०। उत्त० १०८। आवृत्तः। आव० ५७८, २९४, ५३६ २८७। उत्त० ३२४। आवर्जितः। आव० ४१२।

**आउडिज्जमाण**-'जुड' बन्धने, इतिवचनाद् 'आजोड्यमानेभ्यः' आसम्बध्यमानेभ्यो मुखहस्तदण्डादिना सह शङ्खपटहझल्लर्यादिभ्यो वाद्यविशेषेभ्य आकुट्यमानेभ्यो वा एभ्य एव ये जाताः शब्दास्ते, आजोड्यमाना आकुट्यमाना एव वोच्यन्ते, अतस्तानाजोड्यमानानाकुट्यमानान् वा शब्दान् शृणोति, इह च प्राकृतत्वेन शब्दशब्दस्य नपुंसकनिर्देशः, अथवा आकुट्यमानानि-परस्परेणाभिहन्यमानानि। भग० २१६।

**आउडेइ**-आजुडति, सम्बद्धं करोति, लिखति। जं० प्र० २५०। आकुट्टयति, ताडयति। जं० प्र० २२४। आकुट्टयति। भग० १७३।

**आउत्त**-आयुक्तम्, उपयोगपूर्वकम्। भग० १८४। सम्यक् प्रवचनमालिन्यादिरक्षणतया। प्रज्ञा० २६८। उपयुक्तः। ठाणा० ४०९। प्रयत्नपरो मरणाराधनयुक्तः। उपयुक्तः। ओघ० २०२। उपयोगतत्परम्। ओघ० १७६। आयुक्तः। व्य० द्वि० २६६ अ।

**आउत्तगो**-आवर्त्तकः। उत्त० ३०४।

**आउत्तियं**-आयुक्तिकम्। उत्त० ११९।

**आउत्तो**-आयुक्तः, व्यवस्थितः। दश० २२६।

**आउय**-आयुष्कम्, जीवितम्। आव० ३४१। आयुष्ककालः, देवाद्यायुष्कलक्षणः। आव० २५७।

**आउयकम्मस्स गालणा**-आयुःकर्मणो गालनं, प्राणवधस्य द्वादशः पर्यायः। प्रश्न० ५।

**आउयकम्मस्स णिट्ठवणं**-आयुःकर्मणो निष्ठापनम्, प्राणवधस्य द्वादशः पर्यायः। प्रश्न० ५।

**आयुकम्मस्स भेय** - आयुःकर्मणो भेदः, प्राणवधस्य द्वादशः पर्यायः। प्रश्न० ५।

**आउयकम्मस्स संवट्टगो**-आयुःकर्मणः संवर्त्तकः, प्राणवधस्य द्वादशः पर्यायः। प्रश्न० ५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आउयकम्मस्सुवद्दवो**-आयुःकर्मण उपद्रवः, प्राणवधस्य द्वादशः पर्यायः। प्रश्न० ५।

**आउयबंधद्धा**-आयुर्बन्धाद्धा। प्रज्ञा० ४८९।

**आउयसंवट्टए**-आयुःसंवर्तक-आयुरुपक्रमः। ठाणा० ६७।

**आउर**-आतुरः, शरीरसमुत्थेनागन्तुकेन वा व्रणेन ग्लानः। दश० २७०। क्षुधा पिपासया वा पीडितः। व्य० प्र० २३ आ। दृष्टान्तः। नि० चू० प्र० २०२ आ। आतुरः, क्वचिदपि स्वास्थ्यमलभमानः सन् आकुलः। जीवा० १२२। आतुरः-दुस्थः। भग० ७०५। ग्लाने सति प्रतिजागरणार्थं (प्रतिसेवा)। ठाणा० ४८४। अत्यन्ताकुलतनुः। उत्त० ८६। कामेच्छाऽन्धाः। आचा० २३८। प्रतिसेवनाभेदः। भग० ९१९। आतुरः, चिकित्साया अविषयभूतः। विपा० ७६। चिकित्साया अविषयभूतो रोगी। बृ० प्र० २८१ आ। मर्त्तुकामः। उत्त० २७३।

**आउरपच्चक्खाण** - नोपूर्वश्रुतप्रत्याख्यानभेदः। विशे० १३२०। प्रकीर्णकनाम। आव० ८०४। श्रुतप्रत्याख्यानम्। आव० ४७९। अस्वास्थ्यमनाः। आचा० ७२। आतुरः-चिकित्साक्रियाव्यपेतः तस्य प्रत्याख्यानवर्णनम्। नंदी २०६। अपूर्वश्रुतप्रत्याख्यानम्। आव० ४७९।

**आउरसरणं**-आरोग्यसाला। दश० चू० ५१।

**आउरस्सरण**-आतुरशरणम्, दोषातुराश्रयदानम्। दश० ११८। आतुरस्मरणम्, क्षुधाद्यातुराणां पूर्वोपभुक्तस्मरणं चानाचरितम्। दश० ११७।

**आउरीभूएहिं**-आकुलीभूतैः, आतुरीभूतैः। बृ० प्र० ३९अ।

**आउल**-आकुलम्। व्यग्रम्। आव० ५८५। प्रचुरम्। भग० ९१। आकुलः, स्कंधः। विशे० ४२६। गड्डुलं, आविलं वा। सम० ५३।

**आउलगमणं**-आकुलगमनं-एकत्र मिलिता गच्छन्ति। ओघ० १२६।

**आउलमाउलं**-आकुलाकुलम्, स्त्र्यादिपरिभोगविवाहयुद्धादिसंस्पर्शननानाप्रकारम्। आव० ५७४।

**आउला**-आकुला, त्वरमाणा। बृ० द्वि० ६५ अ।

**आउलाकुल**-आकुलाकुलः, अतिव्याकुलः। प्रश्न० ५०।

**आउली**-तडवडावृक्षः। जीवा० १९१।

**आउलो**-आकुलः, अभिभूतः। आव० ५८९।

**आउसं** - आयुः-जीवितं तत्संयमप्रधानतया प्रशस्तं प्रभूतं वा विद्यते यस्यासावायुष्ममांस्तस्यामन्त्रणम्। ठाणा० ७।

**आउसंत**-आयुष्मान्, चिरजीवी। दश० १३७। आवसन् गुरुमूलमावसन् वा। दश० १३७।

**आउसंतेणं**-आजुषमाणेन, श्रवणविधिमर्यादया गुरून् सेवमानेन। उत्त० ८०। भगवतेत्यस्य विशेषणमायुष्मता-चिरजीवितवता। सम० २। श्रवणविधिमर्यादया गुरूनासेवमानेन। ठाणा० ९। आयुष्मदन्ते, आयुष्मता। नंदी २१२। आजुषमाणेन-प्रीतिप्रवणमनसा। सम० २। हे आयुष्मन्। सम० २। नंदी २१२। आमृशता-गुरुक्रमयुगलं संस्पृशता। सम० २। गुरुमूलमावसता। दश० १३७। आवसता गुरुकुले। सम० २। आयुष्मन्, शिष्यामन्त्रणम्। उत्त० ८०।

**आउसंवट्टणं** आयुरुपक्रमः। नि० चू० प्र० २७४ अ।

**आउसणाहिं** - आक्रोशना मृतोऽसि त्वमित्यादिभिर्वचनैः। भग० ६८३।

**आउसेइ**-आक्रोशयति, शपति। भग० ६८३।

**आउसो**-आयुष्मन्, पुत्रादेरामन्त्रणम्। भग० १३५।

**आउस्स**-आक्रोशः, असभ्यवचनरूपः। सूत्र० ९३।

**आउस्सियकरणं** - आवश्यककरणम्, आवर्जिकरणम्। प्रज्ञा० ६०४।

**आउहं**-आयुधम्, क्षेप्यं शस्त्रम्। प्रश्न० ४७। अक्षेप्यम्। विपा० ४६। खेटकादि। जीवा० २५९। क्षेप्यास्त्रम्। भग० १९४। शस्त्रम्, अथवाऽऽयुधं-अक्षेप्यशस्त्रं खड्गादि। भग० ३१८।

**आउहसाला**-आयुधशाला-शस्त्रागारम्। आव० १४८।

**आऊ**-आयुः, एति-आगच्छति प्रतिबन्धकतां स्वकृतकर्मबद्धनरकादिकुगतेर्निष्क्रमितुमनसो जन्तोरिति। अथवा आ-समन्तादेति-गच्छति भवाद् भवान्तरसङ्क्रान्तौ विपाकोदयमिति वा। प्रज्ञा० ४५४।

**आए**-अनन्तकायः-कुहणविशेषः। प्रज्ञा० ३३। आत्मना। ठाणा १३९।

**आएस**-प्राघूर्णकः। ओघ० ६७। निर्देशः। नि० चू० प्र० १९ आ। प्राघूर्णक आयातः। ओघ० १०१। आज्ञा। नि० चू० प्र० २८५ आ। आदेश-कृत्रिमकृत-भ्रूकुटीभंगादयः। आचा० ९१। प्राघूर्णकः। आचा०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

१२९, ३५२। कर्मकरादिः। आचा० ४१५। व्यापारनियोजना। आचा० ३१८। दृष्टांतः। आचा० २६२। आदिश्यते इत्यादेशः आचार्यपारम्पर्यश्रुत्यायातो वृद्धवादो, यमैतिह्यमाचक्षते। आचा० २६२। वृद्धवादः। आचा० २६३। प्राघूर्णकः। ठाणा० १३८। उपचारो, व्यवहारः (देशे प्रधाने च)। ठाणा० २२३। एतद्भविष्यतीत्यादिनिर्णयः। उप० मा० गा० ११५। आदेशः, विशेषः, आङिति मर्यादया विशेषरूपानतिक्रमात्मिकया दिश्यते-कथ्यत इति। उत्त० ३२। प्राघूर्णकसाधुः। आव० २६३। प्राघूर्णकः। ओघ० १८३। आदेशः-प्रकारः सामान्यविशेषरूपस्तत्र चादेशेन-ओघतो द्रव्यमात्रतया न तु तद्गतसर्वविशेषापेक्षयेतिभावः, अथवा आदेशेन-श्रुतपरिकर्मिततया। भग० ३५७। आदेशः, कथनम्। उत्त० १४७। संखडिविषयो दृष्टान्तः। बृ० द्वि० १३५ आ। उपचारः। विशे० १३१५। प्राघूर्णकः। नि० चू० प्र० १४ आ। पाहुण्णकं। नि० चू० प्र० २९३ आ। प्राघूर्णकः। बृ० द्वि० १९५ अ। प्रायश्चितप्रकारः। बृ० द्वि० ९८ आ। सूत्रमुच्यते। विशे० २३१। आदेशो नाम ज्ञातवस्तुप्रकारः। स च द्विविधः-सामान्यप्रकारो विशेषप्रकारश्च। विशे० २३०। असत्यार्थादेशः। प्रश्न० १७। विध्यन्तरम्। दश० १३। व्यपदेशः। आचा० ७४। अभ्यर्हितः प्राहुणकम्। उत्त० २७२। अधिकारः। बृ० प्र० २७६ आ। प्रकारः। विशे० ९२२। अनुज्ञा। व्य० द्वि० ३४६ अ। उपचारः, व्यवहारः, स च बहुतरे प्रधाने वाऽऽदिश्यते। ठाणा० २२३। नयान्तरविकल्पः। व्य० द्वि० ३५४ आ। आदिश्यते-आज्ञाप्यत इत्यादेशः-कर्मकरादिः। आचा० ४१५।

**आएसणं**-आवेशनं, अयस्कारकुंभकारादिस्थानम्। औप० ६१।

**आएसणाणि** - आदेशनानि-लोहकारादिशालाः। आचा० ३६६।

**आएसपर**-आदेशः-कर्मकरादिः स चासौ परश्चादेशपरः। आचा० ४१५।

**आएसा**-आदेशः, प्रतिवचनमुत्पादव्ययध्रौव्यवाचकं पदत्रयम्। विशे० २९८।

**आएसावि**-आगमिष्याः। सूत्र० ७६।

**आएसियं**-आदेशम्, विभागौद्देशिकतृतीयभेदः। पिण्ड० ७९।

**आओ**-आयः, प्राप्तिः। विशे० ४५०। उताहो। बृ० द्वि० ७ अ। भागः। आव० ३४२। लाभः, उपादानं, हेतुः। विशे० ५४३। ज्ञानादिनामायहेतुत्वादध्ययनम्। ठाणा० ६। भूमिस्फोटकविशेषः। आचा० ५७।

**आओग** - आयोगः, द्विगुणादिवृद्धया अर्थप्रदानम्। भग० १३५। द्विगुणादिवृद्धयर्थं प्रदानम्। जं० प्र० २३२। अर्थलाभः। औप० १२। अर्थोपायः यानपात्रोष्ट्रमण्डलिकादिः। सूत्र० ४०७। परिकरः। औप० ६३।

**आओगपओगसंपउत्ताई** आयोगेन - द्विगुणादिलाभेन द्रव्यस्य प्रयोगः-अधमर्णानां दानं तत्र सम्प्रयुक्तानि-व्यापृतानि तेन वा सम्प्रयुक्तानि-सङ्गतानि तानि। ठाणा० ४२२। आयोगो-द्विगुणादिवृद्धयाऽर्थप्रदानं, प्रयोगश्च--फलान्तरं तौ संप्रयुक्तौ-व्यापारितौ यैस्ते। भग० १३५।

**आओगपयोगसंपउत्ते** -आयोगप्रयोगाः-द्रव्यार्जनोपायविशेषाः संप्रयुक्ताः-प्रवर्तिता येन। ठाणा० ४६३।

**आओड़ावेइ**-आखोट्यति, प्रवेशयति। विपा० ७२।

**आओसे**-प्रदोषे। ओघ० ७६।

**आओसेज्जा**-आक्रोशयेत्। उपा० ४२।

**आओहणं**-आयोधनम्, (युद्धम्)। ठाणा० ४०२।

**आकंदियं**-आक्रन्दितम्, ध्वनिविशेषकरणम्। प्रश्न० २०।

**आकंपइत्ता**-वैयावृत्त्यादिभिः आकम्प्य-आवर्ज्य। ठाणा० ४८४। यदालोचनाऽऽचार्यं वैयावृत्यकरणादिनावर्ज्य यदालोचनम्। भग० ९१९।

**आकट्टविकट्टिं**-आकर्षवैकर्षिकाम्। भग० ६८५।

**आकट्टिं**-आकृष्टिं। भग० ६८३।

**आकड्डविकड्डिं करेइ**-आकट्टविकट्टिं करोति, आकर्षविकर्षिकां करोति। भग० १६७।

**आकरणम्** - आगरणं, आह्वानम्। ओघ० २०४।

**आकाशम्** आङिति सर्वभावाभिव्याप्त्या काशत इति। उत्त० ६७२। सर्वभावावकाशनात्, आ-मर्यादया काशन्ते-दीप्यन्ते पदार्थसार्था यत्र तत्। आ-अभिविधिना काशन्ते--दीप्यन्ते पदार्था यत्र तत्। अनु० ७४। आङिति मर्यादया-स्वस्वभावापरित्यागरूपया काशन्ते-स्वरूपेणैः प्रतिभासन्ते तस्मिन्पदार्था इति। उत्त० ६७२। बृ० प्र० ९१ अ।

**आकाशगाः** - आगासगा, भूतविशेषाः। प्रज्ञा० ७०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आकासाहि**-आकर्षय । आचा० ३७८ ।
**आकासिइ**-खाद्यविशेषः । जं० प्र० ११८ ।
**आकिण्णं**-अतिकीर्णं । नि० चू० तृ० १३ अ ।
**आकुट्टि**-हिंसा । आचा० ३०५ ।
**आकुट्टिय**-उत्पेत्य । बृ० तृ० १२२ आ ।
**आकुल**-आकुलः, व्याप्तः । जं० प्र० १८८ ।
**आकूतम्**-अभिप्रेतम् । विशे० ८८५ ।
**आकृष्टिविकृष्टि** । व्य० प्र० ९४ आ ।
**आकेवलिआ**-आकेवलिकाः, न केवलं अकेवलम्, तत्र भवा आकेवलिकाः-सद्वन्द्वाः-सप्रतिपक्षा इतियावत् असम्पूर्णा वा । आचा० २४१ ।
**आकोट्टिमं** - आकुट्टिकं यथा रूप्यकोऽधस्तादपि उपर्यपि मुखं कृत्वाऽऽकुट्यते । दश० ८६ ।
**आकोडनं**-आकोटनम्, कुट्टनेनाङ्गे प्रवेशनम् । प्रश्न० ५७ ।
**आकोडेमाणे** - आउडेमाणे, आकुट्यमानम्, आहन्यमानम् । भग० २५१ ।
**आकोसायंतं**-आकोशायमानम्, विकचीभवत । जीवा० २७१ । जं० प्र० १११ ।
**आक्षोधुका**-क्षुधा रहिता । दश० १२७ ।
**आख्यातिकम्**-क्रियाप्रधानत्वात् धावतीति । अनु० ११३।
**आख्यायिकास्थानानि** - अक्खाइयठाणाणि, कथानकस्थानानि । आचा० ४१३ ।
**आगंतागारं**-गामपरिसट्ठाणं, आगंतागारं-बहिया वासो । नि० चू० प्र० १८३ अ । आगन्तुकानां कार्पटिकादीनामगारमागन्तागारम् । सूत्र० ३९३ । ग्रामादेर्बहिरागत्यागत्य पथिकादयस्तिष्ठन्ति । आचा० ३६५ ।
**आगंतार**-यत्रागारिण आगत्य तिष्ठन्ति तदागन्तुकागारम् । बृ० तृ० ४८ आ । प्रसङ्गायाता आगत्य वा यत्र तिष्ठन्ति तदागन्तारम्, तत्पुनर्ग्रामान्नगराद्वा बहिः स्थानं तत्र । आचा० ३०७ । आगन्तागारम् ( धर्मशाला ) । आचा० ३०६ । पत्तनाद्बहिर्गृहम् । आचा० ३४८ ।
**आगंतु**-आगन्तुकः-पथिकादिरगारस्थजनो यत्रागत्य सन्तिष्ठते । बृ० द्वि० १७९ आ ।
**आगंतुओ**-आगन्तुकः, कण्टकादिप्रभवः । आव० ७६४ ।
**आगंतुगो**-आगामुकः । आव० २७० । आगंतुएण सत्थातिणाकओ जो सो । नि० चू० प्र० १८८ आ ।

**आगंतुय**-आगन्तुकः । दश० १०८ ।
**आगंतू**-आगन्तुकः । उत्त० १९३ ।
**आगंपिया**-वशीकृता । नि० चू० द्वि० ९७ अ ।
**आगइ**-आगतिः, प्रत्यावृत्त्या-प्रातिकूल्येनागमनम् । आव० २८१ । प्रज्ञापकप्रत्यासन्नस्थाने आगमनम् । ठाणा० १३३ ।
**आगम** - आगमनम्-आगमः-आ-अभिविधिना मर्यादया वा गमः-परिच्छेद इति । आव० २६ । आचार्यपारम्पर्येणागतः, आप्तवचनं वा । अनु० ३८ । आगम्यन्ते-परिच्छिद्यन्ते अर्था अनेनेति, केवलमनःपर्यायावधिपूर्वचतुर्दशकदशकनवकरूपः । ठाणा० ३१७ । सूत्रार्थोभयरूपः । आव० ५२४ । आगम्यन्ते-परिच्छिद्यन्ते अर्था अनेन इति आगमः-आप्तवचनसम्पाद्यो विप्रकृष्टार्थप्रत्ययः । ठाणा० २६२ । गुरुपारम्पर्येणागच्छतीति आगमः, आ-समान्ताद्गम्यन्ते-ज्ञायन्ते जीवादयः पदार्था अनेनेति वा । अनु० २१९ । आप्तप्रणीतः । आचा० ४८ । (आगमसिद्धः) । ठाणा० २५ । सूत्रम् । आव० ६०४ । श्रुतपर्यायः । विशे० ४१६ । अध्ययनम् । आव० ३०० । आगमः, प्राप्तिः । दश० १६ । सङ्ग्रहम् । बृ० प्र० ३२ आ । अर्थपरिज्ञानम् । व्य० प्र० २५१ आ । आ-अभिविधिना सकलश्रुतविषयव्याप्तिरूपेण मर्यादया वा यथावस्थितप्ररूपणारूपया गम्यन्ते - परिच्छिद्यन्तेऽर्था येन सः । नंदी २४९ । आगच्छति गुरुपारम्पर्येणेत्यागमः । भग० २२२ । आगमः । विशे० ४३२ ।
**आगमकुसला**-आगमः-श्रुतिस्मृत्यादिरूपस्तस्मिन् कुशलावागमकुशलौ । उत्त० ५२१ ।
**आगमणं**-प्रयोजनपरिसमाप्तौ पुनर्वसतिं गमनम् । आव० ५७३ । आकसणं । नि० चू० तृ० ६३ आ ।
**आगमणगिहं** - सभाप्रपादेवकुलादिपथिकस्थानम् । बृ० द्वि० १७९ आ । आगमनगृहं-सभाप्रपादि, पथिकादीनामागमनेनोपेतं, तदर्थं वा गृहम् । ठाणा० १५७ ।
**आगमतः**-आगममाश्रित्य (ज्ञानापेक्षयेत्यर्थः) । अनु० १४ ।
**आगममाणे** - आगमयन्-आपादयन् । आचा० २७८ । २८३ । अवगमयन्, बुध्यमानः । आचा० २४५ ।
**आगमववहारी**-आगमववहारी,छव्विहे-केवलणाणी ओहीणाणी मणपज्जवणाणी चोद्दसपुव्वी अभिण्णदसपुव्वी णवपुव्वी य । नि० चू० तृ० १०० अ । आगमव्यवहारिणः,



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यवहारपञ्चके प्रथमभेदः। व्य० प्र० ५ अ। प्रत्यक्षज्ञानिनः। व्य० प्र० ६३ अ।

**आगमसत्थ**-आगमशास्त्रम्, आ-अभिविधिना सकलश्रुतविषयव्याप्तिरूपेण मर्यादया वा यथावस्थितप्ररूपणारूपया गम्यन्ते-परिच्छिद्यन्तेऽर्था येन स आगमः, स चैवं व्युत्पत्त्या अवधिकेवलादिलक्षणोऽपि भवति ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह-'शास्त्रे'ति शिष्यतेऽनेनेति शास्त्रमागमरूपं शास्त्रमागमशास्त्रम्। नंदी २४९।

**आगमिपल्लगो**-ज्ञातः। आव० ३१७।

**आगमिओ**-आगमितः, ज्ञातः। आव० ४३७।

**आगमियं**-ज्ञातम्। आव० ११६। ओघ० १०५। ज्ञातः। आव० ३१६।

**आगमियाणि**-प्राप्तानि, अधीतानि। आव० ४३३।

**आगमिस्सं**-आगमिष्यम्, आगामि। आचा० १६७।

**आगमिस्सभद्दत्ताए** - आगमिष्यदिति - आगामिकालभावि भद्रं-कल्याणं यस्मिँस्तथा तस्य भावस्तत्ता तया, यदि वाऽऽगमिष्यतीत्यागमः-आगामी कालस्तस्मिन् शश्वद्भद्रतया-अनवरतकल्याणतयोपलक्षितम्। उत्त० ५८५।

**आगमिस्सा**-आगामिकालः। आव० ५३२।

**आगमेति**-जानाति। विपा० ७३।

**आगमेयव्वं**-आगमयितव्यम्-ज्ञातव्यम्। बृ० प्र० १९२ अ।

**आगमेसा**-आगमिष्यन्ती। आव० १७४।

**आगमेसिभद्दा**-आगमिष्यत् भद्रा-द्वितीयभवे अन्तकृतः। उपा० २९।

**आगमेस्संति** - आगमिस्यामि-गृहीष्यामि। व्य० द्वि० ४१८ आ।

**आगमेस्सा**-भविष्यतः (मर०)।

**आगमेस्साणं**-आयत्याम्। आव० ३५८। भविष्यताम्। (महाप्र०)।

**आगमोगं**-आगमौकः, पथिकाद्यगारिणां स्थानं, तेषां आगमने वा यद् गृहं तत्। बृ० द्वि० १७९ आ।

**आगयं**-आगतम्-स्वीकृतम्। आचा० १८१।

**आगया**-आगताः-सिद्धाः। रागद्वेषाभावात् पुनरावृत्तिरहिताः सर्वज्ञाः। आचा० १६७।

**आगयपण्हय** - आयातप्रश्रवा पुत्रस्नेहादागतस्तनमुखस्तन्येत्यर्थः। भग० ४६०।

**आगर** - आकर, यत्र संनिवेशे लवणाद्युत्पद्यते। ठाणा० ४४९। उत्पत्तिस्थानम्। (मर०)। अन्त० ७। पृथिव्याद्याकरः। आव० ६२२। लोहाद्युत्पत्तिभूमिः। ठाणा० २९४, ७८६। आकरः, हिरण्याकरादि। प्रज्ञा० ४८। खानिः। प्रश्न० ३८। ओघ० ९। रत्नादीनामुत्पत्तिभूमिः। प्रश्न० १३४। उत्त० ६०५। हिरण्याकरादिकः। जीवा० २७९। लोहाद्युत्पत्तिस्थानम्। प्रश्न० १२७। अनु० १४२। आगत्य तस्मिन्कुर्वतीत्याकरः। आचा० ५। हिरण्याकरादिः। जीवा० ४०। लोहाद्युत्पत्तिस्थानम्। भग० ३६। भिल्लपल्ली भिल्लकोट्टं वा। नि० चू० तृ० ५२ अ। बृ० द्वि० २४६ अ। कुत्रिकापणादिः। बृ० द्वि० २४२ अ। जत्थ घरट्टादिसमीवेसु बहुं जव भुसुट्टं सो। नि० चू० प्र० ६२ अ। रूप्यसुवर्णाद्युत्पत्तिस्थानम्। नंदी २२८। सुवर्णादेरुत्पत्तिस्थानम्। ओघ० ९५। ताम्रादेरुत्पत्तिस्थानम्। आचा० ३२९। सुवर्णादिधातूनां खानिः। नि० चू० द्वि० ७० आ।

**आगरमहेसु**-आकरमहो-खानिमहोत्सवः। आचा० ३२८।

**आगररूवं**-आकररूपम्। भग० १९३।

**आगरिस**-आकर्षः-चारित्रस्य प्राप्तिः। भग० ९०५। आकर्षः-तथाविधेन प्रयत्नेन कर्मपुद्गलोपादानम्। प्रज्ञा० २१८। आकर्षणम्, प्रथमतया मुक्तस्य वा ग्रहणम्। आव० ३६३। एकानेकभवेषु ग्रहणानि। आव० १०५। आकर्षमाकर्षः-एकस्मिन्नानाभवेषु वा पुनः पुनः सामायिकस्य ग्रहणानि प्रतिपत्तये। अनु० २६०।

**आगलणं**-वैकल्पम्। व्य० प्र० १३२ आ।

**आगलेंति**-आकलयन्ति, जेष्याम इत्यध्यवस्यन्ति। भग० १७४।

**आगलेइ**-गृह्णाति। उप० मा० गा० ३१३।

**आगल्लो**-ग्लानः। बृ० तृ० १२२ आ।

**आगसणं**-आकृष्यत इति आगसणं तं च दविणं। नि० चू० प्र० १७४ आ।

**आगाढं**-कर्कशम्। बृ० द्वि० ७३ आ। तीव्रः। आव० ५८८। अत्यर्थम्। व्य० प्र० २५२ अ।

**आगाढजोग**-आगाढयोगः, गणियोगः। ओघ० १८१।

**आगाढपण्ण**-आगाढप्रज्ञः, आगाढा-अवगाढा परमार्थ-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पर्यवसिता तत्त्वनिष्ठा प्रज्ञा-बुद्धिर्यस्यासौ। सूत्र० २३७। शास्त्राणि। व्य० प्र० २२६ अ।

**आगाढो**-आगाढतरा जम्मि जोगे जतणा सो। नि० चू० प्र० १९७ अ।

**आगामिपहं**-आगामिपथः, आगामिनो-लब्धव्यस्य वस्तुनः पन्थाः। ठाणा० ९८।

**आगार**-गृहम्। अनु० २४४। आकारः-आक्रियतेऽनेनाभिप्रेतं ज्ञायत इति, बाह्यचेष्टारूपः। आव० २८१। प्रत्याख्यानापवादहेतवोऽनाभोगादयः। आव० ८४०। आकारः-आक्रियत इत्याकारः-प्रत्याख्यानापवादहेतुर्महत्तराद्याकारः। भग० २९६। आकाराः-प्रत्याख्यानापवादहेतवोऽनाभोगादयः। ठाणा० ४९८। शरीरगता भावविशेषाः। व्य० प्र० ६४ आ। प्रतिनियतोऽर्थग्रहणरिणामः। प्रज्ञा० ५२६। तच्छायामात्रम्। प्रज्ञा० ३७१। प्रत्याख्यानापवादहेतुरनाभोगादिः। आव० ८४०। बाह्यचेष्टारूपः। विशे० ८८५। आकृतयः, स्वरूपाणि। अनु० १३१। ठाणां० ३९५। दिगवलोकनादि। बृ० प्र० ४३ अ। आकृतिः। जीवा० २०७। प्रभा। जीवा० २६५। प्रतिवस्तु प्रतिनियतो ग्रहणपरिणामः। जीवा० १८। मूर्त्तिः। जीवा० २७३। विशेषांशग्रहणशक्तिः। भग० ७३। स्थूलधीसंवेद्यः प्रस्थानादिभावाभिव्यञ्जको दिगवलोकनादिः। उत्त० ४४। सन्निवेशविशेषः। सूर्य० २९३।

**आगारधम्मं** - आगारधर्मः-द्वादशव्रतरूपो गृहस्थधर्मः।

**आगारभाव**-आकारभावः, स्वरूपविशेषः। जं० प्र० १८। जीवा० १७६। आकार एव भावः। आव० ३३८।

**आगारभावपडोयारे**-आकारभावप्रत्यवतारः, आकारस्य-आकृतेर्भावाः-पर्यायाः, अथवा आकाराश्च भावाश्च आकारभावास्तेषां प्रत्यवतारः-अवतरणमाविर्भावः। भग० २७७।

**आगारभावमायाए**-आकारभाव एव आकारभावमात्रं। आव० ३३८।

**आगारभेय**-आकारभेदः। प्रज्ञा० ५३१।

**आगाल**-आगालः, आगालनमागालः-समप्रदेशावस्थानम्। आचा० ५।

**आगास** - आकाशम्, अनावृतस्थानम्। प्रश्न० १३८। आकाशम्, सर्वद्रव्यस्वभावानाकाशयति-आदीपयति तेषां स्वभावलाभेऽवस्थानदानादिति, आङ्-मर्यादाऽभिविधिवाची, तत्र मर्यादायामाकाशे भवन्तोऽपि भावाः स्वात्मन्येवाऽऽसते नाकाशतां यान्तीत्येवं तेषामात्मसादकरणाद्, अभिविधौ तु सर्वभावव्यापनादाकाशमिति। ठाणा० ५५। 'आङ्' इति मर्यादया स्वस्वभावापरित्यागरूपया काशन्ते-स्वरूपेण प्रतिभासन्ते अस्मिन् व्यवस्थिताः पदार्था इत्याकाशम्, यदा त्वभिविधावाङ् तदा 'आङ्' इति सर्वभावाभिव्याप्त्या काशते इत्याकाशम्। प्रज्ञा० ९। आकाशम्-तृणादिरहितम्। बृ० प्र० ९१ अ। आ-मर्यादया अभिविधिना वा सर्वेऽर्थाः काशन्ते-स्वं स्वभावं लभंते यत्र तदाकाशम्। भग० ७७६। आङिति मर्यादया स्वस्वभावापरित्यागरूपया काशन्ते-स्वरूपेणैव प्रतिभासन्ते तस्मिन्पदार्था इत्याकाशं, यदा त्वभिविधावाङ् तदा आङिति-सर्वभावाभिव्याप्त्या काशत इति। उत्त० ६७२।

**आगासगामितं**-आकाशगामित्वम्। ठाणा० ३३२।

**आगासगयं**-आकाशगतं-व्योमवर्ति आकाशकं वा-प्रकाशमित्यर्थः। सम० ६१।

**आगासतल**-आकाशतलम्। जीवा० २६९। कटाद्यच्छन्नकुट्टिमम्। जं० प्र० १०६। आव० ६९५, ६९९।

**आगासथिग्गलं** - आकाशथिग्गलं, शरदि मेघापान्तरालवर्त्याकाशखण्डम्। प्रज्ञा० ३६०। शरदि मेघमुक्तमाकाशखण्डम्। जं० प्र० ३२।

**आगासफलिहं**-आकाशस्फटिकम्, अतिस्वच्छस्फटिकविशेषः। जीवा० २५३। जं० प्र० २७५। भग० १०।

**आगासफलितोवमा**-आकाशस्फटिकोपमा। प्रज्ञा० ३६४।

**आगासफलोवमाइ**-खाद्यविशेषः। जं० प्र० ११८।

**आगासवासिणो** - जातिजुंगितविशेषाः। नि० चू० द्वि० ४३ आ।

**आगासाइवाई**-आकाशादिवादिनः, अमूर्त्तानामपि पदार्थानां साधन(ने) समर्थवादिनः। औप० २९। आकाशातिपातिनः-आकाशं-व्योमातिपतन्ति-अतिक्रामन्ति आकाशगामिविद्याप्रभावात् पादलेपादिप्रभावाद्वा आकाशाद्वा हिरण्यवृष्ट्यादिकमिष्टमनिष्टं वाऽतिशयेन पातयन्तीत्येवंशीलाः। औप० २९।

**आगासिया** - आकाशिता, आकाशं-अम्बरमिता-प्राप्ता, आकर्षिता वा-आकृष्टा, उत्पाटितेति वा। औप० २२।

**आघं**-सूत्रकृतांगे प्रथमश्रुतस्कंधे दशमाध्ययननाम। सूत्र० १८६। आख्यातवान्। सूत्र० १८८।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आघंसणं**-एतेहिं एक्कंसि आघंसणं । नि० चू० द्वि० ११९ अ। नि० चू० प्र० १९० अ।

**आघवइत्ता** - धर्म्ममाख्याय, आख्याय सामान्यतो यथा कार्यो धर्म्मः। ठाणा० ११९। आख्यायकः-प्रज्ञापकः। ठाणा० २६७।

**आघवउ**-आख्यातः, तस्मिन् क्षेत्रे प्रसिद्धः। आव० ५२४।

**आघवणा**-आख्याना। उपा० ४७।

**आघविए** - आख्यातः, सामान्यविशेषपर्यायाभिव्याप्तिकथनेन। उत्त० ५९८।

**आघविज्जंति**-प्राकृतशैल्या आख्यायन्ते-सामान्यविशेषाभ्यां कथ्यन्ते। सम० १०९। नंदी० २१२।

**आघवियं**- अर्घापितम्, अर्घः-पूजा तस्य आपः-प्राप्तिर्जाता यस्य तत्, अर्घं वा आपितं-प्रापितं यत्तत्। प्रश्न० ११३।

**आघवेइ** - आख्यापयति सामान्यविशेषरूपतः। ठाणा० ५०२। भग० ७११।

**आघवेज्ज**-आग्राहयेच्छिष्यान् अर्घापयेद् वा-प्रतिपादनतः पूजां प्रापयेत्। भग० ४३६।

**आघाअ,०ए**-आघातः। दश० २०१। मरणम्। सूत्र० १७८। तथाविधयतनयाऽन्यप्राणिनामात्मनश्च विधिवत् संलिखितशरीरतया यस्मिँस्तत्। उत्त० २४९।

**आघातणं**-आघातनम्, यत्र सङ्ग्रामे बहूनि मृतानि तत्। आव० ७४४।

**आघातो**-जावंतो भूतो अगणि समासमल्लियंते ते सव्वे घातयतीति। दश० चू० ९८।

**आघादियं**-कथयित्वा। नि० चू० द्वि० ७१ अ।

**आघायठाणं**-आघातस्थानम्, वधस्थानम्। आव० ७४१।

**आघायणं**-आघातनम्, वध्यभूमिमण्डलम्। प्रश्न० ५९। जत्थ (मूषकादि) हतो तं। नि० चू० तृ० ७२ अ।

**आघायाय**-आघातयन्, संलेखनादिभिरुपक्रमकारणैः समन्ताद्घातयन्-विनाशयन्। उत्त० २५४।

**आचरियं**-आचरितम्, कल्प्यम्। दश० ११६।

**आचारः**-(आयार), चक्रवालसामाचारीरूपः। बृ० प्र० २४९ आ। साध्वाचारप्रतिपादको ग्रन्थः। विशे० ६४८। शास्त्रविहितो व्यवहारः। उत्त० ७११। व्यवहारः। ठाणा० ६४। वेषधारणादिको बाह्यः क्रियाकलापः। उत्त० ४९९। पूर्वपुरुषाचरितो ज्ञानाद्यासेवनविधिः, तत्प्रतिपादको ग्रन्थः। नंदी २०९। चारित्रम्। उत्त० ५८३। आचरणमाचारः-उचितक्रिया विनय इतियावत्। उत्त० ३४४।

**आचारप्रणिधिः**-(आयारपणिही), दशवैकालिकस्याष्टममध्ययनम्। दश० २२४।

**आचारवस्तु** - (आयारवत्थू), नवमपूर्वगततृतीयवस्तु। उत्त० २५८।

**आचारसम्पत्**-(आयारसंपया), संयमध्रुवयोगयुक्ततादिचतुर्भेदभिन्ना सम्पत्। उत्त० ३९।

**आचारिकम्**- (आयरियं), निजनिजाचारभवमनुष्ठानम्। उत्त० २६६।

**आचार्यपरिभाषित्वम्** - (आयरियपरिभासित्तं), पञ्चमसमाधिस्थानम्। प्रश्न० १४४।

**आचालो**-आचालः, आचाल्यतेऽनेनातिनिविडं कर्मादीत्याचालः। आचा० ५।

**आच्छिदणं** - एक्कसि ईषद्वा छेदनम्। नि० चू० प्र० १८९ अ।

**आजवंजवीभाव**-पुनः पुनर्भ्रमणभावः। आचा० ७९। उत्त० ३३६।

**आजवंजवे**-अजवंजवी, पुनः पुनर्भ्रमणम्। आचा० १६३।

**आजाइ**-आजायन्ते तस्यामित्याजातिः, आचारपर्यायः। आचा० ६। आजाति-मनुष्यजन्म गर्हिता जात्यैश्वर्यरूपादिरहिततया। ठाणा० ४१९। सम्मूर्च्छनगर्भोपपाततो जन्म। ठाणा० ५१२। च्युतस्योद्वृत्तस्य वा कुमानुषत्वतिर्यक्त्वरूपा गर्हिता कुमानुषादिर्वादेव। ठाणा० १३२।

**आजाइसहस्स**-आजातिसहस्रम्, अनेकेषु देवादिजन्मसु प्रतिजीवं क्रमप्रवृत्तेषु अधिकरणभूतेषु बहून्यायुष्कसहस्राणि तत्स्वामिजीवानामाजातीनां च बहुशतसहस्रसङ्ख्यत्वात्। भग० २१५।

**आजिणभद्दो**-आजिनभद्रः, आजिने द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९

**आजिणमहाभद्दो**-आजिनमहाभद्रः, आजिने द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६९।

**आजिणयं**-आजिनकम्, चर्ममयं वस्त्रम्। जीवा० २६९।

**आजिणवरभद्दो**-आजिनवरभद्रः, आजिनवरे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आजिणवरमहाभद्दो** – आजिनवरमहाभद्रः, आजिनवरे द्वीपेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरमहावरो**--आजिनवरमहावरः, आजिने समुद्रे आजिनवरे समुद्रे चापरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरावभासभद्दो**–आजिनवरावभासभद्रः, आजिनवरावभासे द्वीपे पूर्वार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरावभासमहाभद्दो**-आजिनवरावभासमहाभद्रः, आजिनवरावभासे द्वीपेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरावभासमहावरो**–आजिनवरावभासमहावरः, आजिनवरावभासे समुद्रेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरावभासवरो**–आजिनवरावभासवरः, आजिनवरावभासे समुद्रे पूर्वार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**आजिणवरावभासो** – आजिनवरावभासः, द्वीपविशेषः, समुद्रविशेषश्च । जीवा० ३६९ ।

**आजिणवरो**–आजिनवरः, आजिने समुद्रे, आजिनवरे समुद्रे च पूर्वार्द्धाधिपतिर्देवः । जीवा० ३६९ । द्वीपविशेषः, समुद्रविशेषश्च । जीवा० ३६८ ।

**आजिणो** – आजिनः, द्वीपविशेषः समुद्रविशेषश्च । जीवा० ३६८ ।

**आजीव**–आजीवः, आजीविका । पिण्ड० १२१ । आजीविकः । व्य० प्र० १६३ अ । भगवत्यष्टमशतकपंचमोद्देशकः । भग० ३२८ ।

**आजीवक**–निह्नवः । उप० मा० गा० ४५९ । (आजीवग) गोशालकमतानुसारी । दश० २२२ ।

**आजीवगदिट्ठंतो** – आजीवदृष्टान्तः, आ–सकलजगदभिव्याप्त्या जीवानां यो दृष्टान्तः–परिच्छेदः सः, सकलजीवदर्शनम् । जीवा० १३७ ।

**आजीवगा**–आजीविकाः पंडरभिक्खुआ । नि० चू० द्वि० ९८ अ ।

**आजीवगो**–आजीवगः, आ–समन्ताज्जीवन्त्यनेनेत्याजीवः–अर्थनिचयस्तं गच्छति–आश्रयत्यसौ, आजीवगः–अर्थमदः । सूत्र० २३७ ।

**आजीववत्तिया** – आजीववृत्तिता, जात्याद्याजीवनेनात्मपालना । दश० ११७ ।

**आजीवणपिंडो**–जातिमातिभावं उवजीवतित्ति आजीवणपिंडो । नि० चू० द्वि० ९७ आ ।

**आजीवभयं**–आजीविकाभयम्, निर्धनः कथं दुर्भिक्षादावात्मानं धारयिष्यामीति भयम् । आव० ६४६ । वृत्तिभयम् । प्रश्न० १४३ । दुर्जीविकाभयम् । आव० ४७२ ।

**आजीवियसुत्तपरिवाडीए**–आजीविकसूत्रपरिपाट्याम् गोशालकमतप्रतिबद्धसूत्रपद्धत्याम् । सम० ४२ ।

**आजीविया** – आजीविकाः, पाषण्डिविशेषाः, नाग्न्यधारिणः गोशालकशिष्याः, आजीवन्ति वा येऽविवेकिलोकतो लब्धिपूजाख्यात्यादिभिस्तपश्चरणादीनि ते आजीविकाऽस्तित्वेनाजीविकाः । भग० ५० । पाखण्डविशेषाः, गोशालमतानुसारिणः, आजीवंति येऽविवेकतो लब्धिपूजाख्यात्यादिभिश्चरणादीनि । प्रज्ञा० ४०६ । औप० १०६ । आजीविकाः–गोशालकशिष्याः । भग० ३६७ । ठाणा० २३२ । आजीविकाः गोशालकप्रवर्तिताः । सम० १३० ।

**आजीवी**–वेषविडम्बकः । उप० मा० गा० २९८ ।

**आजोअणंतरं**–आयोजनान्तरम्, योजनपरिमाणम् । आव० २३१ ।

**आजोग**–आयोगः, व्यापारणम् । उत्त० ७१० । आव० ६९४ ।

**आजोजिया**–आयोजिका, आयोजयति जीवं संसारे इति, क्रियाविशेषः । प्रज्ञा० ४४५ ।

**आडंबरो**–आडम्बरः, मातङ्गनामा यक्षः । आव० ७४३ । पटहः । ठाणा० ३९५ । अनु० १२९ । यक्षः । व्य० द्वि० ।

**आडहइ**–आदधाति, नियुङ्क्ते । औप० ६४ ।

**आडा**–लोमपक्षिविशेषः । प्रज्ञा० ४९ ।

**आडासेतीय**–आडासेतीकः, पक्षिविशेषः । प्रश्न० ८ ।

**आडुआलित्तं**–मिश्रितं, विलोडितम् । आव० ३४२ ।

**आडोव**–आटोपः, स्फारता । प्रश्न० ४८ । औप० ५३ ।

**आडोवेइ**–आटोपयेत्, वायुना पूरयेत् । भग० ८२ ।

**आडोहिंतो**–जलं विलोढयन् । बृ० द्वि० ७२ आ ।

**आढइ**–गुच्छविशेषः । प्रज्ञा० ३२ । आढकी, गुच्छविशेषः । आचा० ५७ ।

**आढए**--आढकः, मानविशेषः । भग० ३१३ ।

**आढगं**–आढकः, प्रस्थचतुष्टयनिष्पन्नः । अनु० १५१ । चतुःप्रस्थपरिमाणम् । आव० २३८ ।

**आढगमो**–आढककः, मानविशेषः । उत्त० १४३ ।

**आढणं**–आदरः । बृ० द्वि० ७६ आ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आढत्तं**-आरब्धम्। भग० २८२।
**आढत्ता**-आरब्धा। आव० २३७।
**आढत्तो**-आरब्धः। आव० १०३, ४१३, २६२। दश० ९७।
**आढयं**-आढकः, सेतिकाप्रमाणः। जं० प्र० २४४।
**आढवेइ**-आरभते। दश० ३८।
**आढवेऊण**-आरभ्य। आव० ३४१।
**आढा**-आदरः। बृ० द्वि० ६७ आ।
**आढाति**-आद्रियते। दश० ५९। आव० ९२, ८१२।
**आढायमाणे**-आद्रियमानः। आचा० २८४।
**आणं**-आज्ञां-योगेषु प्रवर्त्तनलक्षणाम्। ठाणा० ३३१। विधिविषयमादेशम्। ठाणा० ३८६।
**आणंतरिए**-आनन्तर्यम्-सातत्यमच्छेदनमविरहः। ठाणा० ३४६।
**आणंद**-आनन्दः, द्वितीयमासक्षपणे भिक्षादाता। आव० २००। उपासकदशांगाद्यध्ययनम्, तन्नाम श्रावकः। उपा० १। गाथापतिः। आव० २१५। नालंदबाहिरिकायां गाथापतिः। भग० ६६२। आनन्दः, षष्ठो बलदेवविशेषः। आव० १५९। श्रुतेन सामायिकाप्तौ दृष्टांतः। आव० ३४७। षोडशः मूहूर्तविशेषः। सूर्य० १४६। जं० प्र० ४९१। धरणेन्द्ररथानीकाधिपतिः। ठाणा० ३०२। षष्ठो बलदेवः। सम० १५४। शीतलजिनाद्यगणभृत्। सम० १५२। भगवान् महावीरशिष्यः। भग० ६६८। अवधिनिर्णयविषये श्रमणोपासकः। सूत्र० ९। प्रथमश्रावकनाम। आव० २१५।
**आणंदकूडे**-आनन्दनाम्नो देवस्य कूटमानन्दकूटम्। जं० प्र० ३१३।
**आणंदपुरं**-आनन्दपुरम्, इहलोकगुणविषये कच्छदेशे नगरम्। आव० ८२४। द्रव्यमूढोदाहरणे पुरं। नि० चू० द्वि० ४२ अ। स्थलपत्तनविशेषः। नि० चू० प्र० २२९अ। (मार्गोपसंपदि) नगरविशेषः। नि० चू० प्र० २४१ अ। नगरनिशेषः। नि० चू० द्वि० ७१ अ। क्षेत्रविपर्यासे नगरविशेषः। नि० चू० द्वि० ८ अ।
**आणंदपुरे** मूलचैत्यगृहे सर्वजनसमक्षं दिवसतः कल्पकर्षणं भवति। नि० चू० प्र० ३५५ अ।
**आणंदरक्खिए**-आनन्दरक्षितः, पार्श्वापत्यस्थविरनाम। भग० १३८।
**आणंदा**-आनन्दा, पूर्वदिग्रुचकवास्तव्या दिक्कुमारी। आव० १२२। दक्षिणदिग्भाव्यञ्जनपर्वतस्यापरस्यां पुष्करिणी। जीवा० ३६४। अंजनकपर्वते पुष्करिणी। ठाणा० २३०। पौरस्त्यरुचकवास्तव्या तृतीया दिक्कुमारी। जं० प्र० ३९१।
**आणंदिए**-आनन्दितः, तुष्टः, हृष्टः, ईषन्मुखसौम्यतादिभावैः समृद्धिमुपगतः। भग० ११९, ३१७।
**आणंदियं**-आनन्दितम्, स्फीतीभूतम्। जीवा० २४३।
**आण**-आज्ञा, श्रुतपर्यायः। विशे० ४२३।
**आणइंति**-आनयन्ति। बृ० द्वि० १०९ अ।
**आणक्खिऊण**-परीक्ष्य। आव० २९१।
**आणक्खिस्सामि** - अन्वीक्षिष्यामि - अन्वेषयिष्यामि। आचा० २८२।
**आणक्खेउं**-परीक्ष्य। ओघ० ३३। अनुमीय। बृ० तृ० १६४ आ।
**आणक्खेऊण**-ज्ञात्वा, निश्चित्य। नि० चू० प्र० ६ आ।
**आणतं**-एकोनविंशतिसागरोपमस्थितिकं विमानम्। सम० ३७।
**आणत्तं**-अन्यत्वम्-अनगारद्वयसम्बधिनो ये पुद्गलास्तेषां भेदः। भग० ७४१।
**आणत्तिअं** - आज्ञप्तिकाम्, आज्ञां प्रत्यर्पयत। जं० प्र० १६२।
**आणत्तो**-आज्ञप्तः। आव० ४१९।
**आणपाण**-आणप्राणः। सूर्य० २९२।
**आणपाणकालो**-आनपानकालः, उच्छ्वासनिःश्वासौ समुदितावेकः। जीवा० ३४४।
**आणपाणलद्धी** - अंतर्मुहूर्तेन चतुर्दशपूर्वपरावर्तनशक्तिः। ओघ० १७८।
**आणमंति** - आनन्ति। भग० १९। उच्छ्वसन्ति, अन्तःस्फुरन्तीमुच्छ्वासक्रियां कुर्वन्ति, आनमन्ति उच्छ्वसन्ति। प्रज्ञा० २१९। 'णमु प्रह्वत्वे' इत्येतस्यानेकार्थत्वेन श्वसनार्थत्वात्, आनन्ति इत्यनेनाध्यात्मक्रिया। भग० १९।
**आणमणिया**-आज्ञापनी, विंशतिक्रियामध्ये द्वादशी क्रिया। आव० ६१२। कार्ये परस्य प्रवर्त्तनं यथेदं कुर्विति भाषा। प्रज्ञा० २५६।
**आणय**-आनतः, नवमदेवलोकनाम। प्रज्ञा० ६९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आणरुई** – आज्ञारुचिः, आज्ञा–सर्वज्ञवचनात्मिका तस्या रुचिः–अभिलाषो यस्य स आज्ञारुचिः। जिनाज्ञैव मे तत्त्वं न शेषं युक्तिजातमिति योऽभिमन्यते स आज्ञारुचिः। प्रज्ञा० ५६।

**आणरुती**–आज्ञारुचिः-आज्ञा–सर्वज्ञवचनात्मिका तया रुचिर्यस्य स तथा, यो हि प्रतनुरागद्वेषमिथ्याज्ञानतयाऽऽचार्यादीनामाज्ञयैव कुग्रहाभावाज्जीवादि तथेति रोचते सः। ठाणा० ५०३।

**आणवणप्पओगे**–आनयनप्रयोगः। आव० ८३४। इह विशिष्टावधिके भूदेशाभिग्रहे परतः स्वयंगमनायोगाद्यदन्यः सचितादिद्रव्यानयने प्रयुज्यते सन्देशकप्रदानादिना त्वयेदमानेयम् इत्यानयनप्रयोगः (देशावकाशिके अतिचारः)। उपा० १०।

**आणवणिया**–अज्ञापनिका, जीवाजीवानानाययतः। ठाणा० ३१७। आज्ञापनस्य–आदेशनस्येयमाज्ञापनमेव वेत्याज्ञापनी सैवाज्ञापनिका, तज्जः कर्म्मबन्धः, आदेशनमेव वेति, आनायनं वा आनायनी। ठाणा० ४३।

**आणवणी**–आज्ञापनी, असत्यामृषाभाषाभेदः। दश० २१०। कार्ये परस्य प्रवर्तनी। भग० ५००।

**आणवेस्सामि**–आनायिष्यामि। आव० ४१०।

**आणा**–आज्ञा, मौनीन्द्रवचनम्। आचा० ४४। तीर्थकरगणधरोपदेशः। दश० २६५। ज्ञानाद्यासेवारूपजिनोपदेशः। भग० ५४। कर्त्तव्यमेवेदमित्याद्यादेशः। भग० १६७। दुवालसंगं गणिपिडगं। नि० चू० तृ० ४ अ। उपदेशः। सूत्र० १८३। अर्थः। आव० ६०४। आज्ञाप्यत–आज्ञा – हिताहितप्राप्तिपरिहाररूपतया सर्वज्ञोपदेश:। आचा० ११३। आज्ञया सूत्राज्ञया अभिनिवेशतोऽन्यथापाठादिलक्षणया अतीतकाले अनंता जीवाश्चतुरन्तं संसारकान्तारं-नारकतिर्यग्नरामरविविधवृक्षजालदुस्तरं भवाद्वीगहनमित्यर्थः, अनुपरावृत्तवन्तो जमालिवत् अर्थाज्ञया पुनराभिनिवेशतोऽन्यथाप्ररूपणादिलक्षणया गोष्ठामाहिलवत् उभयाज्ञया पुनः पंचविधाचारपरिज्ञानकरणोद्यतगुर्वादेशादेरन्यथाकरणलक्षणया गुरुप्रत्यनीकद्रव्यलिंगधार्यनेकश्रमणवत् सूत्रार्थोभयैर्विराध्येत्यर्थः, अथवा द्रव्यक्षेत्रकालभावापेक्षमागमोक्तानुष्ठानमेवाज्ञा तया तदकरणेनेत्यर्थः। सम० १३३। हे साधो! भवतेदं विधेयमित्येवंरूपामादिष्टिः। ठाणा० ३०१। गूढार्थपदैरगीतार्थस्य पुरतो देशान्तरस्थगीतार्थनिवेदनाय गीतार्थो यदतिचारनिवेदनं करोति सा। ठाणा० ३०१। यदगीतार्थस्य पुरतो गूढार्थपदैर्देशान्तरस्थगीतार्थनिवेदनायातिचारालोचनं इतरस्यापि तथैव शुद्धिदानं सा। भग० ३८४। ठाणा० ३१८। आदेशः। भग० १२२। जीवा० २४३। सर्वज्ञवचनात्मिका। प्रज्ञा० ५८। आङिति स्वस्वभावावस्थानात्मिकया मर्यादयाऽभिव्याप्त्या वा ज्ञायन्तेऽर्था अनयेति, भगवदभिहितागमरूपा। उत्त० ४४। आगमः। सूत्र० ४०५। आव० ८६२। उत्त० ४४९। अनुज्ञा। पिण्ड० १६९। गुरुनियोगात्मिका। उत्त० ५७२। यथोक्ताज्ञापरिपालना। नंदी २४८। द्वादशांगं सूत्रार्थोभयभेदेन त्रिविधं, द्वादशांगमेव चाज्ञा, आज्ञाप्यते जन्तुगणो हितप्रवृत्तौ यया साऽऽज्ञेति, अथवा पंचविधाचारपरिपालनशीलस्य परोपकारकरणैकतत्परस्य गुरोर्हितोपदेशवचनमाज्ञा। नंदी २४८। श्रुतस्य पर्यायः। विशे० ४१६।

**आणाइणो**–आज्ञादयः, आज्ञाभङ्गादयः। पिण्ड० ६९।

**आणाइयं** – आज्ञातिगं–आज्ञा–जिनादेशमतिगच्छति–अतिक्रामति यत्तत्, अधर्मद्वारस्य पाठान्तरेणाष्टाविंशतितमं नाम। प्रश्न० २७।

**आणाईसरसेणावच्चं**–आज्ञेश्वरसेनापत्यम्, आज्ञाप्रधानस्य सतो यत् सेनापत्यम्। भग० १५४। स्वस्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यम्। प्रज्ञा० ८९।

**आणाकंखी**–आज्ञाकांक्षी, आगमानुसारप्रवृतिकः। आचा० २१०।

**आणानिद्देसयरे** – आज्ञानिर्देशकरः, आज्ञा–'सौम्य! इदं कुरु इदं च मा कार्षीः' इति गुरुवचनं तस्या निर्देशः, इदमित्थमेव करोमीति निश्चयाभिधानं, तत्करः। उत्त० ४४। भगवदभिहितागमरूपया उत्सर्गापवादाभ्यां प्रतिपादनमाज्ञानिर्देशः इदमित्थं विधेयमिदमित्थं वेत्येवमात्मकः तत्करणशीलस्तदनुलोमानुष्ठानो वा। उत्त० ४४। आज्ञानिर्देशतरः-आज्ञानिर्देशेन वा तरति भवाम्भोधिमिति। उत्त० ४४।

**आणानिद्देसे**–आज्ञानिर्देशः, आज्ञा–भगवदभिहितागमरूपा तस्या निर्देशः–उत्सर्गापवादाभ्यां प्रतिपादनम्। उत्त० ४४।

**आणापाण** – आनप्राणः, उच्छ्वासनिःश्वासकालः। भग० २११।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आणापाणू**-आनप्राणा – उच्छ्वासनिःश्वासकालः संख्यातावलिकाप्रमाणाः । ठाणा० ८५ ।

**आणाफलं** – आज्ञाफलम्–जनेन यथोदितवचनप्रतिपत्तिरूपा फलं प्रयोजनं अस्य । उत्त० ५८० ।

**आणामं**-( अननम्–श्वसनम् ) । भग० १०९ ।

**आणामियं**-आनामितम्, ईषन्नामितम् । प्रश्न० ८२ । आरोपितम् । जीवा० २७३ ।

**आणाय**-आज्ञाय, स्वरूपाभिव्याप्त्याऽवगम्य । उत्त० १०४ । आनायम्, जालम् । उत्त० ४०७ । प्रश्न० २२ ।

**आणारुइ**-आज्ञारुचिः, आज्ञा–सर्वज्ञवचनात्मिका तया रुचिर्यस्य सः । उत्त० ५६३ । आज्ञा–सूत्रव्याख्यानं निर्युक्त्यादिश्रद्धानम् । औप० ४४ । निर्युक्त्यादि तत्र तया वा रुचिः । ठाणा० १९० । भग० ९२६ ।

**आणाविजए** – आज्ञाविचयम्, आज्ञागुणानुचिन्तनम् । औप० ४४ । प्रवचनपर्यालोचनविषयमाज्ञालोचनविषयं धर्मध्यानम् । ठाणा० १९० । आणाविजय–आज्ञा–जिनप्रवचनं तस्या विचयो–निर्णयो यत्र तदाज्ञाविचयम् । भग० ९२६ । आज्ञा वा विजीयते अधिगमद्वारेण परिचिता क्रियते यस्मिन्निति । ठाणा० १९० । आ–अभिविधिना ज्ञायन्तेऽर्था यया साऽऽज्ञा–प्रवचनं सा विचीयते–निर्णीयते पर्यालोच्यते वा अस्मिंस्तत् । ठाणा० १९० ।

**आणावियं**-आनायितम् । आव० ४२२ ।

**आणासापमाणे**-अनाशयमानः, आशाविषयमकुर्वाणोऽनास्वादयन् वाऽभुञ्जानोऽतर्कयन्नस्पृहयन्नप्रार्थयमानोऽनभिलषन् । उत्त० ५८८ ।

**आणितिल्लयं**-आनीतः । आव० ५५८ ।

**आणिमलो**-अनलगिरिगजस्य विष्ठा । नि० चू० प्र० ३४९ अ ।

**आणुकंपिए**-अनुकम्पितः, कृपावान् । भग० १६९ ।

**आणुग**-अनूपः–नद्यादिपानीयबहूलः । बृ० प्र० १७५ आ ।

**आणुगामिए**-देशान्तरगतमपि ज्ञानिनं यदनुगच्छति लोचनवदिति तदेवानुगामिकम् । ठाणा० ३७० । धूमादिहेतुरनुगामि ततो जातमानुगामिकम्–अनुमानं तद्रूपो व्यवसायः । ठाणा० १५१ ।

**आणुगामियं**-आनुगामिकम् । औप० ५८ । आनुगामुकः–अनुगमनशीलः । आव० २८ ।

**आणुगामियत्ताए**-आनुगामिकत्वाय, शुभानुबन्धायेत्यर्थः । भग० ४५९ । भवपरम्परानुबन्धसुखाय । भग० ११५ ।

**आणुपुव्वी**-आनुपूर्वी, शिष्यप्रशिष्यपरम्परात्मिका । उत्त० ८ । कमेण मरणकालं पत्तस्स आणुपुव्वी । नि० चू० द्वि० ५३ अ । वृषभनासिकान्यस्तरज्जूसंस्थानीया, यया कर्म्मपुद्गलसंहत्या विशिष्टं स्थानं प्राप्यतेऽसौ, यया वोर्ध्वोत्तमाङ्गाधश्चरणादिरूपो नियमतः शरीरविशेषो भवति सा । आव० ८४ । यथाऽऽसन्नम् । भग० २१ । मूलादिपरिपाटी । जीवा० १८७ । आव० ८०३ । क्रमेण यथाऽऽसन्नम् । जं० प्र० ४६१ । शास्त्रीयोपक्रमाद्यभेदः । ठाणा० ४ । आव० ५६ । यदुदयादन्तरालगतौ जीवो याति तदानुपूर्वीनाम । सम० ६७ । उत्त० ६४१ । आनुपूर्वी–यथासन्नम् । जीवा० २० ।

**आणुपुव्विगढिया**-आनुपूर्व्या–परिपाट्या ग्रथिता–गुम्फिता इति आनुपूर्वीग्रथिता । भग० २१४ ।

**आणुपुव्वो**-आनुपूर्वः, क्रमेण नीचैर्नीचैस्तरभावरूपः । जीवा० १९८ ।

**आणू**-उस्सासो । दश० चू० ५४ ।

**आतंतमे** – आत्मतमः–आत्मानं तमयति–खेदयति इति आत्मतमः–आचार्यादिः । आत्मनि तमः–अज्ञानं क्रोधो वा यस्य स आत्मतमाः । ठाणा० २१४ ।

**आत**-( आय )–अप्पा । नि० चू० प्र० ३२ अ ।

**आतवेतावच्चकरे** – आत्मवैयावृत्यकरः, अलसो विसम्भोगिको वा । ठाणा० २४१ । आत्मवैयावृत्त्यकरः–यस्मात् स तपसा पूर्वसंचितकर्ममलं शोधयन्नात्मन एवोपकारे वर्तते ततः सः । व्य० प्र० १४८ आ ।

**आतसरीरसंवेगणी** – आत्मशरीरसंवेगनी – यदेतदस्मदीयं शरीरमेतदशुचि अशुचिकारणजातमशुचिद्वारविनिर्गतमिति न प्रतिबन्धस्थानमित्यादिकथनरूपा । ठाणा० २१२ ।

**आतानवितानं**-( आयाणवियाण ), तन्तुषु वेमादिक्रिया । विशे० ८६९ ।

**आतावणा**-आतापना । प्रश्न० १०७ ।

**आतावते** – आतापयति–आतापनां शीतातपादिसहनरूपां करोति इति आतापकः । ठाणा० २९९ ।

**आतियं**-आचितम्, रचितम् । प्रश्न० ४७ ।

**आतियणो**-अदने–भक्षणे । व्य० प्र० १८० अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आतियाणे**-भुंजणवेलाए ठाति। नि० चू० तृ० ३८ आ।

**आतुरीभूः**। नंदी १५४।

**आतूलुगा**-साधारणबादरवनस्पतिकायविशेषः। प्रज्ञा० ३४।

**आतो**-आयः। उत्त०१४७। आहोस्वित। उत्त० ३२३।

**आतो(उ)ज्जं**-आतोद्यम्, वाद्यम्। प्रश्न० ८। पटहादिः। ठाणा० ६३।

**आत्तपणं**-आदत्तेन-गृहीतेन, आत्मीयेन वा। अनु० २२।

**आत्ततरः**-दृढतरः, अयमनयोरतिशयेनात्तो-गृहीतो यत्नेनाध्यवसित इत्यर्थः। आचा० २९४।

**आत्तप्रज्ञाहा-**( अत्तपण्णहा ), आत्तां-सिद्धान्तादिश्रवणतो गृहीतामाप्तां वा-इहपरलोकयोः सद्बोधरूपतया हितां प्रज्ञाम्-आत्मनोऽन्येषां वा बुद्धिं कुतर्कव्याकुलीकरणतो हन्ति यः स। उत्त० ४३५।

**आत्मछन्दाः**-आत्मनैव उपधेरानयनाय छन्दोऽभिप्रायो विद्यते येषां ते आत्मछन्दसः। व्य० द्वि० २१ आ।

**आत्मरक्षा**-शिरोरक्षस्थानीयाः। तत्त्वा० ४-४।

**आत्मरक्षी** - विषयाभिलाषविगमान्निर्निदानः सन् आत्मानं रक्षत्यपायेभ्यः - कुगतिगमनादिभ्य इत्येवंशीलः। उत्त० २२५।

**आत्मवादी-**अस्त्यात्मा स्वतो नित्य इति वादी। आव० ८१६।

**आत्मसमीपे**-आत्मोत्सङ्गे। ओघ० ११८।

**आत्मसंवेदनीय**-आत्मना क्रियत इति। आव० ४०५।

**आत्मागम**-अत्तागम, गुरूपदेशमन्तरेणात्मन एव आगमः। अनु० २१९।

**आत्माधिष्ठितयोगी** - अत्ताहिट्ठियजोगी, आत्माधिष्ठितेन-लब्धेन भक्तादिना युज्यत इति, अत्तलद्धिओ। ओघ० १५१।

**आत्मार्थ**-अत्तट्ठे, अर्थ्यमानतया स्वर्गादिः, यद्वा आत्मैवार्थः। उत्त० २८४। विशोधनम्। व्य० प्र० ११५ अ।

**आत्मार्थिकम्**-अत्तट्ठियं, आत्मनोऽर्थः, आत्मार्थस्तस्मिन् भवम्। उत्त० ३६०।

**आदंसग**-आदर्शकः-दर्पणः। उत्त० ६५०।

**आदंसगहत्थिआ**-आदर्शहस्ता। आव० १२२।

**आदंसिआइ**-खाद्यविशेषः। जं० प्र० ११८।

**आदण्ण**-खिन्नः। आव० ९४, ३५५।

**आददति**-विदधति। प्रश्न० १०७।

**आदर्शकगृहं**-भरतकेवलज्ञानस्थानम्। प्रज्ञा० २०।

**आदर्शसमानः**-(अद्दागसमाण), आदर्शसमानो, यो हि साधुभिः प्रज्ञाप्यमानानुत्सर्गापवादादीनागमिकान् भावान् यथावत्प्रतिपद्यते सन्निहितार्थानादर्शकवत् स आदर्शसमानः। ठाणा० २४३।

**आदाण** - आदानम्, आदीयते-स्वीक्रियतेऽष्टप्रकारं कर्म येन तत्, कषायाः, परिग्रहः, सावद्यानुष्ठानं वा। सूत्र० २६४। ( बहिद्धादाणं )-बहिर्द्धा-मैथुनम् आदानं च-परिग्रहः, परिग्राह्यं वा वस्तु धर्मोपकरणाद् बहिः। ठाणा० २०२। मोक्षार्थिनाऽऽदीयते-गृह्यत इति, संयमः। सूत्र० २२९। कारणम्। नि० चू० प्र० ११६ अ। प्रभवः, प्रसूतिः। नि० चू० प्र० ११६ अ। ग्रहणम्। आव० ८२२। आदीयत इति, धनम्। आव० ६४६। नि० चू० प्र० ३१७ अ। आदानः, अंशः। सूर्य० २०९।

**आदाणणिक्खेवणासमिती**-आदाननिक्षेपणासमितिः, जं वत्थपायसंथारगफलगपीढगकारणट्ठा गहनिक्खेवकरणं पडिलेहिय पमज्जिय सा। नि० चू० प्र० १७ अ।

**आदाणनिक्खिवणअणाभोगकिरिया** - आदाननिक्षेपानाभोगक्रिया, रजोहरणेनाप्रमार्ज्य पात्रचीवरादीनामादानं निक्षेपं वा करोति सा। आव० ६१४।

**आदाणभयं**-आदानभयम्, धनस्य चौरादिभ्यो यद्भयम्। आव० ६४६। धनहरणभयं। आव० ४७२। आदानं-धनं-तदर्थं चौरादिभ्यो यद्भयम्। ठाणा० ३८९। द्रव्यमाश्रित्य भयम्। प्रश्न० १४३।

**आदाणभरियंसि**-आद्रहणभृते। उपा० ३४।

**आदाणिज्जं**-आदानीयम्, सूत्रकृताङ्गस्य पञ्चदशाध्ययनम्। सूत्र० २५२।

**आदाणियं**-आदानीयम्, आदीयते-गृह्यते उपादीयत इति, पदमर्थो वा। सूत्र० ९।

**आदाननिक्षेपणासमितिः**-रजोहरणपात्रचीवरादीनां पीठफलकादीनां चावश्यकार्थं निरीक्ष्य प्रमृज्य चादाननिक्षेपौ। तत्त्वा० ९५।

**आदाणीय**-आदानीयः, उपादेयः। सम० ८१। ठाणा० ३६९। परमार्थतो भावादानीयं ज्ञानदर्शनचारित्ररूपं तत्। आचा० १४०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आर्दितियमरण**–यानि हि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतश्च न पुनस्तान्यनुभूय पुनर्मरिष्यत इत्येवं यन्मरणं। भग० ६२४।

**आदि**–आदिः, कारणम्। प्रश्न० ४।

**आदिए**–आददीत, गृह्णीयात्। उत्त० ५१७।

**आदिकरः**–आइगर, आदौ प्राथम्येन श्रुतधर्म्ममाचारादिग्रन्थात्मकं करोति – तदर्थप्रणायकत्वेन प्रणयतीत्येवंशील आदिकरः। सम० ३। प्रथमतया प्रवर्त्तनशीलः। व्य० द्वि० ३८५ अ।

**आदिगरमंडलगं**–आदिकरमण्डलम्। आव० १४६।

**आदिच्चो**–आदित्यः। जीवा० ३२१। सूर्यसंवत्सरः। सूर्य० १२।

**आदिट्ठ**–आदिष्टः, विशेषितः। भग० ४७।

**आदिट्ठा**–गृहीता। नि० चू० प्र० २०७ आ।

**आदित्यमासः**–त्रिंशदहोरात्राणि रात्रिन्दिवस्य चार्द्धं, दक्षिणायनस्योत्तरायणस्य वा षष्ठभागमानः। बृ० प्र० १८६ आ।

**आदित्ययशा**–भरतपुत्रनाम। व्य० द्वि० १२९ आ।

**आदिमा भावा** – आवश्यकादयः सूत्रकृताङ्गं यावद् ये आगमग्रन्थास्तेषु ये पदार्था अभिधेयास्ते। बृ० प्र० १२८ आ।

**आदित्यरथः**–वालिसुग्रीवपिता विद्याधरः। प्रश्न० ८९।

**आदियणं** – गहणं। नि० चू० प्र० १३४ अ। पिबंतस्स। नि० चू० तृ० ६५ आ।

**आदियणआ**–आदानम्, ग्रहणम्। आव० ६१४।

**आदियणा**–आदानम्, परधनस्य ग्रहणं, तृतीयाधर्मद्वारस्य पञ्चदशं नाम। प्रश्न० ४३।

**आदिश्यते**। जीवा० १४०।

**आदीअदिट्ठभावे** – आदौ–आवश्यकादिशास्त्रेषु वर्त्तमाना अदृष्टा भावा येन सः। बृ० प्र० १२६ आ।

**आदेज्ज**–आदेया, दर्शनपथमुपागता सती पुनः पुनराकाङ्क्षणीया। जं० प्र० १११। आदेयः, रम्यः। प्रश्न० ८३।

**आदेज्जनाम**–आदेयनाम, यदुदयवशात् यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति दर्शनसमनन्तरमेव च जनोऽभ्युत्थानादि समाचरति तत्। प्रज्ञा० ४७५।

**आदेयवचनता**–सकलजनग्राह्यवाक्यता। उत्त० ३९।

**आदेशकषाय**–कैतवकृतभ्रुकुटिभंगुराकारः। आव० ३९०।

**आदेशतः**। नंदी ७०।

**आदेशिकं**–श्रमणानुद्दिश्यादेशम्। बृ० प्र० ८३ अ।

**आदेसं**–उद्दिट्ठं। नि० चू० प्र० २३० आ। विशेषं प्रतिनियतव्यक्त्यात्मकम्। उत्त० ६७३।

**आदेसतिगं**–आदेशत्रिकम्, मतत्रिकम्। पिण्ड० १०।

**आदेसदव्वसुद्धी** – आदेशद्रव्यशुद्धिः, द्रव्यशुद्धिभेदः। दश० २११।

**आदेसफलं**–आदेशफलम्। आव० ३४३।

**आदेसा**–पाहुणा। नि० चू० प्र० १११ अ। प्राघूर्णकाः। बृ० प्र० ८५ आ।

**आदेसे** – आदेशः, आदिश्यते यस्मिन्नागते सम्भ्रमेण परिजनस्तदासनदानादिव्यापारे सः, प्राघूर्णकः। सूत्र० ३००।

**आदेसो**–आदेशः, प्रकारः। जीवा० ५३। सुत्ताएसो। नि० चू० प्र० ७१ अ। अनुज्ञा। व्य० द्वि० ३४६ अ। नयान्तरविकल्पः। व्य० द्वि० ३५४ आ।

**आद्यशब्द** – तर्कणादोषादिप्रतिपादनः। नि० चू० प्र० २२५ अ।

**आद्रहणम्**–उच्छलदुष्णजलम्। दश० १७४। पिण्ड० ३५।

**आधरिसितो**–आधर्षितः। आव० ३७१।

**आधत्त**–आधत्तम्, ग्रहणके मुक्तम्। बृ० द्वि० १२० अ।

**आधरिसेहिति**–आधर्षिष्यति। आव० १०४।

**आधाकम्मिए**–आधाय–आश्रित्य साधून् कर्म्म–सचेतनस्याचेतनीकरणलक्षणा अचेतनस्य वा पाकलक्षणा क्रिया यत्र भक्तादौ तदाधाकर्म्म तदेवाधाकर्म्मिकम्। ठाणा० ४६०।

**आधायणं**–जत्थ वा महा संगामे मता। नि० चू० तृ० ७३ अ।

**आधिः**–मनःपीडा। भग० ४।

**आधिदैविकम्**–देवादिसत्कं दुःखम्। उत्त० २६६।

**आधिभौतिकम्**–अन्यभूतसत्कं दुःखम्। उत्त० २६६।

**आधूय** – भ्रमयित्वा, जलेन सदाहत्याहत्य। जं० प्र० २३०।

**आधूयारुहकम्**–हरितभेदः। आचा० ५७।

**आध्यात्मिकम्**–अज्झत्थियं, आत्मसत्कं दुःखम्। उत्त० २६६। आत्मनि क्रियमाणम्। आचा० ४१६।

**आनगारिकम्** – अनगारेषु–भावभिक्षुषु भवमानगारिकमनुष्ठानम्। उत्त० ३३९।

**आनन्द**–श्रुतसामायिकलाभे दृष्टान्तः। आव० ३४७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आनन्दपुरम्**–स्थलपत्तने नगरविशेषः । बृ० प्र० १८१ आ । जितारिराज्ञः राजधानी । बृ० तृ० १०७ आ । नगरविशेषः । व्य० प्र० १४६ अ, ४ आ । व्य० द्वि० २६६ अ ।

**आनन्दविजयः**–आचार्यनामविशेषः । जं० प्र० ५४५ ।

**आनन्दविमलः**–आचार्यनामविशेषः । जं० प्र० ५४३ ।

**आनुगामिकः**–आ–समन्तादनुगच्छतीत्येवंशीलमानुगामिकः, अनुगमः प्रयोजनं यस्य सः । प्रज्ञा० ५३९ । अनुगच्छति साध्याभावे न भवति यो धूमादिहेतुः सोऽनुगामी ततो जातमानुगामिकं, अनुमानं, तद्रूपो व्यवसायः । ठाणा १५१ ।

**आनुपूर्वी**–यथासन्नम् । प्रज्ञा० ५०३ । कूर्परलाङ्गलगोमूत्रिकाकारेण यथाक्रमं द्वित्रिचतुःसमयप्रमाणेन विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाटी । प्रज्ञा० ४७३ । अन्तर्गतौ गत्यन्तरमानुपूर्व्या प्रापणसामर्थ्यं, शरीराङ्गोपाङ्गानां विनिवेशक्रमनियामकं वा कर्म । तत्त्वा० ८-१२ ।

**अनुक्रमः**–अनुपरिपाटी । अनु० ५१ ।

**आपणवीही**–आपणवीथिः, रथ्याविशेषः । जं० प्र० ४१३ । आपणवीथिः । भग० ४७६ ।

**आपन्नपरिहारः**–मासिकं वा द्विमासिकं वा यावत् षण्मासिकं वा प्रायश्चित्तं । व्य० प्र० ४५ आ ।

**आपाकः**-भाण्डपचनस्थानम् । ठाणा० ४१९

**आपागपत्तं** – आपाकप्राप्तम्, ईषत् पाकाभिमुखीभूतम् । प्रज्ञा० ४५९ ।

**आपाण्डु**–आ–ईषच्छुभ्रत्वभाजः, पाण्डुः । उत्त० ६८९ ।

**आपीडः**–शेखरकः । जीवा० २७२ । आमेलकः–शेखरकः । जीवा० २०७, ३६१ ।

**आपुच्छणा** – आप्रच्छनमापृच्छा, विहारभूमिगमनादिप्रयोजनेषु गुरोः कार्या, समाचार्याः षष्ठभेदः । आव० २५९ । आपृच्छना । ओघ० १५१ । भग० ९२० । स्वकार्यप्रवृत्तावापृच्छनम् । बृ० प्र० २२२ अ । विहारभूमिगमनादिषु प्रयोजनेषु गुरोः पृच्छा । ठाणा० ४९९ ।

**आपूपिकः** । नंदी १६५ ।

**आपूरितं** – आपूर्यमाणम्, परिसंस्थिते पवने भूयो जलेन भ्रियमाणम् । जीवा० ३०८ ।

**आपूरियं** – आपूरितम्, व्याप्तं, भृतं, वासितम् । विशे० १५० ।

**आप्त**–अत्त, ज्ञानदर्शनचारित्राणि येनाप्तानि स, रागद्वेषप्रहीणः, इष्टाः शोध्यै शैधि विषये ये आप्ताः । व्य० द्वि० ३८९ आ ।

**आप्तप्रज्ञाहा** – सिद्धान्तादिश्रवणतो गृहीतामाप्तां वा इहपरलोकयोः सद्बोधरूपतया हितां–प्रज्ञाम्–आत्मनोऽन्येषां वा बुद्धिं कुतर्कव्याकुलीकरणतो हन्ति यः सः । उत्त० ४३५ ।

**आप्नोति**–आत्मवशतां नयति । प्रज्ञा० ३६२ ।

**आप्रच्छना**–भदन्त ! करोमीदमित्येवं गुरोः प्रच्छनमाप्रच्छना । अनु० १०३ । सम० १५८ ।

**आप्फोडिऊण**–आस्फोट्य । आव० १६८ ।

**आबद्धसेओ**–आबद्धस्वेदः । आव० ५१५ ।

**आबद्धो**–आबद्धः, आरब्धः । आव० ५१५ ।

**आबाहा**–आबाधा, ईषद्बाधा । भग० २१८ । जं० प्र० १२४ । जन्मजरामरणक्षुत्पिपासादिका आबाधा । ठाणा० ४८८ ।

**आबाहाए**–अन्तरे कृत्वेति शेषः । सम० १६ ।

**आभंकरं** – सनत्कुमारकल्पे त्रिसागरस्थितिकं विमानं । सम० ८ ।

**आभंकरपभंकरं**–आभंकरवत् । सम० ८ ।

**आभंकरे**–आभङ्करः, सप्ततितमग्रहनाम । ठाणा० ७९ । अष्टषष्टितमग्रहनाम । जं० प्र० ५३५ ।

**आभट्टो**–आभाषितः, संलप्तः । आव० २४१ ।

**आभरण**–आभरणानि, मुकुटादीनि । जं० प्र० १४५ ।

**आभरणचङ्गेरी**–देवछन्दके पूजोपकरणम् । जीवा० २३४ ।

**आभरणपिया** । नि० चू० तृ० ९ अ ।

**आभरणवासा** – आभरणवर्षा, आभूषणवर्षणम् । भग० १९९ ।

**आभरणविचित्ताणि**–आभरणविचित्राणि, गिरिविडकादिविभूषितानि । आचा० ३९४ । नि० चू० प्र० २५५ अ ।

**आभरणविधी**–हारऽद्धहारादिया आभरणविधी । नि० चू० प्र० २७६ आ । उपभोगविधिविशेषः । उपा० ३ ।

**आभरणवुट्ठी**–आभरणवृष्टिः । भग० १९९ ।

**आभरणाणि** – आभरणानि, अङ्गपरिधेयानि । जं० प्र० २२१ । आभरणप्रधानानि । आचा० ३९४ । नि० चू० प्र० २५५ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आभवंतितो**-आभवन्तिकः-व्यवहारः। व्य० द्वि० ३८१ आ।

**आभवति**-स्वं भवति। आव० ८२१।

**आभव्वं**-आभाव्यं, शैक्षः शैक्षिका वा। बृ० द्वि० ७० आ।

**आभा**-आभा, आकारः। प्रज्ञा० ८०। छायावर्णः। सम० १४०। प्रतिभासः। जीवा० ३११। वर्णस्वरूपम्। जीवा० १०३।

**आभागी**-भोक्ता। आव० ८१५।

**आभासइ**-आभासयति, समन्ततः सर्वासु दिक्षु अवभासयति। जीवा० ३१२।

**आभासिआ**-म्लेच्छविशेषः। प्रज्ञा० ५५।

**आभासिता**-लवणान्तरद्वीपनाम। ठाणा० २२५।

**आभासितो**-आभाषिकः, अन्तरद्वीपविशेषः। जीवा० १४४।

**आभासियं**-अभाषिकम्-विवक्षितभाषामजानानः। आव० ६१४।

**आभासिय**-आभाषिकः, म्लेच्छविशेषः। प्रश्न० १४।

**आभासियदीवे**-अन्तरद्वीपनाम। ठाणा० २२५।

**आभिओग**-आ - समन्तादाभिमुख्येन युज्यन्ते-प्रेष्यकर्मणि व्यापार्यन्ते इति आभियोग्याः-शक्रलोकपालप्रेष्यकर्मकारिणो व्यन्तरविशेषाः। जं० प्र० ७५। आभियोग्यम्-कर्मकरभावः। दश० २४८। अभियोग्यभावना-कुत्सितभावना। उत्त० ७०७। अभियोगभावनाजनितः। ठाणा० २७४।

**आभिओगसेढीओ** - आभियोग्याः-शक्रलोकपालप्रेष्यकर्मकारिणो व्यन्तरविशेषास्तेषामावासभूते श्रेण्यौ। जं० प्र० ७५।

**आभिओगिए**-आभियोगिकः अभियोगे-प्रेष्यकर्म्मणि व्यापार्यमाणत्वे नियुक्ताः। जीवा० २४३।

**आभिओगिय**-आभियोगिकः, वशीकरणाय मन्त्राभिसंस्कृतम्। आव० ६४२।

**आभिओग्ग**-आभियोग्यम्, वशीकरणादि द्रव्यतो द्रव्यसंयोगजनितं, भावतो विद्यामन्त्रादिजनितम्, बलात्कारो वा। प्रश्न० ३८। आभियोगः-कार्मणम्। बृ० तृ० १२२ आ।

**आभिग्गहिओ**-आभिग्रहिकः, अभिग्रहेण निर्वृत्तः, कायोत्सर्गः। आव० ७८३।

**आभिचारुका**-विद्याविशेषः। बृ० तृ० २०३ आ।

**आभिट्टं**-आपतितम्। पउ० ४-४२।

**आभिडणं**-आवडणम्। ओघ० २०४।

**आभिणिबोहिय**-आभिनिबोधिकम्, अभिमुखो-योग्यदेशावस्थितवस्त्वपेक्षया नियतः-स्वस्वविषयपरिच्छेदकतयाऽवबोधः-अवगमोऽभिनिबोधः, स एवाभिनिबोधिकम्। उत्त० ५५७। विशे० २२६। अर्थाभिमुखो नियतः-प्रतिनियतस्वरूपो बोधो-बोधविशेषः, अभिबुध्यतेऽस्माद् अस्मिन् वेति। प्रज्ञा० ५२६। आभिनिबोधिकम्-मतिज्ञानम्। आव० १८। आभिमुख्येन निश्चितत्वेनावबुध्यते-संवेदयते आत्मा तदिति, आभिनिबोधः, अवग्रहादिज्ञानं, अथवा आत्मा तेन प्रस्तुतज्ञानेन तदावरणक्षयोपशमेन वा करणभूतेन घटादि वस्त्वभिनिबुध्यते, तस्माद् वा प्रकृतज्ञानात् क्षयोपशमाद्वाऽभिनिबुध्यते, तस्मिन् वाऽधिकृतज्ञाने, क्षयोपशमे वा सत्यभिनिबुध्यतेऽवगच्छतीत्यभिनिबोधो ज्ञानम्, क्षयोपशमो वा, सो वा 'अभिणिबुज्झए'त्ति, अथवाऽभिनिबुध्यते वस्त्वभिगच्छतीत्यभिनिबोधः, स एवाभिनिबोधिकम्। विशे० ५३। अभीत्याभिमुख्ये नीति नैयत्ये, ततश्चाभिमुखो-वस्तुयोग्यदेशावस्थानापेक्षी नियत-इन्द्रियाण्याश्रित्य स्वस्वविषयापेक्षी बोधः, अभिनिबुध्यते आत्मना सः। अभिनिबुध्यते वस्त्वसौ इत्यभिनिबोधः स एवाभिनिबोधिकम्। अनु० २।

**आभिणिबोहियनाण**-अर्थाभिमुखोऽविपर्ययरूपत्वात् नियतोऽसंशयरूपत्वाद्बोधः-संवेदनमभिनिबोधः स एव स्वार्थिके कप्रत्ययोपादानादाभिनिबोधिकं ज्ञातिर्ज्ञायते वाऽनेनेति ज्ञानम् आभिनिबोधिकं च तज्ज्ञानं चेति आभिनिबोधिकज्ञानम्, इन्द्रियानिन्द्रियनिमित्तो बोध इति। भग० ३४३। इन्द्रियपञ्चकमनोनिमित्तो बोधः। अनु० २। अर्थाभिमुखो नियतो बोधः, अभिनिबोधे भवं तेन वा निर्वृत्तं तन्मयं तत्प्रयोजनं वा, अथवा अभिनिबुध्यते तत्, अथवा अभिनिबुध्यते ऽनेनास्माद्वा अस्मिन् वा तत् तदावरणकर्मक्षयोपशम इति भावार्थः। आव० ७। अभिनिबोधिकम्, आत्मैव वाऽभिनिबोधोपयोगपरिणामानन्यत्वाद् अभिनिबुध्यत इति वा। आव० ७।

**आभियोगिक** - अभियोगभावनाभावितत्वेनाभियोगिकदेवेषूत्पन्ना अभियोगवर्तिनः। भग० १९०।

**आभियोगिय** - आभियोगिकः, अभियोजनं-विद्यामन्त्रादिभिः परेषां वशीकरणादि येषां ते। प्रज्ञा० ४०६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आभियोगी**-अभिओगा- किङ्करस्थानीयदेवविशेषास्तेषामियमाभियोगी। बृ० प्र० २१२ आ। आभियोग्याः-आभिमुख्येन युज्यन्ते-प्रेष्यकर्म्मणि व्यापार्यन्त इत्याभियोग्याः, किङ्करस्थानीयदेवविशेषाः। बृ० प्र० २१२ आ।

**आभिसेक्कं**-आभिषेक्यम्, अभिषेकयोग्यं, राजपरिधेयम्। जं० प्र० २१६।

**आभीरविसओ**-आभीरविषयः, देशनाम। आव० ४१२। नि० चू० द्वि० १०२ आ।

**आभोइत्ता**-आभोगयित्वा, ज्ञात्वा। दश० १७९।

**आभोईतो**-आभोगितः। उत्त० १३३।

**आभोएउं**-आभोगयित्वा, उपयोगपूर्वकेनावधिना विज्ञाय। आव० १२८।

**आभोएति**-आभोगयति। आव० १२४।

**आभोग** - आभोगः, जानता योऽतिचारः कृतः। आव० ५६४। अभिसन्धिः। भग० २०। आलोचनमभिसन्धिः। प्रज्ञा० ५००। उपकरणम्। ओघ० ३३। उपयोगः। बृ० द्वि० २११ आ। ठाणा० ५०५। आभोगनमाभोगः, उपयोगविशेषः। आव० ६१९, ६२६। विस्तारः। विपा० ३९।

**आभोगण**-आभोगनम्, अर्थावग्रहसमनन्तरमेव सद्भूतार्थविषयाभिमुखमालोचनम्। १७६।

**आभोगणिव्वत्तिय**-यदा परस्यापराधं सम्यगवबुद्धय कोपकारणं च व्यवहारतः पुष्टमवलम्ब्य नान्यथाऽस्य शिक्षोपजायते इति आभोग्य कोपं विधत्ते तदा स कोप आभोगनिर्वर्त्तितः। प्रज्ञा० २९१। आभोगेन निर्वर्त्तितः-उत्पादित आभोगनिर्वर्त्तित आहारयामीतीच्छापूर्वं निर्मापितः। प्रज्ञा० ५००।

**आभोगबउस**-आभोगबकुशः, य आभोगेन जानन् करोति सः, बकुशस्य प्रथमो भेदः। उत्त० २५६। आभोगः-साधूनामकृत्यमेतच्छरीरोपकरणविभूषणमित्येवं ज्ञानं तत्प्रधानो बकुश आभोगबकुशः। भग० ८९०। शरीरोपकरणभूषयोः सञ्चिन्त्यकारी। ठाणा० ३३७।

**आभोगिणी**-यं परिजपिता सती मानसं परिच्छेदमुत्पादयति सा। बृ० तृ० ३३ अ। जा विज्जा जविता माणसं परिच्छेदमुप्पादयति सा। नि० चू० प्र० १७७ अ।

**आमं**-आमम्। दश० १७६। अपरिणतम्। पिण्ड० ६५। अविशोधिकोटिः। बृ० प्र० २०१ अ, ५१ अ। आमं णाम जं अपोलियं अग्गिणा ण पक्कंति, अण्णेण वा केणइ पगारेण न पक्कं-णिज्जीवं। नि० चू० द्वि० १५७ अ। असत्थपरिणयं। दश० चू० ५१। अनुमतार्थद्योतकमव्ययम्। बृ० द्वि० १६६ अ। सचित्तं। दश० चू० ८६। अपक्करसम्। प्रश्न० ६०। अनुमतौ सम्मतमेतदस्माकं सर्वमितिभावः। व्य० प्र० ७१ अ। अपक्कः। व्य० द्वि० १०६ आ। जओ तेहिं उग्गमादिदोसेहिं घेप्पमाणेहिं चारित्तं अविपक्कं अपज्जत्तं आमं भवति तेण ते आमं भण्णति, शब्दमात्रोच्चारणम् सरढीभूतं जो वरिससतायुपुरिसो वरिससतं अंतरे मरंतो आमो भण्णति। नि० चू० द्वि० १२६ अ। अपक्वम्। आव० १३०। स्वीकारेऽव्ययम्। आव० ६४। आव० १९४। आव० ४०८। अशस्त्रोपहतम्। आचा० ३४८। दश० २२९। अजीर्णम्। दश० २७०। आमाम्-असिद्धां, सचेतनाम्, अपरिणतं, अपक्काम्। दश० १८५। अपरिशुद्धम्। आचा० १३१।

**आमंडे**-आमलकम्, परिणामिकयां सप्तदशमोदाहरणम्। नंदी १६५। आम्लकम्-आमलकम्। आव० ४३६।

**आमंतणी**-आमन्त्रणी, असत्यामृषाभाषायाः प्रथमो भेदः। दश० २१०। हे देवदत्त! इत्यादिरूपा भाषा। प्रज्ञा० २५६। हे देवदत्त! इत्यादिका, असत्यामृषाभाषा। भग० ५००।

**आमंतयामो**-आमन्त्र्यावहे, पृच्छावः। उत्त० ३९८।

**आमंतिओ**-आमन्त्रितः, सम्भाषितः, पृष्टो वा। उत्त० ३९२।

**आमंतेयव्वो**-आपुच्छियव्वो। नि० चू० तृ० ९७ आ।

**आमगं**-अपक्वम्। भग० ६८४।

**आमगंधि**-आमगन्धयः, विश्राः। सम० १३६।

**आमज्जति** - अक्खिपत्तरोमे संठवेति। नि० चू० प्र० १९० अ। हत्थेण आमज्जति। नि० चू० प्र० १८७ आ।

**आमज्जमाणे**-आमर्जयन्, सकृद्धस्तादिना शोधयन्। आचा० ३४३।

**आमज्जिज्ज**-सकृदामृज्यात्। आचा० ३३७।

**आमट्ठ**-विपर्यासीकृतम्, परामट्ठं। ओघ० १९२। आमृष्टम्, तेजःप्रकर्षारोपणाय मनःशिलादिना समन्तात्परामृष्टम्। उत्त० ५२७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आमडागं**-आमपत्रम्, अरणिकतन्दुलीयकादि तच्चार्द्रपक्कमपक्कं वा। आचा० ३४८।

**आममहुरे**-आममधुरम्, ईषन्मधुरम्। ठाणा० १९६।

**आमरणदोसो**-आमरणदोषः, महदापद्गतोऽपि स्वतो महदापद्गतेऽपि च परे आमरणादसञ्जातानुतापः, अपि त्वसमाप्तानुतापानुशयपर इति। आव० ५९०।

**आमरणंतदोसे**-आमरणान्तदोषः-आमरणान्तमसंजातानुतापस्य हिंसादिषु प्रवृत्तिः सैव दोषः। ठाणा० १९०।

**आमर्षौषधिः**-ऋद्धिविशेषः। प्रज्ञा० ४२४।

**आमलए**-आमलकम्। आव० ८३१। आमरकः, सामस्त्येन मारिः। ठाणा० ५०८। फलविशेषः। पिण्ड० २२। दश० १००।

**आमलकप्प**-आमलकल्पा, नगरीविशेषः। आव० ३१४, ३१५, ७०७। उत्त० १५९। विशे० ९५०।

**आमलग**-आमलक, बहुबीजो वृक्षविशेषः। प्रज्ञा० ३२। भग० ८०३।

**आमलगा**-आमलकानि। अनु० १९२।

**आमलपाणगं**-फलविशेषप्रक्षालनजलं। आचा० ३४७।

**आमाघाओ**-अमाघातः, (अमारीपटहः)। आव० ४०१।

**आमिस** - आमिषः-मांसः। उत्त० ६३४। आमिषाद्-गृद्धिहेतोरभिलषितविषयादेः। उत्त० ४०९।

**आमिसभोगगिद्ध** - आमिषभोगगृद्धः, आमिषस्य-मांसादेर्भोगः-अभ्यवहारस्तत्र गृद्धः। उत्त० ६३४।

**आमिसावत्ते**-मांसाद्यर्थं परिभ्रमणम्। ठाणा० २८८।

**आमुसंत** - आमृशन्, स्पृशन्। दश० १३७। आचा० ११। आमृशन्, भगवत्पादारविन्दं भक्तितः करतलयुगादिना स्पृशन्। ठाणा० ९। उत्त० ८०।

**आमुसिज्जा** - आमर्षणम्, सकृदीषद्वा स्पर्शनम्। दश० १५३।

**आमे**-आमः, अविशोधिकोट्याख्यदोषः। सूत्र० १४५।

**आमेड**-आमेलः, आपीडः, शेखरकः। जीवा० १७२।

**आमेडणा**-आम्रेडना, विपर्यस्तीकरणम्। प्रश्न० ५६।

**आमेल**-आपीडः, शेखरकः। प्रज्ञा० ९६। भग० ४५९। पुष्पशेखरकः। औप० ५१।

**आमेलओ**-आमेलकः, आपीडः, शेखरकः। जीवा० ३६१। आमोडकः-पुष्पोन्मिश्रो वालवन्धविशेषः। उत्त० १४३।

**आमेलग**-आमेलकः, आपीडकः, शेखरः। जीवा० २७५। आपीडः, शेखरकः। जं० प्र० ५२। जीवा० २०७।

**आमेलय**-आमेलकः, चूडा। औप० ६३।

**आमेलिय**-आपीडिका, चूडा। भग० ३१८।

**आमो**-असत्थोवहतो। नि० चू० प्र० १९६ अ।

**आमोअ** - आमोदः, मानसे उत्सवः। आव० ७२१। आमोकः-कचवरपुञ्जः। आचा० ४११।

**आमोक्ख**-आमोक्षः, आमुच्यन्तेऽस्मिन्नित्यामोक्षणं वाऽऽमोक्षः। आचा० ६।

**आमोडणं**-हत्थेहि आमोडणं। नि० चू० प्र० २४५ अ।

**आमोडेति**-सीमन्तयति। नि० चू० द्वि० ३१ अ।

**आमोद**-गन्धः। उत्त० ३६९।

**आमोयगो**-आमोदकः। जीवा० २६८।

**आमोसगा**-आमोषकाः, चौराः। ठाणा० ३१५।

**आमोसलि**-आमर्शवर्त्तिर्यगूर्ध्वमधो वा कुड्यादिपरामर्शवद्यथा न भवति। उत्त० ५४१।

**आमोसहि** - आमर्षौषधिः, तत्रामर्षणमामर्षः-संस्पर्शनमित्यर्थः, स एवौषधिर्यस्यासावामर्षौषधिः, करादिसंस्पर्शमात्रादेव व्याध्यपनयनसमर्थो लब्धिलब्धिमतोरभेदोपचारात्साधुरेवामर्षौषधिः। विशे० ३७९। आचा० १७८। आमर्षौषधिः। ठाणा० ३३२। आमर्शणमामर्शः-संस्पर्शनमित्यर्थः, स एवौषधिः। आव० ४७। आमर्षणमामर्षः-हस्तादिसंस्पर्शः। औप० २८।

**आमोसे**-आमर्षणम् आमर्षः-अप्रमृज्य करेण स्पर्शनम्। आव० ५७४। आमोषाः-आ-समन्तान्मुष्णन्ति-स्तैन्यं कुर्वन्तीति। उत्त० ३१२।

**आम्नाय**-गुणनं, घोषविशुद्धं परिवर्त्तनं रूपादानं। तत्त्वा० ९-२५।

**आम्रसालवनम्** - आमलकल्पानगर्यां वनम्। विशे० ९५०।

**आम्लखलिकायाम्**। विशे० ६०६।

**आम्लम्**-चतुर्थरसम्। आव० ८५४। अंबिला। उत्त० ६७७।

**आयं**-तोसलिविसए सीयतलाए आयाणं खुरेसु सेवालतरिया लग्गंति, तत्थ वत्था कीरंति। नि० चू० प्र० २५४ आ। कर्माश्रवलक्षणम्। सूत्र० १८९। इष्टफलम्। भग० ४।



Jain Education International 2010_05    For Private & Personal Use Only    www.jainelibrary.org

**आयंकं**-आतङ्कः, आशुघाती रोगः। आव० ७५९। सद्योघाती रोगः। दश० २७३। कृच्छ्रजीवनं दुःखं। आचा० ७५। आशुघाती शूलादिः। जं० प्र० १२५। भग० ४७१। सद्योघातिव्याधिः। भग० १२२। नरकादिदुःखम्। आचा० १६०। कृच्छ्रजीवितकारी, सद्योघातीत्यर्थः शूलादि। ठाणा० ११९। शूलविशूचिकादिः सद्योघाती। ठाणा० १५०। व्याधिः। भग० ६९०। आङिति सर्वात्मप्रदेशाभिव्याप्त्या तंकयन्ति – कृच्छ्रजीवितमात्मानं कुर्वन्ति इत्यातंकाः-सद्योघातिनो रोगविशेषाः। उत्त० ३३८। आतङ्कः, सद्योघातिनः। औप० ९६। आव० ५८५। ज्वरादि। पिण्ड० १७७। आचा० २९७। कृच्छ्रजीवितकारी ज्वरादिः। भग० ७०२। आतङ्कः, आशुकारी व्याधिविशेषः। दश० चू० १४। रोगः। उत्त० ४८६। ज्वरादि। आव० ८४८। ओघ० १९०। कष्टजीवितकारी। विपा० ४०। आशुजीवितापहारी शूलादिकः। सूत्र० २९२। आचा० २०५, ३३०, ३६२।

**आयंकसंपओग** – आतङ्कसम्प्रयोगः, आतङ्कः-रोगः तस्य योगः। औप० ४३।

**आयंगुल**-पुरुषात्मसम्बन्धि आत्माङ्गुलम्। अनु० १५६। अङ्गुलस्य प्रथमभेदः। प्रज्ञा० २९९।

**आयंचणं** – गोमुत्तं। नि० चू० तृ० १२७ अ। व्य० प्र० १०४ आ।

**आयंचामि**-लिंपामि, आसिञ्चामि। उपा० ३२।

**आयंतकरे** – आत्मनोऽन्तम्– अवसानं भवस्य करोतीति आत्मान्तकरः, धर्म्मदेशनानासेवकः प्रत्येकबुद्धादिः। ठाणा० २१३।

**आयंति**-आगच्छन्ति, उत्पद्यन्ते। आव० १७९।

**आयंतियमरणे**-यानि नारकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतश्च न पुनस्तान्यनुभूय मरिष्यतीति। सम० ३३।

**आयंती** आयान्ती। आव० ३०७।

**आयंते**-आचान्तः, नवानामपि श्रोतसां शुद्धोदकप्रक्षालनेन गृहीताचमनः।' जीवा० २४३। कृतपानः। भग० १६४।

**आयंदमे** – आत्मदमः, आत्मानं दमयति–शमवन्तं करोति शिक्षयति वेति। ठाणा० २१४।

**आयंबिलं**-आयाम्लम्, ओदनकुल्माषादि। औप० ४०। आचाम्लम्। आव० ८५२। शुद्धौदनादि। अनुत्त० ३। सकुरा। आव० ८५५। पानकम्। ओघ० १३३।

**आयंबिलपाउग्गं**-आचाम्लप्रायोग्यम्, (कूरविहाणाणि)। आव० ८५५।

**आयंबिलवड्ढमाणं**-आचाम्लवर्द्धमानम्, तपोविशेषः। अन्त० ३२।

**आयंबिलिए**-आचाम्लिकः। ठाणा० २९८।

**आयंभरे** – आत्मानं बिभर्त्ति-पुष्णातीत्यात्मम्भरिः। ठाणा० २४८।

**आयंस**-आदर्शः, वृषभादिग्रीवाभरणम्। अनु० ४७। दर्पणः। जं० प्र० ३९२। आदर्शः। जं० प्र० ५१०।

**आयंसघरं**-आदर्शगृहम्। आव० १७०।

**आयंसघरगं** – आदर्शगृहकम्, आदर्शमयमिव गृहकम्। जीवा० २००। जं० प्र० ४५।

**आयंसमुहदीवे**-आदर्शमुखद्वीपः, अन्तरद्वीपनाम। ठाणा० २२६।

**आयंसमुहा** – आदर्शमुखनामा नवमोऽन्तरद्वीपः। प्रज्ञा० ५०। जीवा० १४४।

**आयंसलिवी**-ब्राह्मीलिपिपञ्चदशभेदः। प्रज्ञा० ५६।

**आय**-आयः, श्रुतनाम। दश० १६। लाभः। अनु० १५४। आत्मा-शरीरम्। उत्त० ४१५। जीवश्चित्तं वा। उत्त० ५०४। अतति-सततं गच्छति तानि तान्यध्यवसायस्थानान्तराणीति आत्मा–मनः। उत्त० ३१४।

**आयइ**-आयतिः-अनागतं, उत्तरकालम्। आव० ५०९।

**आयकाय**-अनंतकायविशेषः। भग० ८०४।

**आयक्खाहि**-आख्याहि, कथय, निवेदय। भग० ११२।

**आयगय**-आत्मनि गतः आत्मगतः, आत्मज्ञ इति। सूत्र० १२४।

**आयगवेसए**-आत्मगवेषकः, आत्मानं–कर्मविगमाच्छुद्धस्वरूपं गवेषयति–अन्वेषयते यः सः। आयगवेषकः-आयः–सम्यग्दर्शनादिलाभस्तं गवेषयतीति। आयतगवेषकः-सूत्रत्वादायतो वा-मोक्षस्तं गवेषयतीति वा। उत्त० ४१५।

**आयगुत्ते** – आत्मा-शरीरं तेन गुप्तः आत्मगुप्तः-न यतस्ततः करणचरणादिविक्षेपकृत्, गुप्तो-रक्षितोऽसंयमस्थानेभ्य आत्मा येन सः। उत्त० ४१५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आयजोगे**-आत्मयोगी, आत्मनो योगः-कुशलमनःप्रवृत्तिरूप आत्मयोगः, स यस्यास्ति स तथा, धर्मध्यानावस्थितः। सूत्र० ३४२।

**आयट्ठं**-आत्मनोऽर्थ आत्मार्थः, स च ज्ञानदर्शनचारित्रात्मकः, आत्मने हितं-प्रयोजनमात्मार्थं, चारित्रानुष्ठानमेव, आयतः-अपर्यवसानान्मोक्षः स एवार्थः। आयत्तः-मोक्षः, अर्थः-प्रयोजनं यस्य। आचा० ११०। आत्महितं। आचा० १०९। ज्ञानादिरूपं स्वकार्यम्। बृ० द्वि० ७१ अ।

**आयट्ठी**-आत्मार्थी, यो ह्यन्यमपायेभ्यो रक्षति सः, आत्मवान्। सूत्र० ३४२।

**आयणाणं**-आत्मज्ञानम्, वादादिव्यापारकाले किमसुं प्रतिवादिनं जेतुं मम शक्तिरस्ति न वा? इत्यालोचनम्। उत्त० ३९।

**आयणीली**-वल्लीविशेषः। प्रज्ञा० ३२।

**आयण्णं**-आकीर्णम्, स्थानविशेषः। ओघ० १५४।

**आयतंगुली**-एगापएसिणी। नि० चू० प्र० २०८ अ।

**आयतगुत्ते**-आत्मगुप्तः-सततोपयुक्तः। आचा० २७२।

**आयतजोग**-आयतयोगः-सुप्रणिहितं मनोवाक्कायात्मकम्। आचा० ३१४। ज्ञानचतुष्टयेन सम्यग्योगप्रणिधानं। आचा० ३१४।

**आयतणं**-आयतनम्, गुणानामाश्रयः, अहिंसायाः सप्तचत्वारिंशत्तमं नाम। प्रश्न० ९९। आविष्करणं कथनं, निर्णयनं वा। सूत्र० १८१। स्थानम्। ओघ० २२२। नि० चू० प्र० १९२ आ। देवकुलम्। नि० चू० द्वि० ६९ आ। दोषाणां स्थानं। आचा० ३२९। ज्ञानादित्रयम्। आचा० २०७।

**आयतणा**-आयतनानि-बन्धहेतवः। ठाणा० ४५१।

**आयतणाइं**-आयतनादीनि, दोषरहितस्थानानि, वसतिगतानि, संस्तारकगतानि च। आचा० ३७२। देवकुलपार्श्वापवरकाः। आचा० ३६६। कर्मोपादानानि। आचा० ४०७। उपभोगास्पदभूतानि। आचा० १२७। कर्मोपादानस्थानानि। आचा० ३५६। दोषस्थानानि। आचा० ३८६।

**आयतरो**-तवबलिओ। नि० चू० तृ० १२३ अ।

**आयतसंठाण**-आयतसंस्थानम्। प्रज्ञा० ११।

**आयता**-दीर्घा। जीवा० १६४।

**आयती**-सन्ततिः। बृ० द्वि० २१३ अ।

**आयतीहितं**-आगामिकालहितं, आत्मना हितं वा। दश० चू० १५७।

**आयते**-आयतः, संस्थानपञ्चमभेदः। प्रज्ञा० २४२। भग० ८५८।

**आयतो**-आयतः, मोक्षः। सूत्र० १७३। मोक्खो। दश० चू० ८८।

**आयत्तं**-आयत्तम्, सम्मिश्रम्। पिण्ड० ८१। आधिनीकृतम्। आव० ३६६।

**आयत्ताए**-आत्मत्वाय-आत्मीयकर्म्मानुभवाय। आचा० २३३।

**आयपइट्ठिते**-आत्मप्रतिष्ठितः, आत्मना वा परत्राक्रोशादिना प्रतिष्ठितो-जनित आत्मप्रतिष्ठितः। ठाणा० ९२। आत्मापराधेनैहिकामुष्मिकापायदर्शनादात्मविषयः। ठाणा० १९३।

**आयपतिट्ठिए**-आत्मप्रतिष्ठितः, आत्मन्येव प्रतिष्ठितः। प्रज्ञा० २९०।

**आयपवायं**-आत्मप्रवादं, सप्तमपूर्वम्। ठाणा० १९९।

**आयप्पवाय**-आत्मप्रवादः, यत्रात्मनः संसारिमुक्तायनेकभेदभिन्नस्य प्रवदनम्। दर्श० १२। आत्मानं-जीवमनेकधा नयमतभेदेन यत्प्रवदति तत्। नंदी २४१।

**आयप्पवायपुव्वं**-आत्मप्रवादनाम सप्तमपूर्वम्। सम० २६। विशे० ९४६।

**आयभाव**-आत्मभावः, स्वस्वरूपः। अनु० २२६। जीवसम्बन्धः। अनु० २२०। उत्थानशयनगमनभोजनादिरूप आत्मपरिणामविशेषः। भग० १४९। अनादिभवाभ्यस्तो मिथ्यात्वादिकः, विषयगृध्नुता वा। सूत्र० २४०।

**आयभाववंकणया**-आत्मभाववंकनता, आत्मभावस्याप्रशस्तस्य वङ्कनता-वक्रीकरणं प्रशस्तत्वोपदर्शनता। ठाणा० ४२।

**आयभाववंचणा**-आत्मभाववञ्चनता, मायाप्रत्ययिकीक्रियायाः प्रथमो भेदः। आव० ६१२।

**आयभाववत्तव्वया**-आत्मभाववक्तव्यता, अहंमानिता। भग० १३९।

**आयमणं**-आचमनम्, निर्लेपनादि। ओघ० १३७, १९०, १६२। आशातनायाः दशमभेदः। आव० ७२५। गण्डू-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

षादिकरणम् । उत्त० ३७० । निर्लेपनम् । बृ० तृ० २०४ आ । णिल्लेवणं । नि० चू० प्र० २२० आ । पुरीषोत्सर्गानन्तरं शौचकरणम् । पिण्ड० ११ । आचमनम् । ठाणा० ३३९ ।

**आयमाणे**-आददानः, प्रवर्त्तमानः । सूर्य० १२ ।

**आयमेज्जा**-निर्लेपनं चापाने एवमेव कुर्यात् । ओघ० १२५ ।

**आयय**-आयतम्, प्रसारितम्, दीर्घम् । भग० २३० । आयतः – मोक्षः, आयतम्-अत्यन्तम् । दश० २५८ । आकृष्टं, दीर्घश्च । भग० ९३, ३३३ । मोक्षः । व्य० द्वि० १९७ अ । आत्मा । आचा० १२२ । मोक्षः संयमो वा । उत्त० ५८७ । संयतः । आचा० ३१४ । प्रयत्नवान् । भग० ९३ । दीर्घः सर्वकालभवनात् मोक्षः । सूत्र० ७५ ।

**आययकण्णायत्तं**-आयतकर्णायतम्, प्रयत्नवत्कर्णं यावदाकृष्टम् । भग० ९३ ।

**आययचक्खू** – आयतचक्षुः– दीर्घमैहिकामुष्मिकापायदर्शि चक्षुः–ज्ञानं यस्य स । आचा० १३६ ।

**आययट्ठिए**-आयतार्थिकः, मोक्षार्थी । दश० २५६ ।

**आययट्ठिया**-आयतार्थिकाः, आयतो–मोक्षः संयमो वा स एवार्थः प्रयोजनं विद्यते येषामिति । उत्त० ५८७ । आयतः–मोक्षस्तत्र स्थिता आयतस्थिता उद्यतविहारिणः संविग्ना इत्यर्थः । व्य० द्वि० १९७ अ ।

**आययट्ठी**-आयतार्थी, मोक्षार्थी । दश० १८७ ।

**आययणं**-आयतनम् । आव० २११ । आदानम् । अन्त० २४ । गमनम्, गृहम् । जीवा० २७९ । स्थानम् । जं० प्र० ७७ । दश० १९८ । आङ्-अभिविधौ समस्तपापारम्भेभ्यः आत्मा आयत्यते–आनियम्यते यस्मिन् कुशलानुष्ठाने वा यत्नवान् क्रियत इत्यायतनं–ज्ञानादित्रयम् । आचा० २०६ । उत्पत्तिस्थानम् । उत्त० ६२३ ।

**आययतरे**-आयततरः, आयमनयोरतिशयेनायत आयततरः । आचा० २९४ । यत्नेनाध्यवसितः । आचा० २९३ ।

**आयरंति**-आचरन्ति, आसेवन्ते । दश० १९८ ।

**आयरंतो**-आचरन्, व्यवहरन्, कुर्वन् वा । उत्त० ६४ ।

**आयरक्खा**-आत्मरक्षा, स्वाम्यात्मरक्षा । भग० १९४ । अंगरक्षा राज्ञाम् । ठाणा० ११७ ।

**आयरक्खिए**-आत्मरक्षितः, आत्मा रक्षितो दुर्गतिहेतोरपध्यानादेरनेनेति । उत्त० ९९ । आयरक्षितः–आयो वा–ज्ञानादिलाभो रक्षितोऽनेनेति । उत्त० ९९ । आत्मा रक्षितो दुर्गतिपतनात् त्रातोऽनेनेति, रक्षिता आयाः–सम्यग्दर्शनादिलाभा येनेति । उत्त० ४१४ ।

**आयरणं**-आचरणम्, अनुष्ठानम् । उत्त० ५३३ ।

**आयरणया**-आदरणं, अभ्युपगमं आचरणम् वा । भग० ५७३ ।

**आयरणा**-आचरणा, विधिः, मर्यादा, सीमा च । आव० ६३९ । ततियभङ्गविकप्पो । नि० चू० प्र० १९८ अ । चर्या । बृ० तृ० १२९ आ ।

**आयरिअ**-आचार्यः, शिल्पोपदेशदाता । भग० ३१७ । औप० ६२ । अनुयोगाचार्यः । उत्त० १७ । व्य० प्र० १३७ अ । अनुयोगधरः । आचा० ३५३ । सपरसिद्धंतपरूवगो । नि० चू० प्र० १६ अ । आयरिए–आचार्यः–प्रतिबोधकप्रव्राजकादिः अनुयोगाचार्यो वा । ठाणा० १४३, २४४ ।

**आयरियं**-आचरितम्, आसेवितं । आव० २६३ । आर्य्यः–आराद् यातः पापकर्म्मभ्य इति । भग० ९० । आचरणमाचरितं तत्तत्क्रियाकलापः । उत्त० २६६ । आरायातं सर्वकुयुक्तिभ्य इत्यार्य–तत्त्वं तत् । उत्त० २६६ । आर्यम्–आर्याणां कर्त्तव्यं आचार्यं वा, मुमुक्षुणा यदाचरणीयं ज्ञानदर्शनचारित्रम् । सूत्र० १८४ । पापकर्मभ्य आरायातमित्यार्यम् । ठाणा० ११९ ।

**आसासय**-आशासकः, वृक्षविशेषः। औप० ११।

**आसासा**-आश्वासाः-विश्रामाः। ठाणा० २३६।

**आसासि**-आश्वासय, स्वस्थीकुरु। उत्त० १२७।

**आसासिआ**-आश्वासिता। आव० २२२।

**आसाहीणापहिं**-दुर्दंतेहिं। दश० चू० ११६।

**आसिआवणं**-स्तैन्यम्। बृ० तृ० ८६ आ।

**आसिज्ज**-तिष्ठ। (मर०)।

**आसित्ता**-आस्वाद्य-भुक्त्वा। आचा० ३३०।

**आसित्तो**-आसिक्तः, सबीजः। बृ० तृ० ९७ आ। जस्स पुण अवच्चं उप्पज्जति सो। नि० चू० द्वि० ३१ अ।

**आसियं**-आसिक्तं, आसेचनं, ईषदुदकच्छटकः। प्रश्न० १२७। उदकच्छटम्। जीवा० २४६। निर्द्धाटनं, निष्काशनम्। बृ० द्वि० ६१ आ।

**आसियावणं**-हरणं। नि० चू० प्र० २६७ अ। अपहरणम्। बृ० प्र० ३०९ आ। हरति। नि० चू० द्वि० १३ आ।

**आसिले** - आसिलः, महर्षिविशेषः। सूत्र० ९५।

**आसिवावितो**-प्रव्राजितः। नि० चू० प्र० २८६ अ।

**आसी**-आश्यो-दंष्ट्राः। प्रज्ञा० ४७। विशे० ३८०। आव० ४८। आसीः-दंष्ट्रा। आव० ५६६।

**आसीणे**-आसीनः, आश्रितः। आचा० २९३।

**आसीयावणा**-निष्कषायितुमासादनम्। व्य० द्वि० ३६१ अ।

**आसीविस**-आशीविषः शङ्खविजये वृक्षस्कारः। जं० प्र० ३५७। नागः। प्रश्न० १०७। आश्यो-दंष्ट्रास्तासु विषं येषां ते। ठाणा० २६५। जीवा० ३९। सीतोदादक्षिणतः वक्षस्कारः। ठाणा० ३२६। उरःपरिसर्पविशेषः। जीवा० ३९। विशे० ३८०। उत्त० ३१८। आशीविषः-भुजङ्गः। आव० ५६७।

**आसु**-आशु, शीघ्रम्। उत्त० ६३८। जं० प्र० २०२।

**आसुकारिणः**-दुष्टाः। नि० चू० प्र० ७५ आ।

**आसुकोहो**-तक्खणमेव कोहो। दश० चू० १२५।

**आसुक्कारो**-आशु-शीघ्रं सजीवस्य निर्जीवीकरणम्, अहिविषविशूचिकादिः। बृ० तृ० १४७ अ। शीघ्रकारः, अहिविषविशूचिकादिकः। आव० ६२९।

**आसुपन्ने**-आशुप्रज्ञः, शीघ्रमुचितकर्त्तव्येषु यतितव्यमिति प्रज्ञा-बुद्धिरस्येति। उत्त० २१७। सततोपयुक्तः। आचा० २६८।

**आसुर** - असुरभावनाजनित आसुरः, भवनपतिविशेषस्यायमासुरः। ठाणा० २७४। कोहो। दश० चू० १२२।



Jain Education International 2010_05    For Private & Personal Use Only    www.jainelibrary.org

**आसुरत्तं**-आसुरत्वम्, क्रोधभावम्। दश० २३१।
**आसुरत्तभावणा**-आसुरत्वभावना। उत्त० ७०७।
**आसुरत्तो**-क्रुद्धः। आव० ३८९।
**आसुरिनामा**-कपिलशिष्यः। आव० १७१।
**आसुरिपत्तं**। नि० चू० द्वि० ६० अ।
**आसुरियं**-असुरभावम्। प्रश्न० १२१। अविद्यमानसुर्याम्। उत्त० २७६। असुराणामियमासुरीया। उत्त० २७६।
**आसुरी** - असुरा-भवनपतिदेवविशेषास्तेषामियं आसुरी। बृ० प्र० २१२ आ।
**आसुरुत्ते**-आशुरुप्तः, आशु-शीघ्रं रुप्तः-कोपोदयादिमूढः स्फुरितकोपलिङ्गो वा। भग० ३२२। आशु-शीघ्रं रुप्तः-क्रोधेन विमोहितो यः सः। आसुरोक्तः-आसुरं वा-असुरसत्कं कोपेन दारुणत्वादुक्तं-भणितं यस्य सः। विपा० ५३। आसुरुत्तः-शीघ्रं कोपविमूढबुद्धिः, स्फुरितकोपचिह्नो वा। भग० १६७। क्रुद्धः। आव० ६५, १५२, ७११। आशु-शीघ्रं रुष्टः-क्रोधेन विमोहितो यः स आशुरुष्टः, आसुरं वा-असुरसत्कं कोपेन दारुणत्वात् उक्तं-भणितं यस्य स आसुरोक्तः। निर० ८।
**आसुरे काए** - असुराणामयमासुरस्तम् - असुरसम्बधिनं, चीयत इति कायस्तं, निकायमित्यर्थः। उत्त० १८२। असुरसम्बन्धिनि काये असुरनिकाये इत्यर्थः। उत्त० २९६।
**आसूणि**-आशूनिः, श्लाघा। सूत्र० १८०। येन घृतपानादिना आहारविशेषेण रसायनक्रियया वा अशूनः सन्, आ-समन्ताच्छूनीभवति-बलवानुपजायते तत्। सूत्र० १८०।
**आसूणियं**-आशूनितम्, ईषत्स्थूलीकृतम्। प्रश्न० ४९।
**आसूय**-आसूयम्, औपयाचितकम्। पिण्ड० १२०।
**आसेवणसिक्खा** - आसेवनशिक्षा, प्रत्युपेक्षणादिक्रियोपदेशः। विशे० ९। उत्त० ५४५। शिक्षाद्वितीयभेदः। नंदी २१०। सामाचारीशिक्षणम्। बृ० प्र० ६४ अ। प्रत्युपेक्षणादिक्रियारूपोऽभ्यासः। आव० ८३३।
**आसेवियं**-स्तोकं आस्वादितं, अनास्वादितं वा। आचा० ३२५।
**आसो**-जात्या आशुगमनशीलः अश्वः। जीवा० २८२। मनः। प्रज्ञा० ८८। य एकस्मिन् द्वित्रादीनर्थान् वक्ति यथा अश्नातीत्यश्वः, आशु धावति न च श्राम्यति। बृ० प्र० ३४ अ। चतुष्पदविशेषः। प्रज्ञा० ४५।
**आसोकंता**-मध्यमग्रामपंचमी मूर्च्छना। ठाणा० ३९३।
**आसोट्ठे**-अश्वत्थः। आचा० ३४८।
**आसोठे**-अश्वत्थः, बहुबीजवृक्षविशेषः। प्रज्ञा० ३२।
**आसोत्थमंथु**। आचा० ३४८।
**आस्तिक्यम्**-सम्यक्त्वस्य पञ्चमलक्षणम्। आव० ५९१।
**आस्थानमण्डपः** - उपस्थानगृहम्। भग० २००। नंदी ६१।
**आस्फोटनम्**-सकृदीषद्वा स्फोटनम्। दश० १५३।
**आस्या**-यत्रास्यते यथासुखेन स्वाध्यायपूर्वकम्। ओघ० ६९।
**आस्रपः**-मूलः। जं० प्र० ४९९।
**आहंसु**-आहुः, उक्तवन्तः। भग० ९८। आख्यातवान्। प्रश्न० २६।
**आहच्च** - आहत्य, कदाचित्। भग० ३०५, २२। उत्त० १८८, ४८। प्रज्ञा० ३३३। बृ० तृ० ११४ आ। कादाचित्कम्। आव० ५३०। सहसा। नि० चू० द्वि० १२० अ। कदाचित् सान्तरमित्यर्थः। भग० ४१। उपेत्य स्वतः एव, अत्यर्थं कदाचिद्वा। आचा० ५५। ढौकित्वा। आचा० २७२। उपेत्य। आचा० ३६२। सहसा। आचा० ३२२, ३५५। कदाचित् अनन्यगत्या। व्य० प्र० ८ आ। आहत्या-आहननं प्रहारः। भग० ६७३।
**आहच्च गंथा**-आहतग्रन्था-व्ययीकृतद्रव्या। आचा० २७२।
**आहट्टु**-आहत्य, उपेत्य। सूत्र० ३००। गृहीत्वा। आचा० २८२, ३४५।
**आहट्टो**-आडम्बरः (उपाधिः)। आव० ३४१।
**आहडं** - आहृतम्, स्वग्रामादेः साध्वर्थमानीतम्। प्रश्न० १५४। साध्वयोग्यमशनादि। दश० २०३।
**आहणइ**-आहन्ति, समीकरोति। आव० ३८५।
**आहत्तहिए**-सूत्रकृतांगे त्रयोदशाध्ययनम्। सम० ४२।
**आहम्मिए जोगे**-वशीकरणादीनि। आव० ६६२।
**आहयंति**-कथयन्ति। नि० चू० प्र० २७७ अ।
**आहय** - आहतं, लक्षणया लिखितम्। जं० प्र० २०३। आख्यानकप्रतिबद्धं यन्नाट्यं तेन युक्तं तद्गीतम्। ठाणा० ४२१। आहतं, आख्यानकप्रतिबद्धम्। सूर्य० २६७। जीवा० १६२। आव० २९८। आख्यानकप्रतिबद्धं, आस्फालितं वा। औप० ७४।
**आहया**-आख्यानकप्रतिबद्धानि। राज० १६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आहरणं**-आ-अभिविधिना ह्रियते-प्रतीतौ नीयते अप्रतीतोऽर्थोऽनेनेति । ठाणा० २५४ । साध्यसाधनान्वयव्यतिरेकप्रदर्शनं दृष्टान्तो वा । आव० ६२ ।

**आहरणतद्देसे**-आहारणतद्देशः, आहरणार्थस्य देशस्तद्देशः स चासावुपचारादाहरणं चेति प्राकृतत्वादाहरणशब्दस्य पूर्वनिपाते आहरणतद्देश इति यत्र दृष्टान्तार्थदेशेनैव दार्ष्टान्तिकार्थस्योपनयनम् क्रियते तत् । ठाणा० २५४ ।

**आहरणतद्दोसे** - आहारणतद्दोषः, आहारणस्य सम्बन्धी साक्षात्प्रसङ्गसम्पन्नो वा दोषस्तद्दोषः स चासौ धर्म्मे धर्म्मिणः उपचारादाहरणं चेति आहारणस्य दोषो यस्मिंस्तथा यत्साध्यविकलत्वादिदोषदुष्टं तद्दोषाहरणं । ठाणा० २५४ ।

**आहरणा**-घोरयति घोरणं करोति । ओघ० ५८ । ज्ञातविशेषः । ठाणा० २५३ । उदाहरणम् । दश० ३५ ।

**आहरे**-आहारयेत्-व्यवस्थापयेत् । आचा० २९२ ।

**आहव्वणी**-आथर्वणी, आथर्वणाभिधाना सद्योऽनर्थकारिणी विद्या । सूत्र० ३१९ ।

**आहा**-आधा । भग० १०२ । साधूनां मनस्याधानम् साधूनाश्रित्य । प्रश्न० १२७ । आधानम्, साधूनिमित्तं चेतसः प्रणिधानम् । पिण्ड० ३५ । अधस्तात् । नि० चू० प्र० २९४ आ । आधीयतेऽस्यामिति । पिण्ड० ३६ ।

**आहाकम्म**-आधाकर्म्म, आधाय-निमित्तत्वेनाश्रित्य पूर्वोक्तमष्टप्रकारमपि कर्म बध्यते, शब्दस्पर्शरसरूपगन्धादिकं । कर्मनिमित्तभूता मनोज्ञेतरशब्दादय एवाधाकर्म्म । आचा० ९८ । आधानं आधाकरणं तदुपलक्षितं कर्म । यथाकर्म वा तत्तद्गत्यनुरूपचेष्टितं वा । उत्त० १८२ । साधुप्रणिधानेन यत्सचेतनमचेतनं क्रियते अचेतनं वा पच्यते चीयते वा गृहादिकं व्यूयते वा वस्त्रादिकं तदाधाकर्म । भग० १०२ । प्रथम उद्गमदोषः । आधानं आधा तया आधया कर्म-पाकादिक्रिया, आधाय-साधुं चेतसि प्रणिधाय यत् क्रियते भक्तादि तत् । पिण्ड० ३४ । चतुर्थशबलदोषः । प्रश्न० १४४ । सम० ३९ ।

**आहाकम्मियं**-आधाकर्म, दोषविशेषः । आचा० ३२९ ।

**आहाकम्मेहिं** - आधाकर्मभिः, आधान-माधाकरणं आत्मनेतिगम्यते, तदुपलक्षितानि कर्माण्याधाकर्माणि, तैः-स्वकृतकर्मभिः । उत्त० २४७ ।

**आहाण**-आधानम् , विधानम् । विसे० ८४७ ।

**आहार**-आहारः, भोजनम् , जीवनम् । प्रश्न० १०६ । मनसा तथाविध पुद्गलोपादानरूपः । भग० ८६ । त्रयोदशशतके पंचमोद्देशकः । भग० ५९६ । अष्टाविंशतितममाहारप्रतिपादकत्वादाहारः । प्रज्ञा० ६ ।

**आहारए** - आहारकम् ; चतुर्दशपूर्वविदा कार्योत्पत्तौ योगबलेनाह्रियत इति । प्रज्ञा० २६८ । तथाविधकार्योत्पत्तौ चतुर्दशपूर्वविदा योगबलेनाह्रियत इति । ठाणा० २९५ । चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते-निर्वर्त्यते इति । जीवा० १४ । प्रज्ञा० ४०९ । तथाविधप्रयोजने चतुर्दशपूर्वविदा यदाह्रियते-गृह्यते तत् । आह्रियन्ते-गृह्यन्ते केवलिनः समीपे सूक्ष्मजीवादयः पदार्था अनेनेति वा । अनु० १९६ । आहारयति-आहारं गृह्णातीति । नंदी ९० ।

**आहारएसणा**--आहारैषणा । दश० १८ ।

**आहारगं**-आहारकम् , तृतीयं शरीरम् । प्रज्ञा० ४६९ ।

**आहारगंगोवंगणाम**-आहारकाङ्गोपाङ्गनाम, उपाङ्गनाम । प्रज्ञा० ४७० ।

**आहारगत्तं** - आहारकत्वं, आहारकशरीरकरणलब्धिः । ठाणा० ३३२ ।

**आहारगबंधण**-आहारकबन्धनम् , बन्धननाम । प्रज्ञा० ४७० ।

**आहारगमो**-आहारगमः, प्रज्ञापनाया अष्टाविंशतितमाहारपदोक्तसूत्रपद्धतिः । भग० १०९ ।

**आहारगसंघायणाम**-आहारकसङ्घातमाम, यदुदयवशादाहारकशरीररचनाऽनुकारिसङ्घातरूपा जायते तदाहारकसङ्घातनाम । प्रज्ञा० ४७० ।

**आहारगसमुग्घात**-आहारकसमुद्घातः, आहारके प्रारभ्यमाणे समुद्घातः । जीवा० १७ ।

**आहारट्ठ**-आहारार्थः, आहारप्रयोजनमाहारार्थित्वम् । भग० २० । आहारलक्षणं प्रयोजनं, आहाराभिलाषो वा । प्रज्ञा० ५०० ।

**आहारट्ठि**-आहारार्थी, आहारमर्थयते-प्रार्थयते इत्येवंशीलः, अर्थो वा-प्रयोजनमस्यास्तीत्यर्थी, आहारेण-भोजनेन अर्थी आहारार्थी, आहारस्य-भोजनस्य वाऽर्थी आहारार्थी । भग० २० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आहारपच्चक्खाण**-आहारप्रत्याख्यानम्, अनेषणीयभक्तपाननिराकरणरूपम्। उत्त० ५८८।

**आहारपदे**-प्रज्ञापनाया अष्टाविंशतितमपदम्। प्रज्ञा० २५। नंदी १०५।

**आहारपयाइं**-आहारपदानि, आहारग्रहणविषयकानि पदानि। जं० प्र० ४६१।

**आहारपरिण्णा**-आहारपरिज्ञा, सूत्रकृताङ्गे द्वितीयश्रुतस्कंधे तृतीयाध्ययनम्। आव० ६५८। ठाणा० ३८७। उत्त० ६१६।

**आहारपर्याप्तिः**-यया शक्त्या करणभूतया भुक्तमाहारं खलरसरूपतया करोति सा। बृ० प्र० १८४ आ। शरीरेन्द्रियवाङ्मनप्राणापानयोग्यदलिकद्रव्याहरणक्रियापरिसमाप्तिः। तत्त्वा० ८-१२।

**आहारपोसहे**-आहारपौषधः, आहारनिमित्तं पौषधः, आहारनिमित्तं धर्मपूरणं पर्वेति भावना। आव० ८३५।

**आहारसण्णा**-आहारसञ्ज्ञा, आहाराभिलाषः-क्षुद्वेदनीयोदयप्रभव आत्मपरिणामः। आव० ५८०।

**आहारसन्ना**-आहारसञ्ज्ञा, क्षुद्वेदनीयोदयाद् या कवलाद्याहारार्थं तथाविधपुद्गलोपादानक्रिया सा। प्रज्ञा० २२२। क्षुद्वेदनीयोदयात्कावलिकाद्याहारार्थं पुद्गलोपादानक्रियैव सञ्ज्ञायतेऽनया तद्वानित्याहारसञ्ज्ञा। भग० ३१४। आहाराभिलाषः-क्षुद्वेदनीयप्रभवः खलु आत्मपरिणामविशेषः। जीवा० १५।

**आहारवं**-आलोइज्जमाणं जो समेदं सव्वं अवधारति सो। नि० चू० तृ० १२८ आ। अ.लोचितापराधानां अवधारणावान्। भग० ९२०।

**आहाराइणियाए**-रत्नैः-ज्ञानादिभिर्व्यवहरतीति रात्निकः-बृहत्पर्यायो यो यो रात्निको यथारात्निकं तद्भावस्तत्ता तया यथारात्निकतया-यथाज्येष्ठं। ठाणा० ३०१।

**आहारुद्देस**-आहारोद्देशः, प्रज्ञापनाष्टाविंशतितमपदस्योद्देशकः। भग० २०।

**आहारेंति**-विशेषाहारापेक्षया सामान्याहारस्याविशिष्टशरीरबन्धनसमय एव कृतत्वात्। भग० ७६३।

**आहारे**-आहारः, चरमाचरमपदगतसूत्रम्। प्रज्ञा० २४६। आहारप्रतिपादकं प्रज्ञापनाया अष्टाविंशतितमं पदम्। प्रज्ञा० ६। आधारः। भग० ७३८। फलपत्रकिशलयमूलकन्दत्वगादिनिर्वर्त्यः। आचा० ६०।

**आहारेत्ताइतो**-आहृतवान्। आव० ३०८।

**आहारे भोयणा**-आहाराभोगता। प्रज्ञा० ५४३।

**आहारो**-आहारः, कूरादि एक्कं चेव खुधं णासेति पाणे तक्कखीरुदगमज्जादि एगंगिया तिसं णासेति, आहारकिच्चं च करेंति खाइमे एगंगिया फलमंसादि आहारकिच्चं च करेंति, साइमेऽवि मधुफाणिय तंबोलादिया एगंगिया खुहं णासेति। नि० चू० द्वि० ५० आ। मुक्खत्तो जं किंचिवि भुंजति सो सव्वो आहारो। नि० चू० द्वि० ५१ अ। आधार आधेयस्येव सर्वकार्येषु लोकानामुपकारित्वात। भग० ७३९।

**आहारोवचया**-आहारोपचयाः, आहारेणोपचयो येषां ते। आचा० २७५।

**आहार्यः**-अभिनयचतुर्थभेदः। जं० प्र० ४१४। काष्ठफलपुस्तमृत्तिकाचर्मादिघटितप्रजननैर्योषिदवाच्यप्रदेशासेवनमित्यर्थः। आव० ८२५। आहार्यं अन्धकाररहितत्वं। सम० १४०।

**आहालंदिया**-कल्पविशेषः। नि० चू० प्र० ३३८ आ।

**आहावंति**-आगच्छन्ति। बृ० द्वि० २१३ अ।

**आहावणा**-आभावना, उद्देशः। पिण्ड० ११६।

**आहाविज्ज**-आधावेत्। आव० ६३३।

**आहासिया**-आभासिकनामद्वितीयान्तरद्वीपः। प्रज्ञा० ५०।

**आहिंडइल्ल**। ओघ० ९६।

**आहिंडओ**-आहिण्डकः, दूरदेशविहारकर्ता। आव० ५३६।

**आहिंडगा**-विहरंता। नि० चू० प्र० ३१४ अ।

**आहिंडा**-सततं परिभ्रमणशीलाः। बृ० तृ० १८४ आ।

**आहिंडिओ**-आहिण्डकः, आहेटकः। आव० ४३२। अगीतार्थः, चक्रस्तूपादिदर्शमप्रवृत्तः। ओघ० ६०।

**आहिंडितो**-आहिण्डिकः। उत्त० १०८।

**आहिंधइ**-परिदधाति। आव० ३६०।

**आहिअग्गि**-आहिताग्निः, अग्निं गृहीत्वा स्वगृहे स्थापनात्। आव० १६९। ब्राह्मणः। दश० २५२। कृतावस्थादिर्ब्राह्मणः। दश० २४५। प्रतिपादितोऽनुष्ठितो वा। सूत्र० १७८।

**आहिए**-आहितः, जनितः। सूत्र० ६९। प्रथितः, प्रसिद्धिं गतः। सूत्र० ६९।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**आहिज्जइ**-आधीयते, व्यवस्थाप्यते, आख्यायते वा। सूत्र० ३३७। सम्बध्यते। सूत्र० ३०६। आख्यायते। सम० ११३।

**आहितविशेषम्**-आहितविशेषत्वं-वचनान्तरापेक्षया ढौकितविशेषता। एकत्रिंशत्तमवाणीगुणः। सम० ६३।

**आहितुण्डिग**-आहितुण्डिकः, गारुडिकः। दश० ३७।

**आहितो**-आख्यातः, कथितः। सूत्र० ११।

**आहित्थं**। जीवा० १९४।

**आहियं**-आहितम् ढौकितम्। सूत्र० ७१। आत्मनि व्यवस्थितं, आ-समन्तात् हितं वा। सूत्र० ६८। गृहीतम्। आव० ३७०।

**आहियग्गी**-बंभणो। दश० चू० १३२।

**आहियडमरं**-आहितडमरम्, शत्रुकृतविड्वरोऽधिकविड्वरो वा। औप० १२।

**आहिया**-आख्याता। ठाणा० ३९७।

**आहियोग** - आभियोगदेवेषूत्पन्ना आदेशवर्त्तिनः। भग० १९८।

**आहिव्वण**-आहित्यम्, अहितत्वं-शत्रुभावम्। प्रश्न० ३८।

**आही**-आधिः, मनःपीडा। प्रश्न० २५।

**आहुइ**-आहुतिः, अग्नौ घृतादिद्रव्यप्रक्षेपरूपा। दश० २४५।

**आहुणिए**-आधुनिकः। सूर्य० २९४। अष्टाशीतौ ग्रहेषु पंचमग्रहनाम। ठाणा० ७८। जं० प्र० ५३४।

**आहुणिज्ज**-आहवनीयं-सम्प्रदानभूतम्। औप० ५।

**आहुणिय**-आधूय। आव० १२१।

**आहुस्स**-आहोतुः, दातुः। औप० ५।

**आहूए**-संहृतः। आचा० ४२१।

**आहूतो**-उत्पन्नः। आव० ३४३। लग्नः, उत्पन्नः। उत्त० १४८।

**आहूय** - आहूतम्-आह्वानमामन्त्रणं नित्यं मद्गृहे पोषमात्रमन्नं ग्राह्यं इत्येवंरूपम्, कर्मकराद्याकारण वा साध्वर्थं स्थानान्तरादन्नाद्यानयनाय यत्र सः, स्पर्धा वा। भग० २९३। भग० २९४।

**आहेडगो**-मिगव्वं। नि० चू० द्वि० १३६ आ।

**आहेणं**-जमन्नगिहातो आणिज्जति तं अहवा जं वहुगिहातो वरगिहं णिज्जति तं। नि० चू० द्वि० २२ अ। यद्विवाहोत्तरकाले वधूप्रवेशे वरगृहे भोजनं क्रियते। आचा० ३३४।

**आहेति**-आधाय, कृत्वा। उत्त० २४७।

**आहेवच्चं** - आधिपत्यम्, अधिपतिकर्म। भग० १५४। अधिपतेः कर्म, रक्षा। जं० प्र० ६३। जीवा० २१७, १६२।

**आहेवणं**-आक्षेपम्, पुरक्षोभादिकरणम्। प्रश्न० ३८।

**आहोपुरुषिका**-आत्मशक्त्याविष्करणम्। सूत्र० ३४५।

**आहोहिओ**-आधोऽवधिकः, परमावधेरधस्ताद् योऽवधिस्तेन यो व्यवहरति सः परिमितक्षेत्रविषयावधिकः। भग० ६७।

**आहोहियं**-नियतक्षेत्रविषयावधयः। सम० ९६।

**आहोही**-यत्प्रकारोऽवधिरस्येति यथावधिः परमावधेर्वाऽधोवर्त्यवधिर्यस्य सोऽधोऽवधिः। ठाणा० ६१।

**आह्निका**-पिशाचे चतुर्थभेदः। प्रज्ञा० ७०।

**आह्वियते**-निर्वर्त्यते। जीवा० १४।

## इ

**इंखिणिका**-कर्णमूले घण्टिकां चालयन्ति। आव० १३०।

**इंखिणी** - विज्जाभिमंतिया घंटिया कण्णमूले चालिज्जति, तत्थ देवता कहिंति कहेंतस्स पसिणापसिणं संभवति स एव इंखिणी भण्णति। नि० चू० द्वि० ८५ अ। निन्दा। सूत्र० ६१।

**इंगना**-इङ्गना, सञ्ज्ञा। नंदी १५।

**इंगाल**-अङ्गारः, दग्धेन्धनो विगतधूमज्वालः। आचा० ४९। चारित्रेन्धनमङ्गारमिव यः करोति भोजनविषयरागाग्निः सोऽङ्गारः। भग० २९१। अङ्गाराणामयमाङ्गारः। दश० १६४। ज्वालारहितोऽग्निः। दश० १५४, २२८। महाग्रहविशेषः। भग० ५०५। निर्ज्वलितेन्धनम्। भग० २१३। विगतधूमः। प्रज्ञा० २९। निर्धूमाग्निः। जीवा० १०७। विगतधूमज्वालो जाज्वल्यमानः खदिरादिः। जीवा० २८। अङ्गारः। आव० ४२२, ३१३। रागो। नि० चू० तृ० ४१ अ। ज्वालारहितो वह्निः, अग्नेस्तृतीयभेदः। पिण्ड० १५२।

**इंगालए** - अङ्गारकः, अष्टाशीतितममहाग्रहविशेषः। सूर्य० २९४। महाग्रहविशेषः। जं० प्र० ५३४। ठाणा० ७८।

**इंगालकड्ढिणि**-ईषद्वक्राग्रा लोहमययष्टिः। भग० ६९७।

**इंगालकम्म** - अङ्गारकर्म्म, अङ्गारकरणविक्रयक्रिया। आव० ८२९।

**इंगालदाहओ**-अङ्गारदाहकः। आव० १५१।

**इंगालब्भूया**-अङ्गारराशिना भूता। भग० १६६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इंगालवडेंसए** – अङ्गारावतंसकं, ज्योतिषविमानविशेषः। भग० ५०५।

**इंगालसोल्लियं**–अङ्गारैरिव पक्वम्। भग० ५१९। औप० ९१। निर० २६।

**इंगाला**–अणिंधणाणि ज्वाला। नि० चू० प्र० ५२ आ।

**इंगिअ**–इङ्गितम्, अन्यथा प्रवृत्तिलक्षणम्, निष्ठीवनादिलक्षणम्। दश० २५२। नयनादिचेष्टया। जं० प्र० २२३।

**इंगिणि**–इङ्गिनी, अनशनविशेषः। आव० ६७०।

**इंगिणिमरणे**–इङ्गिनीमरणम्, प्रतिनियतदेश एव चेष्टयतेऽस्यामनशनक्रियायाम्, सप्तदशमरणे षोडशः। सम० ३३। इङ्गिते प्रदेशे मरणं इङ्गितमरणम्। आचा० २६२। "इंगियदेसंमि सयं चउव्विहाहारचायनिप्फन्नं। उव्वत्तणाइजुत्तं नऽण्णेण उ इंगिणीमरणं"। ठाणा० ९६। यावत्कथिकानशनद्वितीयभेदः। ठाणा० ३६४।

**इंगिणी**–इङ्गिनीमरणम्, मरणस्य षोडशो भेदः। उत्त० २३०। इङ्गिनी, इङ्ग्यते–प्रतिनियतप्रदेश एव चेष्टते अस्यामनशनक्रियायामिति। उत्त० २३५। सम० ३५। विशे० १०।

**इंगितं**–सूक्ष्मबुद्धिगम्यचेष्टा। ठाणा० ४। सूक्ष्मचेष्टाविशेषः। बृ० प्र० ४३ अ।

**इंगिनीमरणं** – उक्तन्यायतः प्रतिपद्य शुद्धस्थण्डिलस्थाता एकाक्येव कृतचतुर्विधाहारप्रत्याख्यानस्ततस्थंडिलस्यान्तश्छायात उष्णमुष्णाच्च छायां स्वयं संक्रामति। उत्त० ६०२। नियतप्रदेशस्थायित्वेऽशनादित्यागः। आव० ५६३।

**इंगियं**–इङ्गितम्, ज्ञानविशेषः। आव० ७२४। नयनादिचेष्टाविशेषः। निर० ८। ज्ञाता० ४१। निपुणमतिगम्यं प्रवृत्तिनिवृत्तिसूचकमीषद्भ्रूशिरःकम्पादि। उत्त० ४४। अंगभंगादि। उत्त० ६२६।

**इंगियपत्थिय**–चेष्टितप्रार्थितः। (मर०)।

**इंगियमरणं**–इंगितमरणम्, इंगिते प्रदेशे मरणम्। दश० २७।

**इंगियागारकुसलो**–इंगिताकारकुशलः। आव० ५६।

**इंगियागारसंपन्ने**–इंगिताकारसम्प्रज्ञः, इंगितं–निपुणमतिगम्यं प्रवृत्तिनिवृत्तिसूचकं, आकारः–स्थूलधीसंवेद्यः प्रस्थानादिभावाभिव्यञ्जको दिगवलोकनादिः, द्वन्द्वे इंगिताकारौ, तौ अर्थाद्गुरुगतौ सम्यक् प्रकर्षेण जानातीति। उत्त० ४४। इंगिताकारसम्पन्नः– इंगिताकाराभ्यां गुरुगतभावपरिज्ञानमेवोक्तं तेन सम्पन्नः–युक्तः। उत्त० ४४।

**इंग्यते**–प्रतिनियतदेश एव चेष्टयते। सम० ३५।

**इंतं**–आयान्तम्। उत्त० ३२५, १३९।

**इंती**–एंति–आगच्छन्ति। ओघ० ७८।

**इंतो**–आयान्, आगच्छन्। दश० ३७। आव० ८०१। बृ० तृ० १७९ अ।

**इंदं**–एकोनविंशतिसागरोपमस्थितिकं विमानम्। सम० ३७।

**इंद**–इन्द्रः, सप्तमदिनस्य सैद्धान्तिकं नाम। सूर्य० १४७। ऐन्द्री–पूर्वदिक्सैद्धान्तिकनाम। ठाणा० १३३।

**इंदकाइया**–त्रीन्द्रियविशेषः। प्रज्ञा० ४२। त्रीन्द्रियजन्तुविशेषः। जीवा० ३२।

**इंदकील**–इन्द्रकीलः, गोपुरे कीलविशेषः। जीवा० ३५९, २०४। गोपुरकपाटयुगसन्धिनिवेशस्थानम्। जं० प्र० ४८। गोपुरावयवविशेषः। औप० ३। गोपुरकपाटयुगसन्धिनिवेशस्थानम्। भग० १७५। पुरमध्यस्थम्। नंदी १५०।

**इंदकुंभ**–कुम्भानामिन्द्रः–विजयदेवाभिषेककलशाः। जं० प्र० ५०।

**इंदकुंभसमाणो** – इन्द्रकुम्भसमानः, महाकुम्भप्रमाणकुम्भसदृशः। जीवा० ३६०।

**इंदकुमारिया**–इन्द्रकुमारिका। आव० ४३४।

**इंदकेऊ**–इन्द्रकेतुः, लोकमहनीयो ध्वजविशेषः। उत्त० ३०३।

**इंदकेतू**–इन्द्रकेतुः, रश्मिनियन्त्रिते वेन्द्रयष्टिः। प्रश्न० १३४।

**इंदखीलो**–इन्द्रकीलः। आव० ४१७।

**इंदगाइ**–त्रीन्द्रियजीवविशेषः। उत्त० ६९५।

**इंदगाह**–इन्द्रग्रहः, उन्मत्तताहेतुः। भग० १९८।

**इंदगोवए**–इन्द्रगोपकः, प्रावृट्प्रथमसमयभावी कीटविशेषः। प्रज्ञा० ३६१।

**इंदगोवया**–इन्द्रगोपकः, त्रीन्द्रियजन्तुविशेषः। जीवा० ३२। त्रीन्द्रियविशेषः। प्रज्ञा० ४२।

**इंदगोवसमाइय**–त्रीन्द्रियजीवभेदः। उत्त० ६९५।

**इंदगोवेइ**–इन्द्रगोपकः, प्रावृट्कालभावी कीटविशेषः। जं० प्र० ३४। आचा० ३७६।

**इंदग्गहो**–इन्द्रग्रहः। जीवा० २८।

**इंदग्गी**–इन्द्राग्निः, ग्रहविशेषः। ठाणा० ७९। जं० प्र० ५३५।

**इंदजसा**–इन्द्रयशा, ब्रह्मराजराज्ञी। उत्त० ३७७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इंदजालिओ**-इन्द्रजालिकः-भूतिलाभिधः। आव० २१९।

**इंदज्झओ** -इन्द्रध्वजः, शेषध्वजापेक्षयाऽतिमहत्त्वादिन्द्रश्चासौ ध्वजश्च इन्द्रध्वज इति विग्रहः, इन्द्रत्वसूचको ध्वज इति वा। सम० ६१।

**इंदट्ठाणे** - इन्द्रस्थानम्, यत्रेन्द्रयष्टिरूर्द्ध्वीक्रियते। अन्त० २३।

**इंदणागो**-इन्द्रनागः, येन बालतपसा सामायिकं लब्धम्। आव० ३५३। वसन्तपुरे दारको य एकपिण्डिको जातः। आव० ३५२।

**इंददत्त**-इन्द्रदत्तः, अभिनन्दनजिनप्रथमभिक्षादाता। आव० १४७। सम० १५१। इन्द्रपुरनगरनृपतिः। विपा० २२। व्य० द्वि० १५१ अ। व्य० द्वि० १७० आ। तितिक्षोदाहरणे इन्द्रपुरनगरनरेशः। आव० ७०२। मथुराक्षाद्धः पादच्छेदकः। (मर०)। वासुपूज्यपूर्वभवः। सम० १५१। इन्द्रपुरे राजा। आव० ३४३। मथुरायां पुरोहितविशेषः। उत्त० १२५। श्रावस्त्यां कपिलशिक्षको ब्राह्मणः। उत्त० २८६, २८७। इन्द्रपुरनृपतिः। उत्त० १४८।

**इंदधणु**-इन्द्रधनुः। जीवा० २८३। विविधवर्णमभ्रमण्डले जायमानं तेजोमण्डलम्। भग० १९५।

**इंदनीले**-इन्द्रनीलः, रत्नविशेषः। प्रज्ञा० २७। पृथिवीभेदः। आचा० २९। मणिभेदः। उत्त० ६८९।

**इंदपयपव्वतो**-गजाग्रपदपर्वतापरनामा पर्वतः, षड्दिग्क्षेत्रावग्रहस्थानम्। नि० चू० प्र० ३४१ अ।

**इंदपाउया**-इन्द्रपादुका, इन्द्रकुमारी। आव० ४३७।

**इंदपुरं**-इन्द्रपुरम्, नगरविशेषः। उत्त० ३८०। इन्द्रदत्तराजधानी। उत्त० १४८। तितिक्षोदाहरणे नगरविशेषः। आव० ७०२। नगरविशेषः। विपा० ५४, ९५। इन्द्रदत्तराजधानी। विपा० ८८। नगरविशेषः। आव० ३४३। व्य० द्वि० १५१ अ, १७० आ।

**इंदभूई**-इन्द्रभूतिः, प्रथमगणधरः। आव० २४०। श्रीवीरप्रथमगणधरः। सम० १५२।

**इंदभूती**-इन्द्रभूतिः इति मातृपितृकृतनामधेयः, महावीरस्वामिनः प्रथमशिष्यः। भग० ११। महावीरस्वामिनो ज्येष्ठः शिष्यः। भग० १३९। श्रीमहावीरप्रथमगणधरः। सूत्र० ४०७। रविप्रश्ननिर्णये चम्पानगर्यां पुण्यभद्रचैत्ये महावीरस्वामिनो गौतमगोत्रो ज्येष्ठः शिष्यः। भग० २०६।

**इंदमह** - इन्द्रमहः, इन्द्रोत्सवः। उत्त० २११। अश्वयुक्पौर्णमासी। ठाणा० २१४। लौकिकमहोत्सवः। आव० ३५८। उत्सवविशेषः। आव० ६९२। आचा० ३२८। यदश्वयुक्पूर्णिमायां भवति कार्त्तिके वा। आव० ७३६। इन्द्रोत्सवः। आव० ३५८। इन्द्रस्य-शक्रस्य महः-प्रतिनियतदिवसभावी उत्सवः। जीवा० २८१।

**इंदमुद्धाभिसित्ते**-इन्द्रमूर्द्धाभिषिक्तः, सप्तमदिनस्य सैद्धान्तिकनाम। जं० प्र० ४९०।

**इंदसम्मो**-इन्द्रशर्मा, गृहपतिविशेषः। आव० १९४। प्रतिचरकः। आव० १९०।

**इंदसिरी**-इन्द्रश्रीः, ब्रह्मराजराज्ञी। उत्त० ३७७।

**इंदसेणा**-रक्तवतीसंगमिका नदी। ठाणा० ४७९।

**इंदा**-ऐन्द्री, पूर्वदिक्। आव० २१५। भग० ४९३। नागकुमारेन्द्रस्य पञ्चमाग्रमहिषी। भग० ५०४। पञ्चमविद्युत्कुमारी महत्तरिका। ठाणा० ३६१। रक्तवतीसंगमिका नदी। ठाणा० ४७७।

**इंदासणि**-इन्द्राशनिः, इन्द्रवज्रम्। उत्त० ४७५।

**इंदियं**-इन्द्रियं, प्रज्ञापनायाः पञ्चदशं पदम्। प्रज्ञा० ६। इन्दनादिन्द्रः-जीवः, सर्वविषयोपलब्धिभोगलक्षणपरमैश्वर्ययोगात्तस्य लिङ्गं तेन दृष्टं सृष्टं जुष्टं दत्तमिति वा, श्रोत्रादि। ठाणा० ३३४। औदारिकादित्वार्थपरिच्छेदकत्वलक्षणधर्म्मद्वयोपेतम्। ठाणा० ३५६। इन्द्रलिंगदृष्टदिष्टादिरूपम्। तत्त्वा० २-१५।

**इंदियउद्देसए** - प्रज्ञापनायाः पंचदशपदस्य प्रथमोद्देशकः। भग० ४४०, ७७७, १३१। प्रज्ञा० ५४५।

**इंदियकरणं**-इन्द्रियकरणम्, इन्द्रियाणां--चक्षुरादीनां करणं अवस्थान्तरापादनम्। उत्त० १९८।

**इंदियत्थ**-औदारिकादित्वार्थपरिच्छेदकत्वलक्षणधर्म्मद्वयोपेतमिन्द्रियं, अर्थः-विषयो जीवादिः। ठाणा० ३५६।

**इंदियत्थविकोवणयाते** -इन्द्रियार्थविकोपनं-कामविकारः। ठाणा० ४४७।

**इंदियत्था** - इन्द्रियार्थाः इन्द्रियैरर्यन्ते-अधिगम्यन्त इति इन्द्रियार्थाः-शब्दादयः। ठाणा० २५३। इन्द्रियाणामर्थाः-तद्विषयाः-शब्दादयः। ठणा० ३३५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इंदियनिग्गहो** – इन्द्रियनिग्रहः, इन्द्रियाणां – श्रोतादीनां निग्रहः–इष्टेतरेषु शब्दादिषु रागद्वेषाकरणं, पञ्चैतेऽनगारगुणाः। आव० ६६०।

**इंदियपच्चक्खे** – इन्द्रियं–श्रोत्रादि तन्निमित्तं–सहकारिकारणं यस्योत्पित्सोस्तदलिंगिकं शब्दरूपरसगन्धस्पर्शविषयज्ञानमिन्द्रियप्रत्यक्षम्। अनु० २११।

**इंदियपज्जत्ति**–इन्द्रियपर्याप्तिः–यया धातुरूपतया परिणमिताद्दाहारादिन्द्रियप्रायोग्यद्रव्याण्युपादायैकद्वित्र्यादीन्द्रियरूपतया परिणमय्य स्पर्शादिविषयपरिज्ञानसमर्थो भवति सा। बृ० प्र० १८४ आ।

**इंदियपडिपुण्णो**–नोविगलिंदियो। नि० चू० प्र० २६६ आ।

**इंदियबलं**–इन्द्रियबलम्, चक्षुरादीन्द्रियाणां बलं–स्वस्वविषयग्रहणपाटवम्। जीवा० २६८।

**इंदियमुंडा**–न जितेन्द्रियाः। नि० चू० द्वि० ३७ अ।

**इंदियलद्धी**–इन्द्रियलब्धिः, पञ्चेन्द्रियप्राप्तिः। उत्त० १४५। इन्द्रियाणाम्–स्पर्शादीनां मतिज्ञानावरणक्षयोपशमसम्भूतानामेकेन्द्रियादिजातिनामकर्मोदयनियमितक्रमाणां पर्याप्तकनामकर्मादिसामर्थ्यसिद्धानां द्रव्यभावरूपाणां लब्धिरात्मनीतीन्द्रियलब्धिः। भग० ३५०।

**इंदियलाघवं** – इंद्रियलाघवं, इंद्रियाणि तस्य वशे वर्त्तते। व्य० द्वि० १०२ आ।

**इंदियाइं**–इन्द्रियाणि–नयननासिकादीनि। उत्त० ४२५।

**इंदियाईणं**–इन्द्रियादीनाम्, पृथ्व्याद्येकेन्द्रियाणाम्। विशे० २६०।

**इंदियाणि**–इन्द्रियाणि–नयननाशावंशादीनि। सम० १६।

**इंदीवरे**–हरितविशेषः। प्रज्ञा० ३३।

**इंदुत्तरवडिंसगं**–एकोनविंशतिसागरोपमस्थितिकं विमानम्। सम० ३७।

**इंदुवसु**–इन्दुवसुः, ब्रह्मराजराज्ञी। उत्त० ३७७।

**इंदे**–इन्द्रः। ठाणा० २९२। मल्लिनाथप्रथमशिष्यः। सम० १५२।

**इंदो**–इन्द्रः, अधिपतिः। प्रज्ञा० १०५। इन्दनाद्–इन्द्रः–आत्मा। प्रज्ञा० २८५। जीवा० १६। इन्दनात्–इन्द्रः, सर्वोपलब्धिभोगपरमैश्वर्यसम्बन्धाज्जीवः। आव० ३९८। जीवः–सर्वविषयोपलब्धिभोगलक्षणपरमैश्वर्ययोगात्। ठाणा० ३३४। परमैश्वर्ययोगात्प्रभुर्महान्। ठाणा० १९८। भवनवास्याद्यधिपाः। तत्त्वा० ४–४।

**इंदोकंतं**–एकोनविंशतिसागरोपमस्थितिकं विमानम्। सम० ३७।

**इंधणपलिआमं** – जहा कोद्दवपलालेणं अंबगादि फलाणि वेढेत्ता पाविज्जंति आदिग्गहणेणं सालिपलालेग वितत्थ जे ण पक्का फला ते इंधणपलियामं भणणति। नि० चू० द्वि० १५२ आ।

**इंधणपलियामं**–इंधनपर्यायामं–कोद्रवपलालादिना वेष्टयित्वा पाच्यानि फलानि। बृ० प्र० १४२ आ।

**इंधणसाला**–जत्थ तणाकरिसभारा अच्छंति। नि० चू० तृ० २१ आ। तृणकरीषकचवरस्थानम्। बृ० द्वि० १७५ अ।

**इइकट्टु**–इतिकृत्वा, निश्चित्य। जं० प्र० ३८६। इतिकृत्वा–यस्मात् कारणात्। अनु० १६।

**इइकम्मं**–इतिकर्म्म, इति–सांसारिकं दुःखं कर्म–अष्टप्रकारकर्मकृतम्। आचा० १४५।

**इइहास**–इतिहासः–पुराणम्। औप० ९३। भग० ११२। निर० २३।

**इक**–देशीवचनम्। विशे० ११३४।

**इक्कडं**–कठिनं तृणविशेषः। बृ० तृ० ५२ आ। ढंढणसदृशं तृणविशेषम्। प्रश्न० १२८। तृणविशेषः। भग० ८०२।

**इक्कडदासो**–इक्कडदासः। उत्त० २८६।

**इक्कडा**–लाडदेसे वणस्सतिभेओ। नि० चू० प्र० १३४ आ। वनस्पतिविशेषाः। सूत्र० ३०७।

**इक्कमिक्क**–एकैकम्–परस्परम्। उत्त० ३८२।

**इक्काई**–राष्ट्रकूटविशेषः। विपा० ३९।

**इक्कारसालंकारं** – एकादशालङ्काराः, स्वरप्राभृतकथितालंकाराः। जं० प्र० ३९।

**इक्खाग**–इक्ष्वाकुः, कुलविशेषः। आव० १७९।

**इक्खागकुलो**–इक्ष्वाकुकुलः, कुलविशेषः। नि० चू० प्र० २९० अ। आव० १०९।

**इक्खागभूमि**–इक्ष्वाकुभूमिः, ऋषभजन्मभूमिः। आव० १६०।

**इक्खागा**–इक्ष्वाकवः, नाभेयवंशजाः। भग० ४८१। औप० ५८। कुलार्यभेदविशेषः। प्रज्ञा० ५६। प्रथमप्रजापतिवंशजाः। ठाणा० ३५८। ऋषभस्वामिवंशिकाः। आचा० ३२७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इक्खु**-इक्षुः। भग० ३०६। दश० १८३।

**इक्खुगारा**-इषुकाराः, धातकीखण्डपुष्करवरद्वीपार्द्धयोः भेदकारिणो दक्षिणोत्तरायताः पर्वतविशेषाः। प्रश्न० ९५।

**इक्खुवाडिया**-इक्ष्वादीनां मूलवर्गः (वंशवर्गवत्)। भग० ८०२।

**इक्खुवाडि**-पर्वगविशेषाः। प्रज्ञा० ३३।

**इक्षु**-पर्वगविशेषः। प्रज्ञा० ३०।

**इक्षुरसा** - वापीनाम, पंडकवन आग्नेयप्रासादवापिका। जं० प्र० ३७१।

**इक्षुवरः**-घृतोदसमुद्रानन्तरं द्वीपः, तदनन्तरं समुद्रोऽपि। प्रज्ञा० ३०७।

**इगं**-इकम्, देशीपदम्। आव० ४७४।

**इच्छं**-इच्छामि। आव० २६५।

**इच्छया**-बलाभियोगमन्तरेण। ठाणा० ५००।

**इच्छसि**-मृगयसे। आचा० १६८।

**इच्छा**-इच्छा, बलाभियोगः। ठाणा०। ४९९। इच्छा-प्रार्थना कामोऽभिलाषः कांक्षा गार्ध्यं मूर्च्छा। तत्त्वा० ७-१२। एकादशीरात्रिनाम। जं० प्र० ४९१। सूर्य० १४७। धनादिविषयाभिलाषः। ठाणा० २९१। चेतःप्रवृत्तिरभिप्रायः। आचा० १७५। अभिलाषमात्रम्। प्रश्न० ९७। अप्राप्तार्थाभिलाषरूपा। प्रश्न० ९२। वन्दनके प्रथमं स्थानम्। आव० ५४८।

**इच्छाकामा**-इच्छाकामाः, एषणमिच्छा सैव चित्ताभिलाषरूपत्वात्कामा इति। दश० ८५। मोहनीयभेदहास्यरत्युद्भवाः। आचा० १३५।

**इच्छाकार**-इदं मदीयं कार्यमिच्छया कुरुत न बलाभियोगेनेत्येवमिच्छया करणम्। बृ० प्र० २२२ अ। आज्ञाबलाभियोगरहितो व्यापारः। अनु० १०३। दशविधसामाचार्याः प्रथमभेदः। भग० ९२०। बलाभियोगमन्तरेण करणं इच्छाकारः-इच्छाक्रिया। आव० २५८।

**इच्छाणुलोमा** - यथा कश्चित्किञ्चित्कार्यमारभमाणः कञ्चन पृच्छति, स प्राह-करोतु भवान् ममाप्येतदभिप्रेतमित्येवंरूपा भाषा। प्रज्ञा० २५६। प्रतिपादयितुर्या इच्छा तदनुलोमा-तदनुकूला। भग० ५००। असत्यामृषाभाषाभेदः। दश० २१०।

**इच्छाणुलोमियं**-इच्छा-चेतःप्रवृत्तिरभिप्रायस्तस्यानुलोमम्-अनुकूलं तत्र भवमैच्छानुलोमिकम्। ठाणा० १७५।

**इच्छापरिमाणं**-इच्छायाः परिमाणम्। आव० ८२५।

**इच्छापुन्निमा**-इच्छापूर्णिमा। सूर्य० ११५।

**इच्छामणं** - इच्छामनः, कायपरिचारेच्छाप्रधानं मनः। प्रज्ञा० ५४९।

**इच्छामुच्छा** - इच्छामूर्च्छा, इच्छा-परधनं प्रत्यभिलाषः मूर्च्छा-तत्रैव गाढाभिष्वङ्गरूपेति, तृतीयाधर्मद्वारस्य सप्तविंशतितमं नाम। प्रश्न० ४३।

**इच्छालोभ**-इच्छारूपो लोभः इच्छालोभः-चक्रवर्तीन्द्रत्वाद्यभिलाषादिको निदानविशेषः। आचा० २९५। महालोभः। बृ० तृ० २४६ अ। ठाणा० ३७४।

**इच्छियं** - इष्टम्-ईप्सितम्। भग० १२१ इच्छितं-इष्टं-अनुमतम्। उत्त० ५०३। इच्छाविषयीकृतम्। जीवा० २७९।

**इच्छियपडिच्छियं** - इष्टप्रतीप्सितम्, युगपदिच्छाप्रतीप्साविषयं वा। भग० १२१। इच्छाया अवग्रहो नाम इच्छितप्रतीच्छितेन इच्छा संजाताऽस्येति इच्छितं, प्रतीच्छा संजाताऽस्येति प्रतीच्छितं, इच्छितं च तत् प्रतीच्छितं च इच्छितप्रतीच्छितम्। व्य० द्वि० ९३ अ।

**इच्छियपडिच्छियववहारो**- इच्छितप्रतीच्छितव्यवहारः, ईप्सितप्रतीप्सितव्यवहारः। आव० १००।

**इज्जंजलि**-इज्याञ्जलिः, यागविषयो जलाञ्जलिः। अनु० २९। मातुर्नमस्कारविधौ तद्भक्तः क्रियमाणः करकुड्मलमीलनलक्षणोऽञ्जलिः। अनु० २९। पूजायामञ्जलिः। अनु० २९।

**इज्जंत**-एज्जंत-आयान्तमागच्छन्तम्। उत्त० ३५८।

**इज्जा**-इज्या, पूजा। उत्त० ५३१। यजनम्। उत्त० ३५८। यजनं-यागः। अनु० २९। माता। अनु० २९। पूजा-गायत्र्यादिपाठपूर्वकं विप्राणां सन्ध्याऽर्चनम्। अनु० २९।

**इज्जिसिया**- इज्यैषिकाः, इज्यां-पूजामिच्छन्त्येषयन्ति वा ये त एव। भग० ४८२।

**इट्टग**-सेवकिका, मानोत्पत्तिकारणम्। पिण्ड० १३३।

**इट्टाल**-इष्टिकाखण्डः। दश० १७५। नि० चू० तृ० ७४ आ।

**इट्ठं**-इष्टम्। आव० २४०। वल्लभः-पूजितः। भग० ५६०।

**इट्टगा**-(क्षणविशेषः) इट्टगा सुत्ताउला (सेवतिका)। नि० चू० द्वि० १०० आ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इड्डर**-गन्त्रीढक्कनकम्। भग० ३१३। गन्त्र्याः सम्बन्धि। ओघ० १६६, १६७।

**इड्डरग**-इड्डरकं-महत् पिटकम्। राज० १४१।

**इड्डरिकादिः**-पर्युषितकलनीकृताः अम्लरसा भवन्ति, आरनालस्थिताम्रफलादिर्वा। ठाणा० २२०।

**इड्ढि**-ऋद्धिः-आमर्षौषध्यादिः। दश० १०३। भवनपरिवारादिका। जं० प्र० ६२। उत्त० ३५०। आव० १७८। ठाणा० १३२।

**इड्ढिपत्ता**-ऋद्धिप्राप्ता आर्याः। प्रज्ञा० ५५। ऋद्धिप्राप्ता-आर्यप्रथमभेदः, अर्हदादयः। सम० १३५।

**इड्ढिमं**-इस्सरो। नि० चू० द्वि० १६६ आ।

**इड्ढिमत**-ऋद्धिमतः-विस्मयनीयवर्णादिसम्पत्तिमतः। उत्त० ४७३।

**इड्ढिसिय**-रूढिगम्याः। भग० ४८१।

**इड्ढी**-ऋद्धिः। प्रज्ञा० ४२४। इस्सरियं। नि० चू० प्र० १३ आ। आत्मशक्तिरूपा। प्रज्ञा० ४६७। भवनपरिवारादिका। जीवा० २१७। विभवैश्वर्यः। जीवा० २८०। विमानपरिवारादिका। सूर्य० २५८। ठाणा० ११६। औषधिविशेषः। उत्त० ४८०। कनकादिसमुदायः। उत्त० २८४। आमर्षौषध्यादिः। आचा० १७८। विमानवस्त्रभूषणादि। उपा० २६। दीनानाथदानादिका विभूतिः। उत्त० ४६५। श्रावकोपकरणादिसम्पदामर्षौषध्यादिरूपा। उत्त० ६६८।

**इड्ढीगारवं**- ऋद्धिगौरवम्, ऋद्धया-नरेन्द्रादिपूज्याचार्यादित्वाभिलाषलक्षणया गौरवं - ऋद्धिप्राप्त्याभिमानाप्राप्तिसम्प्रार्थनाद्वारेणात्मनोऽशुभभावगौरवम्। आव० ५७९। ऋद्धया-नरेन्द्रादिपूजालक्षणया आचार्यत्वादिलक्षणया वा अभिमानादिद्वारेण गौरवम्, ऋद्धिप्राप्त्यभिमानाप्राप्तप्रार्थनाद्वारेणात्मनोऽशुभभावो भावगौरवम्। ठाणा० १७३।

**इणं**-अयम्, अनन्तरोक्तत्वेन प्रत्यक्षः। भग० ३४।

**इणमो**-इदं, वक्ष्यमाणतया प्रत्यक्षासन्नम्। प्रश्न० २। नमः। पउ० ६-६३।

**इणामेव**-एवमेव। प्रज्ञा० ६००।

**इणिंह**-इदानीम्। आव० २७३।

**इतः**-स्थितः। २६९।

**इतर**- सामान्यसाधुभ्यो विशिष्टतरः। आचा० २४३। शय्यातरः। व्य० द्वि० २७६ अ। अन्तप्रान्तः कुलः। आचा० २४३।

**इता**-ज्ञाता। आचा० २८६।

**इति**-इतिः-प्रवृत्तिः। ठाणा० ३४३। उपदर्शने। सूर्य० २८६। प्रज्ञा० २५५। परिसमाप्तौ एवमर्थे वा। उत्त० ६७। उपप्रदर्शनार्थः। विशे० १५३। एवंप्रकारार्थः। ठाणा० ५०३। पूर्वप्रकान्तपरामर्शकः। आचा० १४५। इतिसद्दो वा अर्थे। नि० चू० द्वि० १३७ आ। आमंतणे परिसमत्तीए उवप्पदरिसणे वा। दश० चू० ६३। हेतौ। आचा। १००। उपप्रदर्शने। उत्त० ५७०। दश० ७६। आद्यर्थः। उत्त० ५६१। प्रत्येकं पर्यायस्वरूपनिर्देशार्थः। उत्त० ८। आद्यर्थे। आव० २८। प्रख्यातगुणानुवादनार्थः। भग० ६७। एवंप्रकाराः। ठाणा० ३५४।

**इतिकत्तव्वं**-इतिकर्त्तव्यं। आव० २१३। इतिकर्त्तव्यता-आदर्शनिक्षेपे संपूर्णकर्तव्यतार्थः। आचा० ५।

**इत्तरं**-इत्वरम्-अल्पकालीनम्। विशे० २४। स्वल्पः। नि० चू० प्र० १८९ अ। परिमितकालम्। दश० २६। चतुर्थादि षण्मासान्तमिदं तीर्थमाश्रित्य। ठाणा० ३६४। पादपोपगमनापेक्षया नियतदेशप्रचाराभ्युपगमादिङ्गितमरणम्। आचा० २८५।

**इत्तरकं**-इत्वरकम्, स्वल्पकालं, नियतकालावधिकं। उत्त० ६००।

**इत्तरकालिकं**-प्रथमपश्चिमतीर्थकरतीर्थेष्वनारोपितव्रतस्य इत्वरकालिकम्। ठाणा० ३२३। अल्पकालिकम्। भग० ९०९।

**इत्तरा**-इत्वरा, ये कल्पसमाप्त्यनन्तरं तमेव कल्पं गच्छं वा समुपयास्यन्ति ते इत्वराः। प्रज्ञा० ६८। स्वल्पकालभाविनी। अनु० १३। प्रस्तुतकल्पपरिसमाप्तौ ये भूयः स्थविरकल्पं प्रतिपद्यन्ते ते। बृ० प्र० २२७ आ।

**इत्तरिए** - अल्पकालीनं। भग० ९२१। नि० चू० प्र० २३९ अ।

**इत्तरियं**-इत्वरम्-स्वल्पकालभावीनि आव० ८३८। उत्तरगुणप्रत्याख्यानम्। आव० ८०४। अल्पकालिकं दैवसिकादि प्रतिक्रमणमेव। आव० ५६३।

**इत्तरियं दिसं**-इत्वरं दिशम्-आचार्यलक्षणाम्। व्य० द्वि० २०० अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इत्तरिय** – इत्वरं, भरतैरावतेषु प्रथमपश्चिमतीर्थकरतीर्थेष्वनारोपितमहाव्रतस्य शैक्षकस्य विज्ञेयम्। प्रज्ञा० ६३। अयनशीलम्–स्वल्पकालभावी। उत्त० ३३५। इत्वराः–प्रस्तुतकल्पपरिसमाप्तौ ये भूयः स्थविरकल्पं प्रतिपद्यन्ते ते। बृ० प्र० २२७ आ।

**इत्तरियतवो** – इत्वरतपः स्वल्पकालं अनशनरूपं तपः। उत्त० ६००।

**इत्तरियपरिग्गहियागमणे**–तत्रेत्वरकालपरिगृहीता कालशब्दलोपादित् इत्वरपरिगृहीतागमनम्, भाटीप्रदानेन कियन्तमपि कालं दिवसमासादिकं स्ववशीकृताया गमनं–मैथुनासेवनम्। आव० ८२५।

**इत्तिरिउग्गहो** – रुक्खातिहेट्ठठिताण वीसमणट्ठा इत्तरिओ उग्गहो भवति। नि० चू० प्र० २३९ आ।

**इत्तिरियं**–इत्वरं, स्वल्पकालिकं दैवसिकरात्रिकादि। ठाणा० ३८०। नि० चू० प्र० ३५४ आ।

**इत्थंथं** – इत्थं तिष्ठतीति इत्थंस्थं। प्रज्ञा० १०९। नारकादिव्यपदेशबीजं वर्णसंस्थानादि तत्। दश० २५८।

**इत्थत्तं**–अनेन प्रकारेणेत्थं तद्भाव इत्थत्वं, मनुष्यादित्वम्। भग० १११।

**इत्थत्थं**–इत्यर्थम्, एनमर्थम्–अनेकशस्तिर्यङ्नरनाकिनारकगतिगमनलक्षणम्। भग० १११।

**इत्थिकहा**–स्त्रीकथा–स्त्रीणां स्त्रीषु वा कथा, विकथायाश्चतुर्थभेदः। ठाणा० २०९। दश० ११४।

**इत्थिपोसए**–स्त्रीयं पोषयतीति स्त्रीपोषकः, अनुष्ठानविशेषः। सूत्र० १११।

**इत्थिरयणे**– स्त्रीरत्नम्, चक्रवर्तेः पञ्चमं पञ्चेन्द्रियरत्नम्। ठाणा० ३९८।

**इत्थिलिंग** – स्त्रीलिङ्गम्, स्त्रीत्वस्योपलक्षणमित्यर्थः। प्रज्ञा० २०।

**इत्थिवऊ** – स्त्रीवाक्, स्त्रीलिङ्गप्रतिपादिका भाषा। प्रज्ञा० २४९।

**इत्थिवेए** – स्त्रीवेदः, स्त्रियाः पुमांसं प्रत्यभिलाषः। प्रज्ञा० ४६८।

**इत्थिवेदो** – अंतो अणुसमय डाहो अणुवसंतो वि घट्टिज्जमाण दिप्पंतो फुंफुअग्गिसमाणो इत्थिवेदो। नि० चू० द्वि० ३१ अ।

**इत्थिवेय**–स्त्रीवेदः, स्त्रियाः पुंस्यभिलाषः। जीवा० १८।

**इत्थिसंसग्गी**–अक्खाइगउल्लावादि। दश० चू० १२७।

**इत्थिसंसत्तो**–स्त्रीसंसक्तः–स्त्रीसम्बन्धः। प्रश्न० १३८।

**इत्थिसागारिए**–स्त्रीजनः। नि० चू० तृ० १० अ।

**इत्थिसागारियं**। नि० चू० द्वि० ३४ अ।

**इत्थी**–स्त्री, पुरुषोत्तमवासुदेवनिदानकारणम्। आव० १६३।

**इत्थीउ**–स्त्रियः, अष्टमः परीषहः। आव० ६५६।

**इत्थीणपुंसिया** – इत्थिवेदो वि से नपुंसकवेदमपि वेदेति। नि० चू० द्वि० २५ आ।

**इत्थीनामगोत्तं**–स्त्रीनामगोत्रम्। आव० १२०।

**इत्थीपण्हाइ**–स्त्री उपलक्षणमेतत् पुरुषो वा प्रस्तौति प्रस्यंदते मिथुनकर्म्म समारभते इत्यर्थः। व्य० द्वि० १९५ आ।

**इत्थीपरिण्णा**–स्त्रीपरीज्ञाध्ययनम्, सूत्रकृताङ्गे प्रथमश्रुतस्कन्धे चतुर्थमध्ययनम्। सम० ३१।

**इत्थीपसुविवज्जिअं**–स्त्रीपशुविवर्जितमित्येकग्रहणे तज्जातीयग्रहणात् स्त्रीपशुपण्डकविवर्जितं रूपाद्यालोकनादिरहितम्। दश० २३७।

**इत्थीरूवं** – अणाभरणा इत्थीरूवं भण्णति। नि० चू० प्र० ७७ अ।

**इत्थीविग्गह**–स्त्रीविग्रहः, स्त्रीशरीरम्। दश० २३७।

**इत्थीविपरियासो**–स्त्रिया विपर्यासः स्त्रीविपर्यासः–अब्रह्मासेवनम्। आव० ५७५।

**इत्थीवेदे**–स्त्रीवेदः, स्त्रियं यथावस्थितस्वभावतस्तत्संबन्धविपाकतश्च वेदयति–ज्ञापयतीति, वैशिकादिकं स्त्रीस्वभावाविर्भावकं शास्त्रमिति। सूत्र० ११२।

**इदुर**–सम्बादिढक्कनकादि तदिदूरम्। अनु० १५१।

**इद्धं**–चित्तं। नि० चू० प्र० ३६ अ।

**इन्द्रकूपः**–उंडतमः कूपविशेषः। आव० ८२७।

**इन्द्रजालम्**–कुहकम्। दश० २५४।

**इन्द्रनीलः** – रत्नविशेषः। जीवा० २३। आव० १८१, २५९। प्रज्ञा० ९१।

**इन्द्रियगोचरा**–विषयाः। आव० ५८४।

**इन्द्रियदुष्प्रणिहितकायिका**–आद्यैन्द्रियैः–श्रोतादिभिर्दुष्प्रणिहितस्य इष्टानिष्टविषयप्राप्तौ मनाक्सङ्गनिर्वेदद्वारेणापवर्गमार्गं प्रति दुर्व्यवस्थितस्य क्रिया। आव० ६११।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इन्द्रियार्थावग्रहः**-स्पर्शनादीन्द्रियाणां ये स्पर्शादयो अर्थाः तेषां अवग्रहः-सामान्यमात्रज्ञानं। नंदी १७४।

**इन्धनं**-गोमयो भण्यते। ओघ० १२९।

**इब्भ**-इभमर्हतीति इभ्यः। बृ० प्र० १९९ अ। यद्द्रव्यनिचयान्तरितो हस्त्यपि न दृश्यते। इभो-हस्ती तत्प्रमाणं द्रव्यमर्हतीति निरुक्तादिभ्यः। जं० प्र० १२२। हस्तिप्रमाणद्रविणराशिपतिः। औप० २७। अर्थवान्। ठाणा० ४६३। यद्द्रव्यनिचयान्तरितो महेभो न दृश्यते। औप० ५८। इभमर्हन्तीतीभ्याः – यद्द्रव्यस्तूपान्तरित उच्छ्रितकदलिकादण्डो हस्ती न दृश्यते ते। ठाणा० ३५८। महाधनाः। भग० ४६३। धनवान्। प्रज्ञा० ३३०। इभो-हस्ती तत्प्रमाणं द्रव्यमर्हतीतीभ्यः। यत्सत्कपुञ्जीकृतहिरण्यरत्नादिद्रव्येणान्तरितो हस्त्यपि न दृश्यते सोऽधिकतरद्रव्यो वा इभ्य इत्यर्थः। जीवा० २८०। अनु० २३। यावतो द्रव्यस्योत्करेणान्तरितो हस्ती न दृश्यते तावद् द्रव्यपतयः। प्रश्न० ९६।

**इब्भजाति** – मातिपक्खविसुद्धा इब्भजाइ। नि० चू० प्र० २९० अ। विशिष्टा जातयः। ठाणा० ३५८।

**इमंपि**-इदमपि, इतिपूर्वकोऽपिशब्दः। आचा० ६५।

**इमेसु**-इमेषु। आचा० ३२६।

**इय**-इतः, आर्षत्वात अस्य। प्रज्ञा० ११२। आगतः। (मर०)।

**इयणिंह**-इत इदानीम्। ठाणा० १४३।

**इयपट्ठा**-इतिप्रष्ठाः-प्रधानाः, वाग्मिनः। उपा० ४६।

**इयरं**-इतरं, रजोहरणनिषद्या औपग्रहिकं कार्पासिकं और्णिकं वा चीरं, सार्थो वा। ओघ० २३। इतरशब्देन रजोहरणनिषद्योच्यते। ओघ० २३।

**इयरेयर**-इतरेतरः, इतरेतरसंयोगः। उत्त० २३।

**इरिआवहं**-ईरणमीर्या, पथि ईर्या ईर्यापथं-गमनागमनम्। ओघ० ३७।

**इरिआवहिए** – ऐर्यापथिकः, केवलयोगप्रत्ययः कर्मबन्धः, क्रियास्थाने त्रयोदशं क्रियास्थानम्। सम० २५।

**इरितासमिती**-जीवसंरक्खणजुगमेत्तंतरदिट्ठिस्स अप्पमादिणो संजमोवकरणुप्पायणणिमित्तं जा गमणकिरिया सा। नि० चू० प्र० १६ आ।

**इरिमदिर**-लक्ष्मीमन्दिरम्, लक्ष्म्यालयं, प्रभूतलक्ष्मीकम्। दश० ५८।

**इरिया**-ईरणमीर्या-गतिपरिणामः। उत्त० ५१४। वर्तनी। उप० मा० गा० ३६०। ईर्या-आचारप्रकल्पस्य द्वादशो भेदः। आव० ६६०। ईर्या-गमनम्। भग० ३२३। ईरणमीर्या-गमनमित्यर्थः। आचा० ३७४। ईर्या-आचारप्रकल्पस्य द्वितियश्रुतस्कन्धस्य तृतीयमध्ययनम्। प्रश्न० १४६। ईर्या-गमनं, ईर्याकार्यं कर्म। आव० २६५। ईर्या-गमनम्। भग० १०६।

**इरियाइ**-ईर्यादि, संयमविषया विराधना। ओघ० ८०।

**इरियामि**-ईरे-गच्छामि गोचरचर्यादिष्विति। उत्त० ४४५।

**इरियावह** – ईर्या-गमनं, तत्प्रधानः पन्था ईर्यापथः। आव० ५७६।

**इरियावहकिरिया** – ईर्यापथक्रिया, या उपशान्तमोहादारभ्य सयोगिकेवलिनं यावदिति। सूत्र० ३०४।

**इरियावहियं**-ऐर्यापथिकी, ईर्या-गमनं तद्विषयः पन्था-मार्गस्तत्र भवा, केवलकाययोगप्रत्ययः कर्मबन्धः इत्यर्थः। भग० १०६। ईरणमीर्या-गतिस्तस्याः पन्था यदाश्रिता सा भवति तस्मिन् भवमध्यात्मादित्वाट्ठकि ऐर्यापथिकं, पथिस्थस्तिष्ठच्चैर्यापथिकम्। उत्त० ५९५।

**इरियावहिया** – ईर्यापथक्रिया, क्रियायास्त्रयोदशो भेदः। आव० ६४८। ईर्यापथिकी – विंशतिक्रियामध्ये विंशतितमा। आव० ६१२। ऐर्यापथिकी-गमनप्रधानः पन्थाः ईर्यापथस्तत्र भवा। आव० ५७३। ईर्यापथिकी-चंक्रमणक्रिया। बृ० तृ० २७ अ।

**इरियासमिइ** – ईर्यासमितिः – निरवद्यप्रवृत्तिरूपा। प्रश्न० १४३। ईर्यासमितिः-आवश्यकायैव संयमार्थं सर्वतो युगमात्रनिरीक्षणायुक्तस्य शनैर्न्यस्तपदा गतिः। तत्त्वा० ९-५।

**इरियासमिए**-ईरणं-गमनमीर्या तस्यां समितो-दत्तावधानः पुरतो युगमात्रभूभागन्यस्तदृष्टिगामीत्यर्थः। आचा० ४२८।

**इला**-हिमवते चतुर्थकूटः। ठाणा० ७१। धरणेन्द्रस्य महिषीनाम। भग० ५०४।

**इलाइपुत्त**-ससंवेगः। (मर०)।

**इलादेवया** – इलादेवता, इलावर्द्धननगरदेवता। आव० ३५९।

**इलादेवी**-पश्चिमरुचकवास्तव्या दिक्कुमारी। आव० १२२। पुष्पचूलायाः पञ्चममध्ययनम्। निर० ३७। पाश्चात्यरुचकवास्तव्या प्रथमादिक्कुमारीमहत्तरिका। जं० प्र० ३९१।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इलादेवीकूडे** – इलादेवीकूटं, क्षुल्लहिमवत्कूटः । जं० प्र० २९६ । इलादेवीदिक्कुमारीकूटम् । जं० प्र० ३८१ ।

**इलापुत्तो** – इलापुत्रः, इलावर्द्धननगरसार्थवाहीपुत्रः । आव० ३५९ । तीर्थकराचार्यव्यतिरिक्तेभ्यः श्रुत्वा प्रतिबुद्धः । सूत्र० १७२ ।

**इलावद्धणं**–इलावर्द्धनं, नगरविशेषः । आव० ३५९ ।

**इलिआगई**–इलिकागतिः, गत्यंतरगतिविशेषः । विशे० २४४ । भग० ८४ । ठाणा० ८९ । आव० ३६३ ।

**इलिएण** । नि० चू० प्र० १६ अ ।

**इलिका** – धान्यकीटः । भग० ८४ । धान्यजन्तुविशेषः । आव० ३६३ ।

**इलू**–धान्यविशेषः । नि० चू० तृ० १४९ अ ।

**इष्टकापाकः**–यत्रेष्टकाः पच्यन्ते तत् । जीवा० १२४ ।

**इसत्थं**–प्राकृतशैल्या इषुशास्त्रं–नागबाणादिदिव्यास्त्रादिसूचकं शास्त्रम् । जं० प्र० १३८ ।

**इसत्थे** । नि० चू० प्र० २६७आ ।

**इसि**–ऋषयः–गणधरव्यतिरिक्ताः शेषा जिनशिष्याः । मुनयः यतयो वा । सम० १५९ । त्रिकालदर्शिनः । राज० ४६ ।

**इसिगणिया** – ऋषिगणितदेशवास्तव्या देवानन्दादासी । भग० ४६० ।

**इसिचेव**–वाणवंतरपणपन्निदा । ठाणा० ८५ ।

**इसिज्झयं**–ऋषिध्वजं–मुनिचिह्नं रजोहरणादि । उत्त० ४७८ ।

**इसितडागं** – ऋषितडाकं, तोसलिनगरे सरः । बृ० द्वि० २५७ अ ।

**इसितलागं** । बृ० द्वि० १३६ अ ।

**इसिदासे**–ऋषिदासः, अनुत्तरोपपातिकदशानां तृतीयवर्गस्य तृतीयमध्ययनम् । अनुत्त० २ ।

**इसिदिण्णं**–ऋषिदिन्नम्, ऐरवते पंचमजिननाम । सम० १५३ ।

**इसिपब्भारा**–सिद्धशिलानाम । सम० २२ ।

**इसिभद्द**–आलभिकायां श्रमणोपासकविशेषः । भग० ५५० ।

**इसिभासिआ**–ऋषिभाषिताः । आव० ६१ ।

**इसिभासिय** । बृ० ३५ अ ।

**इसिभासियाइं**–ऋषिभाषितानि, उत्तराध्ययनादीनि । विशे० ९३१ । आव० ३०९ । ऋषिभाषितं–उत्तराध्ययनादि । सूत्र० ३८६ ।

**इसिया**–मुञ्जागर्भभूता शलाका । सूत्र० २७९ ।

**इसिवज्झा**–ऋषिवध्या–ऋषिहत्या । उत्त० ४४० ।

**इसिवाइंदा**–वाणमन्तरविशेषः । ठाणा० ८५ ।

**इसिवाइय**–ऋषिवादिकः, वाणमन्तरविशेषः । प्रज्ञा० ९५ । व्यन्तरनिकायानामुपरिवर्त्तिनो वाणव्यन्तरजातिविशेषाः । प्रश्न० ६९ ।

**इसिवालए**–वाणव्यंतरऋषिपालेन्द्रः । ठाणा० ८५ ।

**इसिवाले** – ऋषिपालः, उत्तरऋषिवादिकव्यन्तराणामिन्द्रः । प्रज्ञा० ९८ ।

**इसिवालो** – तोसलिवासिना क्रीत उज्जयिनीकुत्रिकापणाधिपः सुरः । बृ० द्वि० २६७ आ । पंचमवासुदेवपूर्वभवनाम । सम० १५३ ।

**इसिवुड्ढी**–ऋषिवृद्धिः, ब्रह्मदत्तस्याष्टाग्रमहिषीणां मध्ये सप्तमी राज्ञीनाम । उत्त० ३७९ ।

**इसी**–ऋषिः, विशिष्टतपश्चरणोपेतो महर्षिः । सूत्र० २९८ । दक्षिणऋषिवादिकव्यन्तराणामिन्द्रः । प्रज्ञा० ९८ । पश्यतीति अतिशयज्ञानी । औप० ७८ । सुविहितः । ओघ० २२२ ।

**इसु**–इषुः, शरः । दश० १८ । इषुः–ज्याविष्कंभयोर्वर्गविशेषमूलं विष्कंभाच्छोध्यं शेषार्धम् । तत्त्वा० ३–११ ।

**इसुसत्थं**–इषुशास्त्रम्, बाणकला । आव० ३९२ ।

**इस्सरियं**–ऐश्वर्यं–प्रभुत्वं, द्रव्यादिसमृद्धिर्वा । उत्त० ४७४ ।

**इस्सरे**–भूतेन्द्रविशेषः । ठाणा० ८५ ।

**इस्सा** – ईर्ष्या । आव० ४१० । परगुणासहनम् । उत्त० ६५६ ।

**इहत्थे**–इहार्थ ईहास्थो वा । ठाणा० २४८ ।

**इहरा**–इतरथा, अन्यथा । पिण्ड० १४१ । अन्यथा । आव० २६० ।

**इहलोगइया**–मणुस्सा । नि० चू० द्वि० ७१ आ ।

**इहलोकभते** – इहलोकभयं–मनुष्यादिकस्य सजातीयादन्यस्मान्मनुष्यादेरेव सकाशाद्यद्भयम् । ठाणा० ३८९ । यत्सजातीयाद् भयम् । सम० १३ । इहलोके भयं स्वभावाद् यत् प्राप्यते । आव० ४७२ । स्वजातीयात् मनुष्यादेर्मनुष्यादिकस्यैव भयम् । प्रश्न० १४३ ।

**इहलोगसंवेगणी**–संवेगनीकथायाः प्रथमभेदः, इहलोकः–मनुष्यजन्म, तत्स्वरूपकथनेन संवेगनी । ठाणा० २१० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**इहलोगासंसप्पओगे** -- इहलोकासंसाप्रयोगः, इहलोकः-मनुष्यलोकस्तस्मिन्नाशंसा-अभिलाषप्रयोगः। आव० ८३९।
**इहलोगो**-इहलोकः, मनुष्यलोकः। आव० ८४०।
**इहलोयभयं** - इहलोकभयं-मनुष्यादिसजातीयादन्यस्मान्मनुष्यादेरेव भयम्। आव० ६४५।
**इहलोयसंवेयणी**-इहलोकसंवेजनी, संवेजनीकथायास्तृतीयो भेदः। दश० ११२।
**इहेहे**-विप्साभिधानं सम्भ्रमख्यापनार्थं, यदि वा इहेति लोके इहेत्यस्मिन् मृत्यौ। उत्त० ४०९।

## ई

**ईइ**-ईतिः, गड्डरिकादिरूपा। जीवा० १८८। जं० प्र० २९।
**ईति** - दुरितविशेषः। भग० ८। धान्याद्युपद्रवकारिशलभमूषकादिः। जं० प्र० ६६।
**ईती**-ईतिः-धान्याद्युपद्रवकारी प्रचुरमूषकादिप्राणिगणः। सम० ६२।
**ईप्सितप्रतीप्सित**-व्यवहारविशेषः। विशे० ६२४।
**ईरियट्ठा**-ईर्याविशुद्ध्यर्थम्। ठाणा० ३६०।
**ईरिया**-गमनं। ठाणा० ३४३। ईरणमीर्या-गतिपरिणामः। उत्त० ५२४।
**ईरियावहिया**-ऐर्यापथिकीक्रिया, योगमात्रजः कर्मबन्धः। आव० ६१२। ईर्या-गमनं तत्प्रधानः पन्था-मार्ग ईर्यापथस्तत्र भवमैर्यापथिकं- केवलयोगप्रत्ययं कर्म्म। भग० ३८५। आव० ६४८, ६४९।
**ईरियावहियाकिरिया** - ईर्यापथिकक्रिया-यदुपशान्तमोहादेरेकविधकर्म्मबन्धनमिति। ठाणा० ३१६।
**ईरियासमिइ**- ईर्यासमितिः, ईर्यायां समितिः, ईर्याविषये एकीभावेन चेष्टनम्। आव० ६१५। रथशकटयानवाहनाक्रान्तेषु मार्गेषु सूर्यरश्मिप्रतापितेषु प्रासुकविविक्तेषु पथिषु युगमात्रदृष्टिना भूत्वा गमनागमनं कर्त्तव्यम्। आव० ६१५।
**ईर्याप्रत्ययं**-ईरणमीर्या-गमनं तेन जनितम्। सूत्र० १२।
**ईर्याप्रथप्राप्ता:**-योगसंयमप्राप्ताः। तत्त्वा० ९-४८।
**ईर्याविशुद्धि**-ईर्या-गमनं तस्या विशुद्धिर्युगमात्रनिहितदृष्टित्वम्। ठाणा० ३६०।
**ईलिकागतिः**-गतिविशेषः। प्रज्ञा० १५१। नंदी० १५३।
**ईली**-करवालविशेषः। प्रश्न। ४८।

**ईश्वरकारणिक:**-क्रियावादिद्वितीयविकल्पः। सम० ११०।
**ईश्वरकारणिन:**-क्रियावादिद्वितीयविकल्पः। ठाणा० २६८।
**ईश्वरपुत्र:**-इभ्यानां पुत्रः ईश्वरपुत्रः। नंदी २५८।
**ईश्वरवादिन:**। आव० ८१६।
**ईषत्कुटिला**-कुण्डलीभूता। जं० प्र० ११३।
**ईषा**-गात्रविशेषः। जं० प्र० ५५। राज० ९३।
**ईसक्खो**-ईशाख्यः, ईशनमैश्वर्यमात्मनः ख्याति अन्तर्भूतण्यर्थतया ख्यापयति-प्रथयति यः सः। जीवा० २१७।
**ईसत्थ**-इषुशास्त्रम्, धनुर्वेदः। आव० १२९। प्रश्न० ९७। धणुवेदादि-धनुर्वेदादि। नि० चू० तृ० २० आ।
**ईसत्थसत्थरहचरियाकुसलो** - इष्वस्त्रशस्त्ररथचर्याकुशलः। उत्त० २१४।
**ईसर** - ईश्वरः, भोगिकादिः अणिमाद्यष्टविधैश्वर्ययुक्तो वा। जं० प्र० १२२। लवणे उत्तरपातालकलशः। ठाणा० ४८०, २२६। प्रभुरमात्यादिः। अन्त० १६। स्फातिमान्। जीवा० ३६५। युवराजादिः भोगिको वा। प्रश्न० ९६। भोगिकादिः, अणिमाद्यष्टविधैश्वर्ययुक्तो वा। जीवा० २८०। बृ० तृ० २५५ आ। युवराजः, अणिमाद्यैश्वर्ययुक्तः। औप० ५८। प्रज्ञा० ३३०, ३२७। महेश्वरः। प्रश्न० ३३। प्रधानः, प्रभुः, स्वामी। आव० ५०२। भूतवादिकव्यन्तरेन्द्रः। प्रज्ञा० ९८। 'ईस ईश्वर्ये' ऐश्वर्येण युक्तः ईश्वरः, सो य गामभोतियादि। नि० चू० प्र० २७७ अ। गृहस्वामी। आचा० ४०३, ३७०। द्रव्यपतिः। उत्त० ३५३। युवराजो माण्डलिकोऽमात्यो वा, अणिमाद्यष्टविधैश्वर्ययुक्त ईश्वरः। ठाणा० ४६३। युवराजः सामान्यमण्डलिकोऽमात्यश्च। अनु० २३। युवराजः। भग० ३१८। युवराजादयः। भग० ४६३। औप० १४। युवराजा। राज० १२१।
**ईसरस्स**-पातालकलशः। सम० ८७।
**ईसरा**-ईश्वराः, युवराजाः, अणिमाद्यैश्वर्ययुक्ताः। जं० प्र० १९०।
**ईसरिए**-ऐश्वर्यः, मदस्य षष्ठं स्थानम्। आव० ६४६।
**ईसरी**-ईश्वरी, सोपारके श्राविकाविशेषः। आव० ३०४।
**ईसा** - ईशा, पिशाचकुमारेन्द्रस्याभ्यन्तरिका पर्षत्। जीवा० १७१। ईश्वरी-लोकपालाग्रमहिषीणां आद्या पर्षद्। ठाणा०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

१२७। ईर्ष्या–प्रतिपक्षाभ्युदयोपलम्भजनितो मत्सरविशेषः। आव० ६११।

**ईसाण**–ईशानः–ईशानावतंसकाभिधविमानोपलक्षितः द्वितीयकल्पः। अनु० ९२।

**ईसाणवडिंसए**–ईशानावतंसकः, ईशानकल्पमध्येऽवतंसकः। जीवा० ३९१।

**ईसाणवडेंसए**–ईशानकल्पेन्द्रविमानं। भग० २०३।

**ईसाणा**–ईशानदेवलोकनिवासिन ईशानाः, द्वितीयो देवलोकः। प्रज्ञा० ६९। पूर्वोत्तरदिक्कोणनाम। ठाणा० १३३।

**ईसाणी**–पूर्वोत्तरदिक्कोणनाम। भग० ४९३। ऐशानी ईशानकोण, पूर्वोत्तरमध्यवर्तिदिक्। आव० २१५।

**ईसाणे**–द्वितीयकल्पेन्द्रः। ठाणा० ८५। अहोरात्रस्यैकादशमुहूर्तनाम। सूर्य० १४६। एकादशमुहूर्तनाम। जं० प्र० ४९१। देवलोकविशेषः। आव० ११५।

**ईसिं**–ईषत्, मनाक्। जीवा० १८१।

**ईसिं ओट्ठवलंबिणी**–ईषदोष्ठावलम्बिनी, ईषत्–मनाक् ततः परम्परमास्वादतया झटित्येवाग्रतो गच्छति ओष्ठेऽवलम्बते–लगतीत्येवंशीला। प्रज्ञा० ३६४।

**ईसिं ओणयकाओ**–ईषदवनतकायः। आव० २१६।

**इसिं तंबच्छिकरणी**–ईषत्ताम्राक्षिकरणी, ईषत्–मनाक् ताम्रे अक्षिणी क्रियेते अनयेति। प्रज्ञा० ३६४।

**ईसिंपब्भारगओ** – ईषत्प्राग्भारगतः – ईषदवनतकायः। आव० २१६।

**ईसिं वोच्छेदकडुई** – ईषद्व्युच्छेदकटुका, ईषत्–मनाक् पानव्यच्छेदे सति तत ऊर्ध्वं कटुका एलादिद्रव्यसम्पर्कत उपलक्ष्यमाणतिक्तवीर्येति। प्रज्ञा० ३६४। जीवा ३५१।

**ईसि**–ईषत्, मनाक्। प्रज्ञा० ९१। आव० ८५७। ईषत्प्राग्भारानाम। प्रज्ञा० १०७। सिद्धशिलानाम। रत्नप्रभाद्यपेक्षया ह्रस्वत्वाद् ईषत्। ठाणा० ४४०। सम० २२।

**ईसिगि**–सरस्सछल्ली–त्वक्। नि० चू० तृ० ६३ आ।

**ईसिपंचहस्सक्खरुच्चारणद्धा**–अयोगिकालमानं। उत्त० ५७७। ईषदिति–स्वल्पः प्रयत्नापेक्षया पञ्चानां ह्रस्वाक्षराणां–अइउऋलृइत्येवंरूपाणामुच्चरणमुच्चारो भणनं तस्याद्धा–कालो यावता त उच्चार्यन्त। उत्त० ५९६।

**ईसिपब्भारा**–ईषत्प्राग्भारा, ईषद्भाराक्रान्तपुरुषवन्नता अन्तेष्विति। अनु० ९२। सिद्धशिलानाम, प्राग्भारस्य ह्रस्वत्वादीषत्प्रागभारा। ठाणा० ४४०। सम० २२। सिद्धशिला। आव० ६००।

**ईसी ओट्ठावलंबिणी**–ईषदोष्ठावलम्बिनी, ईषद् ओष्ठमवलम्बते–ततः परमतिप्रकृष्टास्वादगुणरसोपेतत्वात् झटिति परतः प्रयाति। जीवा० ३५१।

**ईसी तंबच्छिकरणी**–ईषत्ताम्राक्षिकरणी, किंचिन्नेत्ररक्तताकरणी। जीवा० ३५१।

**ईसीपब्भारगए**–ईषत्प्राग्भारगतः। आव० ६४८।

**ईसीपब्भारा**–ईषत्प्राग्भारा, सिद्धभूमिः। आव० ४४२। अष्टमभूमिः, अन्त्याभूमिः। आव० ६००। पञ्चचत्वारिंशयोजनलक्षायामविष्कम्भप्रमाणा शुद्धस्फटिकसंकाशा सिद्धशिला। प्रज्ञा० २२८। ईषद्–अल्पो रत्नप्रभाद्यपेक्षया प्राग्भारः–उच्छ्रयादिलक्षणो यस्यां सा। ठाणा० २५१। सिद्धशिला। प्रज्ञा० १०७। ईषत्–अल्पो योजनाष्टकबाहल्यपञ्चचत्वारिंशल्लक्षविष्कम्भात् प्राग्भारः पुद्गलनिचयो यस्याः सा। ठाणा० १२५।

**ईसेणिआ**–ईसिनिकाः। जं० प्र० १९१।

**ईहइ**–ईहते–पर्यालोचयति। आव० २६।

**ईहते**–पूर्वापराविरोधेन पर्यालोचयति। नंदी २५०।

**ईहा** – अन्वयधर्मघटनप्रवृत्तश्चापायाभिमुख एव बोधः। विशे० १७०। सदर्थविशेषालोचनं। भग० ३४४। सदर्थाभिमुखा ज्ञानचेष्टा। भग० ६३३। 'ईहचेष्टायाम्' ईहनमीहासतामन्वयिनां व्यतिरेकिणां चाऽर्थानां पर्यालोचना। विशे० २२६। वितर्कः। सम० ११५। अवग्रहादुत्तरकालमवायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखः–प्रायोऽत्र मधुरत्वादयः शङ्खादिशब्दधर्मा दृश्यन्ते न खरकर्कशनिष्ठुरतादयः शार्ङ्गादिशब्दधर्मा इत्येवंरूपो मतिविशेषः। नंदी १६८। ईहनमीहा–सदर्थपर्यायलोचनम्। नंदी १८६। ईहनमीहा–सतामर्थानामन्वयिनां व्यतिरेकाणां च पर्यालोचना। आव० १८। तदवगृहीतार्थविशेषालोचनम्। आव० ९। ईनहमीहा–सद्भूतार्थपर्यालोचनरूपा चेष्टा। प्रज्ञा० ३१०। नंदी १६८। किमिदमित्थमुतान्यथेत्येवं सदर्थालोचनाभिमुखा मतिः चेष्टा। औप० ९९। सदर्थपर्यालोचनात्मिका। दश० १२६। अवगृहीतार्थैकदेशाच्छेषानुगमनं। निश्चयविशेषजिज्ञासा। तत्त्वा०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

१ – १५। अवग्रहार्थगतासद्भूतसद्भूतविशेषालोचनम्। राज० १३०।

**ईहामिग**–ईहामृगः–वृकः। भग० ४७८। जं० प्र० ४३। जीवा० १९९। नाट्यविधिविशेषः। जीवा० २४६। जं० प्र० ४१५। आटव्यः पशुः। आचा० ४२३।

**ईहामिय**–ईहामृगाः–वृकाः। राज० २८।

## उ

**उंछं**–उञ्छं–भक्तं। ओघ० १५४। अन्यान्यवेश्मतः स्वल्पं स्वल्पमामीलनात्। उत्त० ६६७। जुगुप्सनीयं, गर्ह्यम्। सूत्र० १०८। भैक्ष्यम्। सूत्र० ७४। अल्पाल्पम्। प्रश्न० १११। छादनाद्युत्तरगुणदोषरहितः। आचा० ३६८। अज्ञातपिण्डोञ्छसूचकत्वादिति साधोरुपमानम्। दश० १८। एषणीयः। आचा० ३७६। उञ्छ्यते–अल्पाल्पतया गृह्यत इति, भक्तपानादिः। ठाणा० २१३।

**उंछवित्ती** – उञ्छवृत्ती–कणयाचनवृत्तिः। आव० ७०५। व्य० द्वि० ३५९ अ।

**उंछविही**–कणयाचनवृत्तिः। आव० ७०५।

**उंजणं**–अवमं(सं)तुअणं। दश० चू० ६९।

**उंजण**–उञ्जनम्। उत्सेचनम्। दश० २२८, १५४।

**उंजायणा**–वासिष्ठगोत्रस्य नामविशेषः। ठाणा० ३९०।

**उंजेज्जा**–उत्सिञ्चेत्। दश० १५४।

**उंडअ**–उण्डकः, पिण्डकः। ओघ० २९।

**उंडगं**–उन्दकम्, स्थण्डिलम्। दश० १५६।

**उंडत्तं**–उद्वेधः। ठाणा० ५२५।

**उंडया**–ग्रन्थयः। नि० चू० प्र० २४५ आ।

**उंडिं**–मुद्राम्। व्य० द्वि० १६७ आ।

**उंडिका**–मुद्रा। बृ० प्र० ३३ अ।

**उंडुअं**–उन्दुकम्–स्थानम्। दश० १७०। बृ० प्र० २०२ अ।

**उंडेरगा**। नि० चू० द्वि० १२५ आ।

**उंडेरय**–वटकाः। आव० ६८०।

**उंदर**–उन्दुरः। प्रश्न० ८।

**उंदु**–उन्दु–मुखम्। अनु० २९।

**उंदुर** – उन्दुरः–मूषकः। ओघ० १२६। आव० ६४१। उत्त० १०९। नि० चू० द्वि० २२ अ।

**उंदुरुक्कं**–मुखेन वृषभादिशब्दकरणम्। अनु० २९।

**उंदोइयाए**–अडोलिया, यवननृपतिदुहिता। बृ० प्र० १९१ अ।

**उंबर**–उदुम्बरः, बहुबिजकवृक्षविशेषः। प्रज्ञा० ३२। भग० ८०३। चतुर्थभवनवासिदेवस्य वृक्षः। ठाणा० ४८७। उम्बरः। व्य० द्वि० ३६२ अ। गिहेलुको। नि० चू० द्वि० ८३ आ।

**उंबरदत्त**–उदुम्बरदत्तः, दुःखविपाके सप्तममध्ययनम्। विपा० ७८। पाटलखण्डनगरे सागरदत्तसार्थवाहसुतः। विपा० ७४। जक्षविशेषः। विपा० ७४।

**उवस्सयसंकिलेसे**–द्वितीयः संक्लेशः । उपाश्रयो–वसतिस्तद्विषयः सङ्क्लेशः–असमाधिः उपाश्रयसङ्क्लेशः । ठाणा० ४८९ ।

**उवस्सित**–उपाश्रितः–द्वेषः । शिष्यकुलाद्यपेक्षा । ठाणा० ४४१ । द्वेषः, शिष्यप्रतीच्छककुलाद्यपेक्षा । ठाणा० ३१९ ।

**उवहडे** – उपहृतं – भोजनस्थाने ढौकितं भक्तमिति भावः । ठाणा० १४८ ।

**उवहतो**–अविसुद्धो । नि० चू० द्वि० ११६अ ।

**उवहय**–उपहतिः । उत्त० १४५ । सदोसं । नि० चू० तृ० ८१आ ।

**उवहयपरिणामो**–उपहतपरिणामः । आव० ५१३ ।

**उवहरइ**–उपहरति–विनाशयति । ज्ञाता० १९२ ।

**उवहाणं**–उपधानं–तपः । सूत्र० ६५, ६९, ७५ । तपश्चरणम् । सूत्र० २५१ । अनशनादिकं तपः । सूत्र० ५८ । आगमोपचाररूपमाचाम्लादि । उत्त० १२८ । गुणोपष्टम्भकारि । प्रश्न० १५७ । उच्छीर्षकम् । बृ० द्वि० २२०अ । उपधानं–करणम् । व्य० प्र० ५०आ । स्थगनम् । व्य० द्वि० ५आ । प्रायश्चित्तम् । व्य० द्वि० १९५अ । विहितशास्त्रोपचारः । उत्त० ६५६ । तपः । ठाणा० ४४५ । उपधानं–तपः । सम० ५७ । ठाणा० ६५, १९५ । उपधीयते–उपष्टभ्यते श्रुतमनेनेति उपधानं–श्रुतविषयस्तपउपचारः । ठाणा० १८१ । विधानम् । सम० १२७ । उपदधातीत्युपधानं–उपकरोतीत्यर्थः । ओघ० ११३ । अङ्गानङ्गाध्ययनादौ यथायोगमाचाम्लादितपोविशेषः । उत्त० ३४७ ।

**उवहाणगं** – पूयादिपुन्नं सिरोवहाणं । नि० चू० द्वि० ६१अ । उपधानम् । ठाणा० २३४ । उपधानकं–अप्रतिलेखितदूष्यपञ्चके द्वितीयो भेदः । आव० ६५२ ।

**उवहाणपडिमा**–उपधानं–तपस्तत्प्रतिमोपधानप्रतिमा, द्वादश भिक्षुप्रतिमा एकादशोपासकप्रतिमाश्चेत्येवंरूपा । ठाणा० ६५ । सम० ९६ ।

**उवहाणवीरिए**–उपधानं–तपस्तत्र वीर्यं यस्य स उपधानवीर्यः–तपस्यनिगूहितबलवीर्यः । सूत्र० ६५ ।

**उवहाणसुयं** – उपधानश्रुतं – आचाराङ्गस्याष्टममध्ययनम् । उत्त० ६१६ । सम० ४४ । उपधानश्रुतं, आचारप्रकल्पे प्रथमश्रुतस्कन्धस्याष्टममध्ययनम् । आव० ६६० । प्रश्न० १४५ ।

**उवहारं**–उपहारः । आव० १९० । बलिः । आव० ६९८ ।

**उवहारा**–बलिमादिया । नि० चू० प्र० २६९अ ।

**उवहारियं**–अवधारितं–निर्णीतम् । आव० ६३५ ।

**उवहि**–उपदधातीति उपधिः –उप – सामीप्येन संयमं धारयति पोषयति चेत्यर्थः । स च पात्रादिरूपः । ओघ० १२ । उपकरणम् । उत्त० ५८८ । वर्षाकल्पादिः । उत्त० ३५८ । उपकरणमाभरणादिद्रव्यतो, भावतस्तु छद्मादि येनात्मा नरक उपधीयते । उत्त० ४६३ । उपधिः–संस्तारकादिः । ओघ० ८० । रजोहरणादिः । ठाणा० ३१७ । उपधीयते–सङ्गृह्यत इति उपधिः । आचा० १८० । आगमोक्तं वस्त्रादिः । दश० १९९ । पात्रनियोगादिः । व्य० प्र० २३७ अ । उपधिः–वस्त्रादिः । प्रश्न० १२४ । उपधीयते–ढौक्यते दुर्गतिं प्रत्यात्मा येनासावुपधिः–माया, अष्ट-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रकारं वा कर्म । सूत्र० ६८ । उपकरणम् । आव० ५६८ । प्रज्ञा० २९१ । प्रश्न० ३९ । उपदधातीति उपधिः । ओघ० २०७ । माया । प्रश्न० २८ । औधिकः । प्रश्न० १५६ । माया । सूत्र० १०३ । उपदधातीति उपधिः–उप–सामीप्येन संयमं धारयति पोषयति चेति पात्रादिरूपः । ओघ० १२ । आव० ६६१ । उपधीयते येनासावुपधिः – वञ्चनीयसमीपगमनहेतुर्भावः । भग० ५७२ । उपधिः–उपकरणम् । पिण्ड० १२ । कषायः । दश० ७६ । उवकरणं । नि० चू०प्र० ६४ आ ।

**उवहिअसुद्धं**–उपधिना–मायया अशुद्धं–सावद्यं उपध्यशुद्धं, अधर्मद्वारस्यैकोनत्रिंशत्तमं नाम । प्रश्न० २६ ।

**उवहिए**–उपधिकः–मायित्वेन प्रच्छन्नचारी । ज्ञाता० ८१ । उपहितः – प्रक्षिप्तः–प्राप्तः । भग० १०० । उपहितानि–गुरोराहाराद्यर्थं ढौकितानि । विशे० ४४० ।

**उवहिओ**–अधिकज्ञानाद्यर्थकः सन् गुरुषु बहुमानपरः । व्य० प्र० २३६अ ।

**उवहिय**–उपहितः–क्षिप्तः । विशे० ९४३ । औपधिकः–मायाचारी । प्रश्न० ३० ।

**उवहिसंकिलेसे**–प्रथमसङ्क्लेशः । उपधीयते – उपष्टभ्यते संयमः संयमशरीरं वा येन स उपधिः–वस्त्रादिस्तद्विषयः सङ्क्लेशः–असमाधिः । ठाणा० ४८९ ।

**उवहिसंभोग**–उपधेः संभोगः उपधिसंभोगः । व्य० द्वि० ११९ आ ।

**उवही**–उवधिः–परवंचनाभिप्रायः । बृ० तृ० ४६ आ । नि० चू० प्र० २८९ आ ।

**उवाइ**–उत्लावकप्रधाना विद्याः । विशे० ९८२ ।

**उवाइक्कम्म**–उपातिक्रम्य–सम्यक् परिहृत्य । आचा० ३५६ ।

**उवाइणावित्तए** – उपानाययितुं, संप्रापयितुम् । बृ० तृ० ११४ आ । उपादापयितुं ग्राहयितुमित्यर्थः । ज्ञाता० १७७ ।

**उवाइणावित्ता**–उपादापय्य–प्रापय्य । भग० २९२ ।

**उवाइणित्ता**–उपनीय–अतिवाह्य । आचा० ३६५ ।

**उवाइति**–उपयाचते । आव० ४०४ ।

**उवाईय**–उपादितं–उपभुक्तम् । आचा० १०८ ।

**उवाईयसेसेण**–उपादितं–उपभुक्तम् , तस्य शेषमुपभुक्तशेषम् । आचा० १०८ ।

**उवाए**–उपायः–अप्रतिहतलाभकारणम् । ज्ञाता० ३४ ।

**उवाओ**–अवपातः । गर्त्तः । आचा० ३३८ । उपायः । आव० ४१४ ।

**उवागच्छति**–पविसति । नि० चू० प्र० २३० अ ।

**उवागच्छिज्जा**–उपागच्छेयुः–अतिथयो भवेयुः । आचा० ४०३ ।

**उवागमण**–उपागमनं–स्थानम् । आचा० ३७५ ।

**उवात**–अवपातः । सेवा । ठाणा० १२९, ५१६ । ज्ञाता० ४ ।

**उवातिणा**–नयति । नि० चू० द्वि० २२ आ ।

**उवातियं** । नि० चू० द्वि० १४४ अ ।

**उवातिया**–उपयाचितम् । नि० चू० प्र० ३५१ आ ।

**उवाते**–उपायः–उपेयं प्रति पुरुषव्यापारादिका साधनसामग्री स यत्र द्रव्यादावुपेये अस्तीत्यभिधीयते यथैतेषु द्रव्यादिविशेषेषु साधनीयेष्वस्त्युपायः, उपादेयता वाऽस्य यत्राभिधीयते तदाहरणमुपायः । आहरणस्य द्वितीयो भेदः । ठाणा० २५३ ।

**उवातो**–आणानिद्देसो । दश० चू० १३९ ।

**उवादानं**–उपादानं–आयः, हेतुः । विशे० ५४३ ।

**उवादिणावेत्ता**–उपादाय–गृहीत्वा, आक्रम्य । सूत्र० २३४ ।

**उवादीयमाणा**–उपादीयन्ते–कर्मणा बध्यन्ते । आचा० ७८ ।

**उवाय**–खड्डा । दश० चू० ७४ । उपायः – उदाहरणस्य द्वितीयो भेदः । ३५ । एकान्तमृदुभणनादिलक्षणः । दश० २४७ । उप–सामीप्येन (आयः) विवक्षितवस्तुनोऽविकललाभहेतुत्वाद्वस्तुनो लाभ एवोपायः–अभिलषितवस्त्ववाप्तये व्यापारविशेषः । दश० ४० । उपार्जनहेतुः । उत्त० ६३१ ।

**उवायकारी**–उपायकारी–सूत्रोपदेशप्रवर्त्तकः । सूत्र० २३४ ।

**उवायकिरिया**–उपायक्रिया–यद्द्रव्यं येनोपायेन क्रियते सा । सूत्र० ३०४ ।

**उवायणं**–अवपातयतो–भ्रंशतोऽकुर्वतः । व्य० प्र० २९अ ।

**उवायवं**–अवपातवान्–वन्दनशीलः, निकटवर्त्ती वा । दश० २५३ ।

**उवारियालेणे** – चमरचञ्चाबलीचञ्चाभिधानराजधान्योर्मध्यभागे तद्भवनयोर्मध्योन्नताऽवतरत्पार्श्वपीठरूपे अवतारिकलयने । सम० ३१ ।

**उवालंभ**–उपालम्भनं उपालम्भो–भङ्ग्यन्तरेणानुशासनमेव स यत्राभिधीयते सः । आहरणतद्देशे द्वितीयो भेदः । ठाणा० २५३ । उपालम्भः–इयमेवानौचित्यप्रवृत्तिप्रतिपादनगर्भा । ठाणा० १५५ । सपिपासशिक्षारूप उपालम्भः । बृ० प्र० १५०आ । सानुनयोपदेशप्रदानम् । व्य० प्र० ११७ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उपालम्भः उपालम्भः-भंग्यैव विचित्रं भणनम् । दश० ४६ ।

**उवालियइ**-उपलीयते । आचा० ३६५ ।

**उवासंतर**-अवकाशान्तरं-आकाशविशेषः, अवकाशरूपान्तरालं वा । भग० ७७ ।

**उवासंतराति** । ठाणा० ८६ ।

**उवासंतरे**-द्वयोरन्तरमवकाशान्तरम् । भग० २७२ । ठाणा० ४३२ ।

**उवासग**-उपासकः-श्रावकः । आव० ६४६ । नि० चू० द्वि० २५अ । सम० ११९ । साधू चेइए वा पोसहं उवासतो उवासगो भवति । नि० चू० द्वि० १२१आ । उपासते-सेवन्ते यतीनित्युपासकाः-श्रावकाः । उत्त० ६१३ ।

**उवासगदसा**-उपासकानां-श्रमणोपासकानां सम्बन्धिनोऽनुष्ठानस्य प्रतिपादिका दशाः-दशाध्ययनरूपा उपासकदशाः । उपा० १ । दश० ४७ ।

**उवासणा**-उपासना-नापितकर्म । आव० १२९ ।

**उवासमाणा**-रात्रिजागरणात्तदुपासनां विदधानाः । ठाणा० ३५३ ।

**उवासय**-उपासकः । दश० ४७ ।

**उवाहणं**-उपानत् । आव० ३०५, ३४१ ।

**उवाही**-उपाधीयते-व्यपदिश्यते येनेत्युपाधिः-विशेषणं स उपाधिः । आचा० १५६ ।

**उविच्च**-उपेत्य स्वप्रवृत्त्या । उत्त० ३९१ ।

**उविद्धो**-अवबद्धः । आव० ३५१ ।

**उविय**-परिकर्मितम् । ज्ञाता० २३ ।

**उवीलगो**-आलोययं गूहंतं जो महुरादिवयणपओगेहिं तहा भणइ जहा सम्मं आलोएति सो उवीलगो । नि० चू० तृ० १२८आ ।

**उवीलणं**-निश्चयम् । नि० चू० प्र० १४२अ । अवपीडना, बन्धनविशेषः । ज्ञाता० २३२ ।

**उवीलेमाणे**-अवपीलयन्-बाधयन् । विपा० ३९ ।

**उवेक्खेज्जा**-उपेक्षेत-अवधीरयेत् । उत्त० ११२ ।

**उवेक्खेयव्वो**-उपेक्षितव्यः । आव० ६४१ ।

**उवेच्च**-उपेत्य, आकुट्टिकया । बृ० द्वि० १३९आ ।

**उवेहमाण**-उपेक्षमाणः-अकुर्वन् । आचा० १५६ । परीषहोपसर्गान् सहमान इष्टानिष्टविषयेषु वोपेक्षमाणो माध्यस्थ्यमवलम्बमानः । आचा० ४३० । उत्प्रेक्षमाणः-अवगच्छन् । आचा० २१२ । पर्यालोचयन् । आचा० २२४ ।

**उवेहा**-उपेक्षा-उप-सामीप्येनेक्षा, अवधीरणायां वर्त्तते । ओघ० ११४ ।

**उवेहे**-उपेक्षेत-औदासीन्येन पश्येत् । उत्त० ९१ ।

**उवट्टंतो**-अवपतन् । आव० २०३ ।

**उव्वट्टइ**-उद्वर्त्तयति-म्रक्षिततैलापनयनं करोति । जं० प्र० ३९४ ।

**उव्वट्टण**-उद्वर्त्तनं-तत्प्रथमतया वामपार्श्वेन सुप्तस्य दक्षिणपार्श्वेन वर्तनम् । आव० ५७४ । अपवर्त्तना । विशे० १००६ । उद्वर्त्तना-नारकतिर्यगेकेन्द्रियेभ्यो निर्गमः । आव० ५३३ । उद्वर्त्तनं-लोठनम् । पिण्ड० १६४ । पङ्कापनयनलक्षणम् । दश० ११७ ।

**उव्वट्टणट्ठ**-उद्वर्त्तनार्थं-उद्वर्त्तननिमित्तम् । दश० २०६ ।

**उवट्टयं**-उद्वर्त्तकं-चूर्णपिण्डम् । जं० प्र० ३९४ ।

**उव्वट्टा**-उद्वृत्ताः । प्रज्ञा० ३९७ ।

**उव्वट्टिताणि**-उद्वर्त्तितानि । आव० ९८ ।

**उव्वट्टिया**-उद्वर्त्तिता-च्याविता । पिण्ड० १२३ ।

**उव्वट्टेति**-एक्कसिं उव्वट्टेति । नि० चू० प्र० ११६आ ।

**उव्वट्टो**-उद्वृत्तः । आव० १७३ ।

**उव्वणवेसो**-उल्बणवेषः । ओघ० १४६ ।

**उव्वण्णो**-उत्कंठितः । व्य० द्वि २०३आ ।

**उव्वत्तंतो**-उद्वर्तयन् । आव० ३१३ । ओघ० ८४ ।

**उव्वत्तणं**-उद्वर्तनम्-मार्गपरावर्त्तनं । बृ० तृ० १२९आ । उत्ताणयस्स पासल्लियकरणं । नि० चू० प्र० २११अ । उद्वर्तते-यतो व्रजस्ततो याति । ओघ० ४७ ।

**उव्वत्तणा**-परावत्तणाकुंचणपसारणा कायव्वा । नि० चू० प्र० ६०अ ।

**उव्वत्तमाणे**-अपवर्तयन् । आचा० ३४३ ।

**उव्वत्ता**-जं पाडिहारियणिद्दिज्जं तं । नि० चू० प्र० २२५आ ।

**उव्वत्तिया**-तेणेव अगणिनिक्खित्तं ओयत्तेऊण एगपासेन देति । दश० चू० ८० ।

**उव्वत्तेहि**-उद्वर्त्तय । आव० ३५८ ।

**उव्वरं**-अतिप्रशस्यम् । व्य० द्वि० ४२१आ ।

**उव्वरए** । बृ० द्वि० ६२अ ।

**उव्वरग**-अपवरकम् । आव० ६२२ । नि०चू०प्र० १७४अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**उव्वरति**-उद्धरति। आव० ८५९।

**उव्वरयं**-अपवरकम्। आव० ५६१।

**उव्वरिअ**-उद्वरितं। यदधिकं जातम्। ओघ० १८८। अतिरिक्तम्। ओघ० १८६।

**उव्वरियं**-उद्धरितम्। पिण्ड ७९। अशनादेः शेषभागः। आव० ८५९।

**उव्वरो**-उद्वरः-घर्मोपतापः। बृ० द्वि० २९३अ।

**उव्वलणं**-उद्वलनं, अभ्यङ्गनम्। बृ० द्वि० २१९अ।

**उव्वलणेहि**-उद्वेलनानि-देहोपलेपनविशेषाः। ज्ञाता० १८३।

**उव्वसिए**-उद्वसितः-उत्थितः। ओघ० ४९।

**उव्वसिय**-उद्वस्य (उदुष्य)। आव० ७१।

**उव्वाओ**-श्रान्तः। नि० चू० प्र० १६०अ।

**उव्वाण**-उद्वानं-किञ्चित्सस्निग्धं। ओघ० १७१।

**उव्वाता**-परिश्रान्तः। बृ०द्वि० ८०आ। व्य०द्वि० १५७अ।

**उव्वाया**-उद्वाताः-अतीवपरिश्रान्ताः। बृ०प्र० २४३आ। परिश्रान्ताः। व्य० द्वि० २०२आ।

**उव्वालना**-उद्वालना, निष्काशना। बृ० द्वि० २५०अ।

**उव्वासिअ**-उद्वासितः-शोषितः। ओघ० १७४।

**उव्वासेइ**-उपहसति। आव० ६६९।

**उव्विग्ग**-उद्विग्नं-खिन्नम्। भग० १६६। संजातभयः। विपा० ४३। उद्विग्नाः-अथ पुनर्नानेन सार्द्धं युद्धयामहे इत्यपुनःकरणाशयवन्तः। जं० प्र० २३९। उद्वेगवान्। प्रश्न० ५२।

**उव्विद्ध**-उद्विद्धं-ऊद्ध्र्वम्। औप० ३। उद्विद्धं-उण्डम्। ज्ञाता० २। ऊर्ध्वगतः। जं० प्र० १६४। उच्चा। आव० १८४। उन्मिताः, उच्चैस्त्वेन वा। अनु० १५८। उद्विद्धः-अत्यर्थमुच्चः। औप० ९। उच्चः। राज० ५।

**उव्विहंताई**-उत्पतन्ति। ज्ञाता० २३२।

**उव्विहइ**-ऊर्ध्वं विजहाति, ऊर्ध्वं क्षिपति। भग० २३०। उद्विजहाति-ऊद्र्ध्वं क्षिपति। ज्ञाता० १६८।

**उव्विहति**-उप्पाडेति। नि० चू० प्र० २५६आ।

**उव्विहामि**-नयामि। ज्ञाता० १३९।

**उव्विहिय**-उद्वूह्य-उत्प्रेर्य। भग० ६२८।

**उव्वीलए**-अपव्रीडकः-लज्जापनोदको यथा परः सुखमालोचयतीति। ठाणा० ४८६।

**उव्वीलणं**-अपकर्षणम्। उप० मा० गा० ७७।

**उव्वीहामि**-उच्चेष्यामि। नि चू० प्र० २०१अ।

**उव्वेयग**-उद्वेगकः-इष्टवियोगादिजन्यः उद्वेगः, उद्वेजको वा लोकोद्वेगकारी चौरादिर्वा। भग० १९८।

**उव्वेयण**-उद्वेजनं-चलनम्। भग० ४७१।

**उव्वेयणओ**-उद्वेजनकः-चित्तविप्लवकारी, उद्वेगकरः। प्रश्न० ५।

**उव्वेयणयं**-उद्वेगकृत्। महाप्र०।

**उव्वेला**-उद्वेला। आव० ५१४।

**उव्वेलियं**-उद्वेलितं, उत्सारितम्। बृ० द्वि० २५५आ।

**उव्वेलेंति**-उद्वेलयन्ति। आव० १८९।

**उव्वेलेउं**-उद्वेलयितुं, उद्वेष्टयितुम्। बृ० द्वि० २५७अ।

**उव्वेह**-उद्वेधः। अनु० १७१। जीवा० ३२२। उण्डत्वम्। ३२५, ३४३, २२७। राज० ९१। जं० प्र० २८४। सम० ९७। ठाणा० ५२५। बाहल्यम्। जं० प्र० ३२७। भुवि प्रवेशः। ठाणा० ६९। भूगतत्वम्। जं० प्र० २८२। भूमाववगाहः। ठाणा० ४७९। भूमिप्रवेशः। जं० प्र० ७२।

**उव्वेहलिया**-वनस्पतिविशेषः। भग० ८०४।

**उष्णः**-स्पर्शस्याष्टमो भेदः। प्रज्ञा० ४७३।

**उष्णरूपा**-योनिभेदः। आचा० २४।

**उस**-अवश्यायः। विशे० १०२९।

**उसक्कण**-रंधियपुव्वस्स उसक्कणं करेज्ज। नि०चू०प्र० १४२आ।

**उसक्कावेउ**-उत्ष्वष्क्य, अधःप्राप्य। आव० ६२१।

**उसक्को**-उत्कण्ठुलः। नि० चू० तृ० ३६अ।

**उसगार**-मत्स्यविशेषः। प्रज्ञा० ४४।

**उसडा**-उत्सृता-उच्चाः। जं० प्र० ४४।

**उसण**-उष्णः-प्रतिकूलः। ठाणा० ४४४।

**उसण्णं**-लोअगपरिभोगं उसण्णं भण्णइ। नि० चू० द्वि० १५९अ।

**उसण्हसण्हिआओ**-अतिशयेन प्राबल्येन च श्लक्ष्णश्लक्ष्णिका उश्लक्ष्णश्लक्ष्णिका। अनु० १६३।

**उसभ**-ऋषभः, पञ्चदश कुलकरनाम। जं० प्र० १३२। भरतचक्रिपिता। आव० १६२। सम० १५२। वृषभः-भूषणविधिविशेषः। जीवा० २६९। ब्रह्मदत्तपत्न्याः शिलायाः पिता। उत्त० ३७९। समग्रसंयमभारोद्वहनाद् वृषभः। आदिजिनः। आव० ५०२। सम्प्रदायगम्यं द्रविडवंग-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जं० प्र० १०७। पट्टः। सम० १४९। परिवेष्टनपट्टः । ठाणा० ३५७ । प्रज्ञा० ४७२ ।

**उसभकण्ठो**-वृषभकण्ठः-वृषभकण्ठप्रमाणो रत्नविशेषः । जीवा० २३४ ।

**उसभकूड**-ऋषभकूटः, जम्बूद्वीपे उत्तरार्द्धभरते पर्वतः । जं० प्र० ८७। आव० १५१ ।

**उसभज्झया**-वृषभध्वजाः-वृषभचिह्नोपेता ध्वजाः। जीवा० २१५ ।

**उसभनाराय**-ऋषभनाराचं-यत्पुनः कीलिकारहितं संहननं तत् । प्रज्ञा० ४७२ ।

**उसभदत्त**-नामविशेषः। भग० ६२०, ५३३, ५४९, ५५६, ५५७। आचा० ४२९ । नवमशते त्रयत्रिंशत्तमोद्देशकेऽभिहितः। भग० ४७५। ऋषभदत्तः-इषुकारनगरे गाथापतिः । विपा० ९५ । जम्बूस्वामिनः पिता। नि०चू०द्वि० २९अ।

**उसभपुरं**-ऋषभपुरं, द्वितीयनिह्नवोत्पत्तिस्थानम् । विशे० ९३४ । धनावहराजधानी । विपा० ९४ । राजगृहस्यापरनाम । आव० ३१५ । नगरविशेषः । उत्त० १०४। राजगृहम् । ठाणा० ४१४। जीवप्रदेशप्ररूपकनिह्नवोत्पत्तिस्थानम्। आव० ३१२ ।

**उसभसिरि**-श्रीऋषभः । सम० १०६ ।

**उसभसेण**-मुनिसुव्रतजिनस्य भिक्षादाता । सम० १५१ । ऋषभस्वामिनः प्रथमगणधरः । सम० १५२ । बृ० प्र० २५४अ । ऋषभसेनः-भरतपुत्रः । आव० १४९ ।

**उसभा**-ऋषभा-शाश्वतप्रथमप्रतिमानाम । जीवा० २२८ ।

**उसवियं**-उवसामियं । नि० चू० प्र० २९४अ ।

**उसह**-ऋषभः, संयमभारोद्वहनादृषभ इव ऋषभः, वृषभो वा इति संस्कारः, तत्र वृषभ इव वृषभ इति वा, वृषेण भातीति वा वृषभः । जं० प्र० १३५ ।

**उसहकूडप्पभाइं**-ऋषभकूटप्रभाणि, ऋषभकूटाकाराणि । जं० प्र० ८८ ।

**उसहकूडे**-ऋषभकूटः । जं० प्र० २५० ।

**उसहच्छाया**-वृषभच्छाया-छायायाः सप्तमो भेदः । प्रज्ञा० ३२७।

**उसहपुरं**-ऋषभपुरं-नगरविशेषः । उत्त० १०५।

**उसा**-त्रेहो । नि० चू० द्वि० ८३अ ।

**उसिण**-तावितं तं चेव ववगयजीवं, एक्कसिं धोवणं । नि० चू० द्वि० ११८आ । निदाघादितापात्मकम् । उत्त० ८२ । उष्णः-धर्मः । ठाणा० २८७। आहारपाकादिकारणं वह्नया-द्यनुगतः । अनु० ११०।उष्णो मार्दवपाककृत् ।ठाणा० २६। उष्णः-अप्रासुकम् । दश० २०६ ।

**उसिणपरितावे**-उष्णपरितापः-उष्णं-उष्णस्पर्शवद् भूशिलादि तेन परितापः । उत्त० ८९ ।

**उसिणब्भूए**-अस्वाभाविकमौष्ण्यं प्राप्तः । भग० १७५ ।

**उसिणोदए**-उष्णोदकं-स्वभावत एव क्वचिन्निर्झरादावुष्णपरिणामम् । बादराप्कायभेदः । प्रज्ञा० २८ ।

**उसिणोदगं**-उष्णोदकं-क्वथितोदकम् । दश० २२८ । उद्वृत्तत्रिदण्डम् । पिण्ड० १७ ।

**उसिणोदगवियडेण**-उष्णोदकविकटेन- उष्णोदकेनाप्रासुकेनात्रिदण्डोद्वृत्तेन पश्चाद्वा सचित्तीभूतेन । आचा० ३४२ ।

**उसिय**-उत्सृतानि-लम्बमानानि । राज० ६४ ।

**उसीर**-उशीरं-वीरणीमूलम् । ज्ञाता० २३२। जीवा० १९१। राज० ३४ । मूलविशेषः। जीवा० १३६। ओशीरं-वीरणीमूलम् । प्रश्न० १६२ ।

**उसीसदुवणं**-सीसस्स समीवं उवसीसं, सीसस्स वा उक्खंभणं उसीसं दुवणं-णिक्खेवो । नि० चू० प्र० २४७अ ।

**उसु**-इषुः-बाणः । भग० ९३, २३० । शरपत्रफलादिसमुदायः । भग० २३० ।

**उसुअ**-इषुकः-इषुकाकारमाभरणं, तिलकं वा। पिण्ड०१२४।

**उसुआर**-इषुकारः-राजपुत्रविशेषः । उत्त० ३९४ ।

**उसुआरपुरं**-इषुकारपुरं-नगरविशेषः । उत्त० ३७५ ।

**उसुकारिज्जं**-इषुकारीयं-उत्तराध्ययने चतुर्दशमध्ययनम् । उत्त० ३९३ ।

**उसुकाल**-उक्खलं, उदूखलं । नि० चू० द्वि० ८३आ।

**उसुगारपव्वय**-पर्वतविशेषः । ठाणा० ८० ।

**उसुत्तियल्लयं**-जेण वा कट्ठाइ संचालेति तं सविसं उसुत्तियल्लयं । नि० चू० प्र० ११६आ ।

**उसुद्धसरीरो**-मलपंकियसरीरो उसुद्धसरीरो भन्नति । नि० चू० द्वि० ६५अ ।

**उसुमट्टिता**-कुट्टिया पुणो मट्टियाए सह कुट्टिज्जंति एस। नि० चू० तृ० ६४अ ।

**उसुयार**-इषुकारः-नगरविशेषः, ऋषभदत्तगाथापतिस्थानम्। विपा० ९५ । इषुकारपुरनृपतिः । उत्त० ३९५ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**उसुयारपुरं**-इषुकारपुरं, कुरुजनपदे नगरं, इषुकारराजधानी। उत्त० ३९५।

**उसुयारिज्जं**-उत्तराध्ययने चतुर्दशमध्ययनम्। सम० ६४।

**उसू**-इषुः-शरः। सिद्धिगमने दृष्टान्तः। आव० ४४२। तिलगो। नि० चू० द्वि० ९५अ।

**उसूयालं**-उदूखलम्। आचा० ३९७।

**उसे**-ऊषः-पांशुक्षारः। दश० १७०।

**उस्सओ**-उच्छ्रयः भावोन्नतत्वम्। अहिंसायाः पञ्चचत्वारिंशत्तमं नाम। प्रश्न० ९९।

**उस्सकइ**-उत्ष्वष्कते-तदाकारभावमात्रधारणतस्तत्प्रतिबिम्बमात्रधारणतो वोत्सर्पतीत्यर्थः, कृष्णलेश्यातो हि नीललेश्या विशुद्धा ततस्तदाकारभावं तत्प्रतिबिम्बमात्रं वा दधाना सती मनाक् विशुद्धा भवतीत्युत्सर्प्पतीति। प्रज्ञा० ३७२।

**उस्सक्कण**-उत्ष्वष्कणं-परतः करणम्। पिण्ड० ९१।

**उस्सग्गनिवाइयाण**-उत्सर्गपातिनामुत्सर्गेण संयममनुपालेयतां यासाम्। व्य० द्वि० ४२९अ।

**उस्सग्गो**-उत्सर्गः-उपयोगः। ओघ० १५५। परिष्ठापनम्। ओघ० १३८। कायोत्सर्गः। आव० ७८२। उवओगं, काउस्सग्गो। नि० चू० द्वि० १६४अ। पइण्णकहा। नि० चू० प्र० २४०अ। कारणनिरपेक्षं सामान्यस्वरूपम्। बृ० तृ० ९७आ।

**उस्सण्णं**-लोअगपरिभोगं उस्सण्णं भण्णइ। नि० चू० द्वि० १५९अ। उस्सण्णं एकान्तेनैव अलक्षणयुक्ता बोंदि सरीरमित्यर्थः। नि० चू० द्वि० ८५आ। उत्सन्नं-बाहुल्यतः। औप० ८६। उत्सन्नं-अनुपरतम्। आव० ५९०।

**उस्सण्णदोस**-उत्सन्नदोषः-अनुपरतं बाहल्येन प्रवर्त्तते इति। आव० ५९०।

**उस्सण्णपए**-उत्सन्नपदे-प्रभूतपदे। व्य० प्र० ९३अ।

**उस्सण्णा**-अवसन्नाः-पङ्क इव निमग्नाः। प्रश्न० ६९।

**उस्सण्णो**-बहुतरगुणावराही। नि० चू० द्वि० ९०आ।

**उस्सण्हसण्हिआ**-उत्तरप्रमाणापेक्षया उत्-प्राबल्येन श्लक्ष्णश्लक्ष्णिका उच्छलक्ष्णश्लक्ष्णिका। जं० प्र० ९४।

**उस्सण्हसण्हिया** - व्यावहारिकपरमाणुपुद्गलानां समुदायाः-द्व्यादिसमुदायास्तेषां समितयो-मीलनानि तासां समागमः-परिणामवशादेकीभवनं समुदयसमितिसमागमस्तेन या परिणाममात्रेति गम्यते, सा एकाऽत्यन्तं श्लक्ष्णा श्लक्ष्णश्लक्ष्णा सैव श्लक्ष्णश्लक्ष्णिका उत्-प्राबल्येन श्लक्ष्णश्लक्ष्णिका उत्श्लक्ष्णश्लक्ष्णिका। भग० २७५।

**उस्सन्नं**-प्रायशः। आव० ५६८। अविरुद्धं। नि० चू० द्वि० ७०अ।

**उस्सन्नकयाहारो**-प्रायशोऽकृताहारः। आव० ५६८।

**उस्सप्पिअ**-उत्सर्पिता वस्त्र्युत्सर्पणेन। जं० प्र० १०२।

**उस्सप्पिणी**-सागरोपमाणां दशकोटीकोट्य एव दुष्षमदुष्षमारकक्रमेणैकोत्सर्प्पिणी। जीवा० ३४५। उत्सर्पति-वर्धते आरकापेक्षया वर्धयति (वा) क्रमेणायुरादीन् भावानित्युत्सर्पिणी। जं० प्र० ८९। उत्सर्प्पिणी-दशसागरोपमकोटाकोटिमाना। अनु० १००। ठाणा० ८६। उत्सर्प्पति-वर्द्धतेऽरकापेक्षया उत्सर्प्पयति वा भावानायुष्कादीन् वर्द्धयतीति। ठाणा० २७।

**उस्सय**-यस्मिंश्च सत्यूर्ध्वं श्रयति जात्यादिना दर्पाध्मातः पुरुष उत्तानीभवति सः उच्छ्रायः-मानः। सूत्र० १८०।

**उस्सरति**-उत्सर्पति। आव० ३०३।

**उस्सवित्ता**-उद्धहुत्ताणि काऊण। दश० चू० ८०।

**उस्सविया** - संस्थाप्योच्चावचचैर्विश्रम्भजनकैरालापैर्विश्रम्भे पातयित्वा। सूत्र० १०६।

**उस्सा**-अवश्यायः-त्रेहः। अप्कायभेदः। प्रज्ञा० २८। रजन्यां यस्त्रेहः पतति। आचा० ४०।

**उस्साग**-यन्निर्विशेषणं क्रियते। उप० मा० गा० ४००।

**उस्साबिन्दूथिबुगो**-अवश्यायबिन्दुः। आव० ८४५।

**उस्सारिता**-उत्सारिता-समीपमागता। आव० ८४१।

**उस्सासनाम**-उच्छ्वासनाम-यदुदयवशादात्मन उच्छ्वासनिःश्वासलब्धिरुपजायते तत्। उच्छ्वासनिःश्वासयोग्यपुद्गलग्रहणमोक्षविषया लब्धिरुपजायते तत्। प्रज्ञा० ४७३।

**उस्सासविसा**-उच्छ्वासे विषं येषां ते उच्छ्वासविषाः। प्रज्ञा० ४६।

**उस्सासा**-उच्छ्वासः-मुखादिना वायुग्रहणम्। भग० ४७०।

**उस्सासो**-उच्छ्वासः। आव० ८४५।

**उस्साहे**-उत्साहः-श्रवणविषये मनस उत्कलिकाविशेषः। सूर्य० २९६।

**उस्सिंघइ**-उज्जिघ्रति, जिघ्रति। आव० ६७४।

**उस्सिंघणा**-उद्घ्राणम्। आव० ४२४।

**उस्सिंचण**-उद्र्ध्वं सेचनं उत्सेचनं-कूपादेः कोशादिनोत्क्षेपणम्। आचा० ४२। दृतौ वातस्य प्राबल्येन पूरणम्। आचा०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

७४, ३७९ ।

**उस्सिंचणाए**-उत्सेचनेन-अरघट्टघट्टीनिवहादिभिरुदञ्चनेन । उत्त० ५९९ ।

**उस्सिंचमाणे**-उत्सिञ्चन्-आक्षिपन् । आचा० ३४३ ।

**उस्सिंचिया**-उत्सिच्य-अतिभृतादुज्झनभयेन ततो वा दानार्थं तीमनादीनि दद्यात् । दश० १७५ ।

**उस्सिउस्सिओ**-उच्छ्रितोच्छ्रितः । आव० ७७९ ।

**उस्सिओदए**-उच्छ्रितोदकः-ऊर्ध्ववृद्धिगतजलः । भग० २८१ ।

**उस्सिट्टा**-उत्सृष्टा-प्रबलतया सर्वासु दिक्षु प्रसृता । प्रज्ञा०९९ ।

**उस्सित्तं**-उत्सिक्तं-अत्यर्थं जलाभिषेचनम् । प्रश्न० १२७ ।

**उस्सिन्न**-अस्विन्नम्-वह्न्युदकयोगेनानापादितविकारान्तरम् । दश० १८५ । उत्स्विन्नम्-मुण्डेरकादि । बृ० प्र० २६७ आ ।

**उस्सियं**-उच्छ्रितं-प्रख्यातम् । सूत्र०४०८ । उच्छ्रितं-उत्कटम् । सूर्य० २६२ । उत्सृतां, उच्छ्रित्येवोच्छ्रित्य-उत्तरोत्तरसंयमस्थानावाप्त्या तामुच्छ्रितामिव कृत्वा वा । उत्त० ३४१ । उत्सृतः-अपगतः । ज्ञाता० १०९ ।

**उस्सियनिसन्नओ**-उत्सृतनिषण्णः । आव० ७७२ ।

**उस्सियपडागं**-उच्छ्रितपताकम् । आव० ७०३ ।

**उस्सियफलिह**-उच्छ्रितं स्फटिकमिव स्फटिकं-अन्तःकरणं यस्य सः । ज्ञाता० १०९ ।

**उस्सीवेत्ता**-उत्सीव्य । आव० ४२१ ।

**उस्सुक**-उच्छुल्का-अविद्यमानशुल्कग्रहणम् । विपा० ६३ । उच्छुल्का-मुक्तशुल्का । भग० ५४४ । ज्ञाता० ४० ।

**उस्सुगो**-उत्सुकः । आव० ३०१ ।

**उस्सुत्तं**-सुत्तादवेतं । नि०चू०द्वि० २३आ । ऊर्ध्वं सूत्रादुत्सूत्रः, सूत्रानुक्तः । आव० ५७१ । आव० ७७८ ।

**उस्सुय**-उत्सुकः । ज्ञाता० १६१ ।

**उस्सूरं**-अकालं । नि०चू०तृ० १३६आ । ओघ० ९८ ।

**उस्सूरलंभो**-उत्सूरलाभः । आव० ८४३ ।

**उस्सूरीभूतं**-उत्सूर्यीभूतम् । आव० ८५२ ।

**उस्सूलय**-खातिका परबलपातार्थमुपरिच्छादितगर्त्ता वा । उत्त० ३११ ।

**उस्सेइमं**-पिष्टोत्स्वेदनार्थमुदकम् । आचा० ३४६ । मरहट्ठविसए उस्सइया दीवगा सीओदगे बुज्झंति, अहवा पिट्ठस्स उस्सेज्जमाणस्स हेट्ठा जं पाणियं तं । नि० चू० तृ० ६०अ ।

**उस्सेतिमामं**-जहा पिट्ठं पुढविकायभायणं आउकायस्स भरेत्ता मीसए अद्दहिज्जति मुहं से वत्थेण उहाडिज्जति, ताहे पिट्ठपयणयं रोट्टस्स भरेत्ता ताहे तीसे थालीए जलभरियाए उवरिं ठविज्जति ताहे अहोछिड्डेण तं पि ओसिज्जति हेट्ठाहुत्तं वा ठविज्जति तत्थ जं आमं तं उस्सेतिमामं भण्णति । नि० चू० द्वि० १२५ अ ।

**उस्सेतिमे**-उत्स्वेदेन निर्वृत्तं उत्स्वेदिमं-येन व्रीह्यादिपिष्टं सुराद्यर्थं उत्स्वेद्यते तत् । ठाणा० १४७ ।

**उस्सेहंगुल**-उच्छ्रयाङ्गुलं-अङ्गुलस्य द्वितीयो भेदः।प्रज्ञा०२९९। अनन्तानां सूक्ष्मपरमाणुपुद्गलानामित्यादिक्रमेणोच्छ्रयो वृद्धिनयनं तस्माज्जातं तत् । उत्सेधो-नारकादिशरीराणामुच्चैस्त्वं तत्स्वरूपनिर्णयार्थमङ्गुलमुत्सेधाङ्गुलम् । अनु० १५६,१६० ।

**उस्सेह**-उत्सेधः-उच्चत्वम् । सम० ११४ । उत्सेधः-शिखरम् । जीवा० २०४, ३६० । सर्वाग्रम् । जीवा० २२५ । उच्छ्रयः-शिखरम् । राज० ६२ ।

**उस्सेहपरिवुड्ढी**-उत्सेधपरिवृद्धिः-सर्वाग्रपरिवृद्धिः । जीवा० ३२३ ।

**उस्सोढुं**-उत्सोढ्य-असोढ्वा । व्य० प्र० १६४अ ।

**उहरिय**-पेढियमादिसु आरुभिउं ओआरेति, अथवा कायं उच्चं करेज्जा उक्कुज्जियडंडायतं तद्वद् गृह्णाति, कायं उड्ढं कृत्वा गृह्णाति उण्णमिय इत्यर्थः । नि० चू० तृ० ५९ अ ।

**उहसेइ**-अपहसति । आव० २१९ ।

## ( ऊ )

**ऊखा**-कुम्भी । प्रश्न० १७ ।

**ऊणं**-ऊनम्-वर्णादिभिर्हीनम् । सूत्रदोषविशेषः । आव० ३७४ । यद् व्यञ्जनाभिलापावश्यकैरसम्पूर्णं वन्दते, कृतिकर्मणि अष्टाविंशतितमो दोषः । आव० ५४४ ।

**ऊणगसयभागो**-ऊनशतभागः-शतभागोऽपि न पूर्यत इत्यर्थः । आव० ५२२ ।

**ऊणोअरिआ**-ऊनोदरस्य भाव ऊनोदरता । दश० २७ ।

**ऊणोयरिया**-अवमस्य-ऊनस्योदरस्य करणमवमोदरिका । भग० ९२१ ।

**ऊनं**-अक्षरपदादिभिरेव हीनमूनम् । हेतुदृष्टान्ताभ्यामेव हीनमूनम् । अनु० २६१ ।

**ऊयरिणिया** । नि० चू० प्र० ६१ आ ।

**ऊरणय**-ऊरणिका । आव० ६२३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**ऊरणिया**-ऊर्णिका । आव० ६२३ ।
**ऊरणी**-अविला । पिण्ड० ७१ ।
**ऊरु** । आचा० ३८ ।
**ऊरुगं**-ऊरुः । ओघ० १२५ ।
**ऊरुघंटा**-जङ्घाघण्टा । ज्ञाता० २३९ ।
**ऊरुयाल**-ऊरुदारः-ऊर्वोः-जङ्घयोर्दारो-दारणं ज्वालो वा ज्वालनं यः सः । प्रश्न० ५७ ।
**ऊरुयावल**-ऊरुकयोरावलनं ऊरुकावलः । प्रश्न० ५७ ।
**ऊर्ध्वलोकः**-शुभलोकः । जं० प्र० २४९ ।
**ऊर्ध्ववेदिका**-यत्र जानुनोरुपरि हस्तौ कृत्वा प्रत्युपेक्षते। वेदिकायाः प्रथमभेदः । ठाणा० ३६२ ।
**ऊर्ध्वस्थितः** । आचा० २९४ ।
**ऊर्ध्वोपविष्टा** । पिण्ड० १०५ ।
**ऊलेऊण**-आर्द्रीकर्तुं, जलेन भेतुम् । विशे० ६२७ ।
**ऊस**-उषो-यद्वशादूषरं क्षेत्रम्। प्रज्ञा० २७। ऊषरादिक्षेत्रोद्भवो लवणिमसम्मिश्रो रजोविशेषः । पिण्ड० ८ । क्षारमृत्तिका । उत्त० ६८९ । ओषः-क्षारमृत्तिका । आचा० ३४२ । अवश्यायः । ओघ० १३० ।
**ऊसड**-उत्सृतः, उच्चः । जीवा० २०० ।
**ऊसढं**-उच्छ्रितं वर्णादिगुणोपेतं ।आचा० ३३९। उत्सृतं-ऋद्धिमत्कुलम् । दश० १८६ । वर्णगन्धरसस्पर्शोपपेतम् । आव० ७२६ । उच्छ्रितं वर्णगन्धाद्युपेतम्। आचा० ३९०। उत्कृष्टम् । व्य० द्वि० १८९ अ। उच्चं । दश० चू० ८७।
**ऊसत्त**-उत्सक्तः-उपरिलग्नः । जं० प्र० ७६। ऊर्ध्वं सक्त उत्सक्तः-उल्लोचतले उपरिसंबद्धः। प्रज्ञा० ८६। जीवा. १६०, २२७ ।
**ऊसभूमी**-सिंधुविषये भूमिः । नि० चू० प्र० १६१ अ ।
**ऊसरणं**-उत्सरणं-आरोहणम् । विशे० ५३८ ।
**ऊसरदेस**-ऊषरदेशः । आव० ८३९ ।
**ऊसविए**- उत्सर्प्य- ऊसिविकऊणेत्यर्थः, ऊदूर्ध्वीकृत्य वा । भग० ९३ ।
**ऊसविय**-उच्छ्रितानि ।भग ५४१। उच्छ्रितं-ऊदूर्ध्वीकृतम्। ज्ञाता० १३९ ।
**ऊसवेइ**-उच्छ्रितं करोति । भग० १७५ ।
**ऊसवो**-जत्थ सामण्णभत्तविसेसो कज्जइ सो ऊसवो। नि० चू० द्वि० १६२ अ। जत्थ तं च उवसाहिज्जति जणो य अलंकिय विभूसितो उज्जाणादिसु मित्तादिजणपरिवुडो खज्जपेज्जादिणा उवललति। नि० चू० तृ० १४ आ। उत्सवः-शक्रोत्सवादिः। आव० १२९ ।
**ऊससंति**-उच्छ्वसन्ति-बाह्यक्रियां कुर्वन्ति । प्रज्ञा० २१९।
**ऊससिअं**-उच्छ्वसितं-उत्-ऊर्ध्वं प्रबलं वा श्वसितम् । आव० ७७९ ।
**ऊससिय**-उच्छ्वसनमुच्छ्वसितम् । अनक्षरश्रुतभेदः। विशे० २७४ । उच्छ्वसिता-उद्भिन्नाः। उत्त० ४८१ ।
**ऊससियरोमकूवो**-उच्छ्वसितरोमकूपः-उच्छ्वसिता इवोच्छ्वसिताः-उद्भिन्ना रोमकूपा-रोमरन्ध्राणि यस्यासौ। उत्त० ४८१ ।
**ऊसासनीसासे**-उच्छ्वासेन युक्तो निःश्वास उच्छ्वासनिःश्वासः-प्राणः । जं० प्र० ९० ।
**ऊसासपए**-उच्छ्वासपदं, प्रज्ञापनायाः सप्तमं पदम् । भग० १९ ।
**ऊसासा**-यावद्भिः समयैः पादो वृत्तस्य नीयते तावत्समया उच्छ्वासाः । ठाणा० ३९३ । उच्छ्वासाः। प्रज्ञा० २४६ । सङ्ख्येया आवलिका उच्छ्वासः। जीवा० ३४४। प्रज्ञापनायाः सप्तमं पदम्। प्रज्ञा० ६। सङ्ख्येया आवलिका उच्छ्वासः-अन्तर्मुखः पवनः । जं० प्र० ९० ।
**ऊसासेहि**-उच्छ्वासय-मारय । आव० ८१९
**ऊसिअ**-उच्छ्रितानि-लम्बमानानि । जं० प्र० ५० । प्रबलतया सर्वासु दिक्षु प्रसृता उत्सृता । जं०प्र०५३। जीवा० १७५। उच्छ्रितं-उत्कटम् । जं० प्र० ५२२ ।
**ऊसिए**-उच्छ्रितं-लम्बमानम् । जीवा० ३६१ ।
**ऊसिओदयं**-उच्छ्रत-ऊर्ध्व उदय-आयामो यत्र गमने तदुच्छ्रितोदयं, ऊर्ध्वपताकमित्यर्थः । भग० १८७ ।
**ऊसिता**-उत्सृता-प्रबलतया सर्वासु दिक्षु प्रसृता । जीवा० ३७९ । सूर्य० २६३ ।
**ऊसितोदग**-उच्छ्रितोदकः-उच्छ्रितमुदकं यस्मिन् सः । जीवा० ३२१ ।
**ऊसित्तो**-उपसिक्तः,अपत्योत्पादनसामर्थ्यविकलः, निर्बीजः। बृ० तृ० ९७आ । णो जस्स अवच्चं उप्पज्जति निब्बीओ सो। नि० चू० द्वि० ३१अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**ऊसिय**-उच्छ्रितं-ऊर्द्ध्वीकृतम् । भग० ५४१ । उच्छ्रितः-ऊर्ध्वीकृतः, उत्सृतो वा-अपगतः । राज० १२३ । उच्छ्रितं-ऊर्ध्वं नीतम् । ज्ञाता० १६ । उत्सृता-प्रबलतया सर्वासु दिक्षु प्रसृता । सम० १३९ । उच्छ्रितः-ऊर्द्ध्वीकृतः । जीवा० २४६ उत्सृतः । आव० ७७२ । उत्सृतं-लम्बमानम् । जीवा० २०५ । उच्छ्रितम्-उन्नतम् । ऊर्ध्वीकृतं, अपगतः, अपनीतः । भग० १३५ । नंदी ४६ । उच्छ्रितं-ऊर्द्ध्वम् । भग० १८७ ।

**ऊसियपडागं**-उच्छ्रितपताकम् । आव० ३०० ।

**ऊसियफलिह**-उच्छ्रितस्फटिकाः-उच्छ्रितमुन्नतं स्फटिकमिव स्फटिकं चित्तं येषां ते । मौनीन्द्रप्रवचनावाप्त्या परितुष्टमानसा इत्यर्थः । उच्छ्रितः-अर्गलास्थानादपनीयोर्द्ध्वीकृतो न तिरश्चीनः कपाटपश्चाद्भागादपनीत इत्यर्थः परिघः-अर्गला येषां ते उच्छ्रितपरिघाः, उच्छ्रितः-गृहद्वारादपगतः परिघो येषां ते उच्छ्रितपरिघाः । भग० १३५ । उच्छ्रितं स्फाटिकमिव स्फाटिकं-अन्तःकरणं यस्य सः । राज० १२३ ।

**ऊसिरं**-जीवाश्रयस्थानमित्यर्थः । नि० चू० द्वि० ६० आ ।

**ऊसीसयं**-उच्छीर्षकम् । आव० १२४ ।

**ऊसूरं**-वेलातिक्रमः । ओघ० १४२ ।

**ऊसूरओ**-उत्सूरः । आव० १०३ ।

**ऊह** - सम्भवत्पदार्थविशेषास्तित्वाध्यवसाय ऊहस्तर्कः-एवमेवं चैतत्स्यात् । आचा० २३७ ।

**ऊहा**-बुद्धिः । दश० १२५ । ओघमात्रसंज्ञा । विशे० २८१ । स्वतर्कबुद्धिः । आव० ३२४ । स्ववितर्कात्मिका । उत्त० १८१ ।

**ऊहिय**-ऊहितः-ज्ञातः । आव० ७२१ ।

## ऋ

**ऋक्षाः**-अच्छाः । जीवा० ३८ ।

**ऋजुप्रज्ञत्वं**-मध्यमजिनयतीनां विशेषणम् । आव० ७९ ।

**ऋजुवक्रजडत्वं** । आव० ७९ ।

**ऋजुश्रेणिप्रतिपन्नः**-यो भवोपग्राहिकर्मजालं क्षपयित्वाऽस्पृशद्गत्या सिद्ध्यतीति । आव० ४४१ ।

**ऋजुसूत्रः** - साम्प्रतार्थानामभिधानपरिज्ञानम् । तत्त्वा० १-३५ ।

**ऋज्वी**-यस्यामेकां दिशमभिगृह्योपाश्रयाद् निर्गतः प्राञ्जलेनैव पथा समश्रेणिव्यवस्थितगृहपङ्क्तौ भिक्षां परिभ्रमन् तावद् याति यावत्पङ्क्तौ चरमगृहं, ततो भिक्षामगृह्णन्नेवापर्याप्तेऽपि प्राञ्जलयैव गत्या प्रतिनिवर्तते सा ऋज्वी । बृ० प्र० २५७ अ ।

**ऋणं**-पापम् । प्रश्न० ७ ।

**ऋणघ्ना**-ऋणं-कर्म तद्घ्ना । आव० ५९५ ।

**ऋतं**-दुःखं, पीडितम् । ठाणा० १८८ । दुःखम् । आव० ५८४ । पीडितः । भग० ५६० । दुःखपर्यायवाची । उत्त० ६०९ ।

**ऋतुबद्धावग्रहः**-अवग्रहस्य द्वितीयो भेदः । सम० २३ ।

**ऋतुमासः** - कर्म्ममासः, स त्रिंशद्दिवसप्रमाणः । बृ० प्र० १८६ आ ।

**ऋतुसंवत्सरः**-सावनसंवत्सरः । ठाणा० ३४५ ।

**ऋद्धा**-भवनादिभिर्वृद्धिमुपगता । ज्ञाता० १ ।

**ऋषभः**-प्रथमतीर्थंकरः । ज्ञाता० १२९ ।

**ऋषभमण्डलप्रविभक्तिः**-एकादशो नाट्यविधिः । जीवा० २४६ ।

**ऋषभदत्तः**-कोडालसगोत्रब्राह्मणविशेषः । आव० १७८ ।

**ऋषभस्वामी**-प्रथमतीर्थंकरः । व्य० द्वि० २ आ ।

**ऋषितः**-नोपशमं नीतः । व्य० द्वि० २२४ आ ।

**ऋषिवादिकाः**-गन्धर्वभेदविशेषः । प्रज्ञा० ७० ।

## ए

**एंती**-आगच्छन्ती । बृ० द्वि० १६७ आ ।

**एंतो**-आगच्छन् । आव० ४२० ।

**एंतओ**-आगच्छन् । आव० १९६ ।

**ए**-वाक्यालंकारे । अनु० १७६ । अलङ्कारे । भग० ७०५ । वाक्यालङ्कारे । भग० ८२ । आमन्त्रणार्थः, अलङ्कारार्थोऽवा । भग० ३७ ।

**एइंसु**-ज्ञातवन्तोऽनुभूतवन्तः । भग० ७२६ ।

**एइणा**-अनेन । बृ० द्वि० ११० अ ।

**एई**-इयती । आव० ५१३ ।

**एककाः**-अध्ययनविशेषः । ठाणा० ३८७ ।

**एकखुर**-अश्वगोहस्तिसिंहादयः । सम० १३५ ।

**एकतश्चक्रवालं**-एकस्यां दिशि नटानां मण्डलाकारेण नर्त्तनम् । जं० प्र० ४१५ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**एकतोवक्रद्विधातोवक्रएकतश्चक्रवालद्विधातश्चक्रवालचक्रार्द्धचक्रवालाभिनयात्मकः**-चतुर्थी नाट्यविधिः। जीवा० २४६। जं० प्र० ४१५।

**एकतोवक्र**-एकतोवक्रं नाम नटानां एकस्यां दिशि धनुराकारश्रेण्या नर्त्तनम्। जं० प्र० ४१५।

**एकतोवेदिका**-एकं जानु बाह्वोरन्तरे कृत्वेति। ठाणा० ३६२।

**एकत्तवियक्कं**-एकत्ववितर्कम्। आव० ३२७।

**एकत्ववितर्कमविचारं** - शुक्लध्यानद्वितीयभेदः। आव० ६०३।

**एकधारं**-शस्त्रविशेषः। दश० २०१।

**एकभविक**-तत्र एकस्मिन् भवे तस्मिन्नेवातिक्रान्ते भावी। एकभविकः-योऽनन्तर एव भवे इन्द्रतयोत्पस्यत इति। ठाणा० १०३।

**एकभावं**-एकत्वम्। उत्त० ५८०।

**एकमुखं**। ओघ० ९९।

**एकल्लओ**-एकाकी। आव० ३०६।

**एकलशाटक**-एकवस्त्रकः। ओघ० ४३।

**एकविहारप्रतिमा**-पञ्चमी प्रतिमा। सम० ९६।

**एकस्थीकृतं**-न एकस्थमनेकस्थं अनेकस्थमेकस्थमिव कृतमेकस्थीकृतम्। आचा० ६३।

**एका** -एकाः-श्रेष्ठाः संज्ञाशब्दत्वान्न सर्वादित्वम्। जं० प्र० १३१।

**एकाए**-एकः। व्य० द्वि० ४१७ अ।

**एका त**-एक एवाहमित्यन्तो-निश्चयः। उत्त० ३०७।

**एकान्तरः**-अनन्तरसमयः। आव० १४।

**एकान्तवित्**-एकान्तेन विदितसंसारस्वभावतया मौनीन्द्रमेव शासनं तथ्यं नान्यदित्येवं वेत्तीति। सूत्र० २६५।

**एकायतनं** - एकं-अद्वितीयं आयतनं-ज्ञानादित्रयम्। आचा० २०७।

**एकावलिः**-भूषणविधिविशेषः। जीवा० २६८।

**एकावली**-विचित्रमणिककृता एकसरिका। जं० प्र० १०५। विचित्रमणिका। ज्ञाता० ४३। कनकावल्यभिलापेनेत्यर्थः। औप० ३०।

**एकाशीतिपदवास्तुन्यासः**। जं० प्र० २०८।

**एकिका**-प्रश्रवणम्। आचा० ४०९।

**एक्कई**-एकीकृत्य-यौगपद्येन। ओघ० १११।

**एक्कगमा**-एकगमाः-तुल्याभिलापाः। ठाणा० ५८।

**एक्कगमे**-एकगमः-षड्भ्योऽप्यन्तेऽङ्क एव पाठः। अन्त० ४।

**एक्कडे**-पर्वगविशेषः। प्रज्ञा० ३३।

**एक्कमुहा**-जेसिं एक्कओ णालाण मूहा ते एक्कतोमूहा। नि० चू० प्र० १६१ अ।

**एक्कल्लओ**-एकाकी। आव० १९३।

**एक्कवारिआ**। ओघ० ९७।

**एक्कसंकलितबद्धा**-एकश्रृंखलाबद्धाः। आव० ६३।

**एक्कसरा**-सहैव। आव० ३६७।

**एक्कसिं**-एकशः। आव० ८१३।

**एक्कसेल**-एकशैलः-वक्षस्कारपर्वतः। जं० प्र० ३४७।

**एक्काणिया**-एकाकिनी। आव० ५६०।

**एक्कारसी**-एकादशी तिथिः। ज्ञाता० १५३।

**एक्काहिज्जा**-व्यन्तरीविशेषा। नि० चू० प्र० ३०४ आ।

**एगंगिओ**-संघातिमासंघातिमो एगंगिओ भवति। नि० चू० द्वि० ७९ अ।

**एगंगियं**- एकांगिकं तज्जातदसिकं सदसिकाकम्बलीखण्डनिष्पादितम्। ओघ० २१४। य एकेन फलकादिना कृतः। बृ० तृ० १६२ अ। एकाङ्गिकं-तज्जातदशिकं न वा द्वयादिखण्डनिष्पन्नम्। बृ० द्वि० २३९ अ।

**एगंत**-एकान्तं-विजनम्। ज्ञाता० ८८। नियमः। उत्त० २४१। एकः-अद्वितीयः, कर्मणामन्तो यस्मिन्निति, मोक्षः। उत्त० ३०७। एकनिश्चयः। भग० २९०। एकान्तं-अनुपघातकं स्थानम्। दश० १५६। निश्चयः। उत्त० ५८७। इतरव्यासङ्गपरिहारात्मकम्। उत्त० ६२२। मोक्षः। दश० १६५। विजनम्। भग० ३२३। योजनमण्डलादन्यत्र। जं० प्र० ३८८।

**एगंतचरिया**-एकान्तचर्या-द्रव्यक्षेत्रकालभावेष्वसम्बद्धता। दश० १५।

**एगंतदिट्ठी**-एकान्तदृष्टिः-एकोऽन्तो-निश्चयो यस्याः सा तथा, सा चासौ दृष्टिः, अनन्याक्षिप्ता। उत्त० ४५७। एकान्तदृष्टिः-एकान्तेन तत्त्वेषु-जीवादिषु पदार्थेषु दृष्टिर्यस्यासौ। सूत्र० २३४। एकोऽन्तो-निश्चयो यस्याः सा एकान्ता सा दृष्टिः-बुद्धिर्यस्मिन् एकान्तदृष्टिः। ज्ञाता० ५१। एकान्ता-ग्रा-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ह्यमेवेदं मयेत्येवमेव निश्चया दृष्टिर्यस्य सः । ज्ञाता० ८० । एकान्तेन निश्चला जीवादितत्त्वेषु दृष्टिः–सम्यग्दर्शनं यस्य स एकान्तदृष्टिः–निष्प्रकम्पसम्यक्त्वः । सूत्र० १४१ ।

**एगंतदिट्ठीए**-एकोऽन्तो-निश्चयो यस्याः सा एकान्ता सा दृष्टिः–बुद्धिर्यस्मिन्निर्ग्रन्थे प्रवचने–चारित्रपालनं प्रति तदेकान्तदृष्टिकम् । एकान्ता–एकनिश्चया दृष्टिः–दृक् यस्य स एकान्तदृष्टिकः । ज्ञाता० ५१ ।

**एगंतधारा**-एकत्रान्ते–वस्तुभागेऽपहर्तव्यलक्षणे धारा–परोपतापप्रधानवृत्तिलक्षणा यस्य स एकधारः । ज्ञाता० ८० । एकान्तधारा–तीक्ष्णधारा । उत्त० ३२७ । एकान्ता–एकविभागाश्रया धारा यस्य सा एकान्तधारा । ज्ञाता० ५१ ।

**एगंतपंडिए**-एकान्तपण्डितः–साधुः । भग० ९१ ।

**एगंतबाले**-एकान्तबालः–मिथ्यादृष्टिः अविरतो वा । भग० ९० ।

**एगंतमंतं**-एक इत्येवमन्तो-निश्चयः यत्रासावेकान्त एक इत्यर्थः अतस्तमन्तं भूभागम् । भग० २९० ।

**एगंतमोणेण**-एकान्तमौनेन-संयमेन करणभूतेन । सूत्र० २३९ ।

**एगंतरं**-एकान्तरोऽनन्तरसमयः । विशे० २०९ । एकान्तरं–एकेन चतुर्थलक्षणेन तपसाऽन्तरं–व्यवधानं यस्मिंस्तत् उत्त० ७०६ ।

**एग**-एकः–असहायो रागद्वेषादिसहभावविरहितो गौतमादिरित्यर्थः । उत्त० २४१ । तथाविधतीर्थकरनामकर्मोदयादनुत्तरावाप्तविभूतिरद्वितीयः, तीर्थकरः । घातिकर्मसाहित्यरहितः । उत्त० २४१ । एकत्र । ओघ० ३३ । असहायः । ठाणा० ३५ । तत्र प्रदेशार्थतया असंख्यातप्रदेशोऽपि जीवो द्रव्यार्थतया एकः, अथवा प्रतिक्षणं पूर्वस्वभावक्षयापरस्वरूपोत्पादयोगेनानन्तभेदोऽपि कालत्रयानुगामिचैतन्यमात्रापेक्षया एकः, अथवा प्रतिसन्तानं चैतन्यभेदेनानन्तत्वेऽप्यात्मनां संग्रहनयाश्रितसामान्यरूपापेक्षयैकत्वम् इति । सम० ५ । मोक्षोऽशेषमलकलङ्करहितत्वात् संयमो वा रागद्वेषरहितत्वात् । आचा० २१२ । पूर्वपूर्वरूपः उत्तरोत्तररूपः, आद्यः, पर्यवसानो वा । प्रज्ञा० २६५ । धर्मसहायविप्रमुक्तः अल्पसागारिकस्थितो वा । दश० १८८ । उद्रेकावस्थावर्तिनैकेन गुणेन स्पर्शाख्येनोपलक्षितः इति एकः–वायुः । आचा० ७५ । एकाकी, असहायः । ठाणा० १९० । आन्तरव्यक्तरागादिसहायवियोगात् अद्वितीयः तथाविधपदात्यादिसहायविरहात् । ज्ञाता० ३४ । सदृशः । ज्ञाता० ५७ । एकः–रागद्वेषरहिततया ओजाः, यद्वाऽस्मिन् संसारचक्रवाले पर्यटन्नसुमान् स्वकृतसुखदुःखफलभाक्त्वेनैकस्यैव परलोकगमनतया सदैकक एव भवति । सूत्र० २६५ । समानः । राज० ४९ । मोक्षः संयमो वा । सूत्र० २३५ ।

**एगइओ**-एकदा कदाचिद् एकचरो वा । आचा० ३३० ।

**एगइया**-एकका:, एके केचनेत्यर्थः । भग ३२ ।

**एगइयाणं**-एकेषां, न तु सर्वेषाम् । भग० १२९ ।

**एगईओ**-एकः कश्चिदेकाकी वा । आचा० ३३० ।

**एगउ**-एकस्मिन् देशे । ज्ञाता० । ९३ ।

**एगओ**-एकतः । ज्ञाता० ७० । एकः स एव एककः, एको वा प्रतिमाप्रतिपत्त्यादौ गच्छतीत्येकगः । एकं वा कर्मसाहित्यविगमतो मोक्षं गच्छति–तत्प्राप्तियोगानुष्ठानप्रवृत्तेर्यातीत्येकगः । उत्त० १०८ ।

**एगओखहा**-एकस्यां दिश्यङ्कुशाकारा । ठाणा० ४०७ । यया जीवः पुद्गलो वा नाड्या वामपार्श्वादेस्तां प्रविष्टस्तयैव गत्वा पुनस्तद्वामपार्श्वादावुत्पद्यते सा एकतःखा, एकस्यां दिशि वामादिपार्श्वलक्षणायां खस्य–आकाशस्य लोकनाडीव्यतिरिक्तलक्षणस्य भावादिति । भग० ८६६ ।

**एगओजण्णोवइयकिच्चगए** । भग० ११० ।

**एगओवंका**-एकतः–एकस्यां दिशि वङ्का–वक्रा एकतोवक्रा । भग० ८६६ ।

**एगओवत्ता**-द्वीन्द्रियजीवविशेषाः । प्रज्ञा० ४१ ।

**एगखम्भ**-एकस्तम्भः–एकः स्तम्भो यस्मिन् सः प्रासादः । दश० ४१ ।

**एगखुर**-प्रतिपदमेकः खुरो येषां ते एकखुराः–अश्वादयः । जीवा० ३८ । प्रतिपदमेकः खुरः–शफो येषां ते एकखुराः–अश्वादयः । प्रज्ञा० ४५ । एकः खुरः–चरणे येषामधोवर्त्यस्थिविशेषो येषां ते एकखुरा–हयादयः । उत० ६९९ ।

**एगगयं**-एगांगिकं–तकम् । व्य० द्वि० ८१ आ ।

**एगगुण**-एकगुणः एकेन गुणो–गुणनं–ताडनं यस्य स एकगुणः । ठाणा० ३५ ।

**एगगुणकालए**-एकः–सर्वजघन्यो गुणः–अंशस्तेन कालकः परमाण्वादिरेकगुणकालकः–सर्वजघन्यकृष्णः । अनु० १११ ।

**एगग्ग**-एकाग्रस्य–एकालम्बनस्यार्थाचेतसो भावः एकाग्र्यं–ध्यानम् । उत्त० ६२१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**एगग्गचित्त**-एकाग्रचित्तः-एकाग्रालंबनः। दश० ५७।

**एगग्गमणो**-एकाग्रमनाः-अवहितचित्तः। उत्त० ५९९।

**एगग्गहण**-एकग्रहणेन-एकशब्देन। भग० १४९।

**एगग्गहणगहिया**-एकग्रहणगृहीता-एकग्रहणेन-एकशब्देन-धर्मास्तिकाय इत्येवंलक्षणेन गृहीता ये ते तथा, एकशब्दाभिधेया इत्यर्थः। भग० १४९।

**एगचरा**-एकचराः-एकाकिनः। आचा० ३०८।

**एगचक्खू**-अतिशयवत् श्रुतज्ञानादिर्वर्जितो विवक्षित इति एकचक्षुः चक्षुरिन्द्रियापेक्षया। एकं चक्षुरस्येति। ठाणा० १७१।

**एगचक्खू विणिहय**-एकचक्षुर्विनिहतः-एकं चक्षुर्विनिहतं यस्य सः। प्रश्न० २५।

**एगचरिया**-एकचर्या-एकाकिविहारप्रतिमाऽभ्युपगमः। आचा० २४३।

**एगचोरो**-एकचौरः-य एकाकी सन् हरति सः। प्रश्न० ४६।

**एगच्चा**-एकार्च्या-अद्वितीयपूज्याः संयमानुष्ठाने वा असदृशी अर्चा-शरीरं येषां ते एकार्चाः। उपा० २९।

**एगच्छत्त**-एकछत्रा एकं छत्रं-नृपतिचिह्नमस्यामिति, अविद्यमानद्वितीयनृपतिः। उत्त० ४४८।

**एगजंबूए**-उल्लुकतीरे चैत्यविशेषः। भग० ७०५।

**एगजडी**-एकजटी-एकाशीतितमो ग्रहः। जं० प्र० ५३५। त्र्यशीतितमो ग्रहः। ठाणा० ७९।

**एगज्जं**-एकग्रम्-एकवाक्यतया संप्रधार्य। आचा० ३३०।

**एगट्ठ**-एकस्थः-एकत्र। आव० ७१०। एकार्थ-अनन्यविषयं एकप्रयोजनं वा। भग० १७।

**एगट्ठभागमुहुत्तेहिं**-मुहूर्तैकषष्टिभागाभ्याम्। सूर्य० १२।

**एगट्ठाणं**-एकस्थानकं-यथा अङ्गोपाङ्गस्थापितं तेन तथावस्थितेनैव समुद्देष्टव्यम्। आव० ८५३।

**एगट्ठि**-एगबीयं। नि० चू० प्र० ५६ आ।

**एगट्ठिआणुओगे**-एकश्चासावर्थश्च-अभिधेयो जीवादिः स येषामस्ति त एकार्थिकाः-शब्दास्तैरनुयोगस्तत्कथनमित्यर्थः। ठाणा० ४८१।

**एगट्ठिए**-एकश्चासावर्थश्च-अभिधेयः एकार्थः स यस्यास्ति स एकार्थिकः, एकार्थवाचक इत्यर्थः। ठाणा० ४९२।

**एगट्ठिभागमुहुत्तेहिं**-मुहूर्तैकषष्टिभागाभ्याम्। सूर्य० १२।

**एगट्ठिभागे**-एकषष्टिभागान्। सूर्य० २५।

**एगट्ठिया**-एकमस्थिकं फलमध्ये येषां ते। भग० ८०४। एकमस्थिकं-फलमध्ये बीजं येषां ते एकास्थिकाः। भग० ३६४। एकास्थिका-नौः। विपा० ८०। ज्ञाता० २२७। फलं फलं प्रति एकमस्थि येषां ते एकास्थिकाः। प्रज्ञा० ३१।

**एगठाणं**-एकस्थानम्। आव० ८५२। एकः सङ्घाटकः। ओघ० ९९।

**एगणासा**-एकनाशा पश्चिमरुचकवास्तव्या पञ्चमी दिक्कुमारीमहत्तरिका। जं० प्र० ३९१।

**एगणिसेज्जाए**-एकेनासनपरिग्रहेण। सम० ७२।

**एगतियाओ**-एककाः-काश्चन। जीवा० १९८।

**एगतो**-एकतः-एकस्मिन् स्थाने। व्य० प्र० १५४ अ।

**एगतोनिसहसंठिया**-एकतो-रथस्य एकस्मिन् पार्श्वे यो नितरां सहते स्कन्धपृष्ठे वा समारोपितं भारमिति निषधो-बलीवर्द्दस्तस्येव संस्थितं-संस्थानं यस्याः सा एकतोनिषधसंस्थिता। सूर्य० ७१।

**एगतोवंका**-एकओवंका-एकस्यां दिशि वक्रा। ठाणा० ४०७।

**एगतोवत्ता**-एकतोवर्ताः-द्वीन्द्रियजीवविशेषाः। जीवा० ३१।

**एगतोवेति**-एगखीला। नि० चू० प्र० १२७ अ।

**एगत्त**-एकता, यैकता-निरालम्बनत्वम्। भग० ९२४। एकत्वं-अभेदः। ठाणा० १९१।

**एगत्तवियक्के**-एकत्वेन-अभेदेनोत्पादादिपर्यायाणामन्यतमैकपर्यायालम्बनतयेत्यर्थो वितर्कः-पूर्वगतश्रुताश्रयो व्यञ्जनरूपोऽर्थरूपो वा यस्य तदेकत्ववितर्कम्। ठाणा० १९१।

**एगत्तीकरण**-एकत्वकरणं-एकाग्रत्वविधानम्। ज्ञाता० ४६।

**एगत्था**-एकार्थाः-एके च ते अर्थाश्चेति एकार्थाः, एकेषांचिन् न सर्वेषां निखिलानां वक्तुमशक्यत्वादर्थाः-जीवादयः। सम० ११३।

**एगदिसिं**-एकया दिशा पूर्वोत्तरलक्षणया। ज्ञाता० ४५।

**एगदुवारा**-एकद्वारा-एकप्रवेशनिर्गममार्गा। ज्ञाता० २३८।

**एगदिट्ठी**-एकदृष्टिः-बद्धलक्षः। प्रश्न० १५८।

**एगन्तुच्छेय**-सर्वथा उत्-प्राबल्येन छेदो-विनाशः एकान्तोच्छेदः-निरन्वयो नाश इत्यर्थः। दश० ४०।

**एगपक्खं**-एकपक्षः, एकः पक्षो ब्राह्मणलक्षणो यस्य तत्। उत्त० ३६०।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**एगपक्खी**-एकपक्षिकः-एकवाचनः, एककुलवर्त्ती। व्य० प्र० २१२ अ। एकपक्षिकः-अल्पश्रुतः। व्य० प्र० २१३ अ। गुरुभ्राता भ्राता गुरुगुरुर्गुरुनप्ता समानकुलश्च समानश्रुतो वा। बृ० तृ० १३६ आ।

**एगपत्ती**-एकपत्नी। आव० ६५।

**एगपयेसोगाढं**-एकप्रदेशावगाढम्-जीवापेक्षया कर्मद्रव्यापेक्षया च ये एके प्रदेशास्तेष्ववगाढम्। भग० ५३।

**एगभविय**-एकभविकः-नोआगमतः द्रव्यद्रुमस्य प्रथमः प्रकारः, य एकेन भवेनानन्तरं द्रुमेषूत्पस्यते। दश० १७।

**एगभायणो**-समपंक्तिः। नि० चू० तृ० ४७ अ।

**एगभाव**-एको भावः-सांसारिकसुखविपर्ययात् स्वाभाविकसुखरूपो यस्यासावेकभावः। भग० ६४०। मध्यस्थता। ओघ० ११३।

**एगभूए**-एकभूतः एक एव-आत्मोपमः। ठाणा० २१। एकत्वं प्राप्तः। भग० ६४०।

**एगमंडवे**-एकमडम्बं नाम यस्य निवेशस्य सर्वासु दिक्षु विदिक्षु च नास्ति कोऽप्यन्यो ग्रामो नगरं वा तस्मिन्नेकमडम्बे। व्य० द्वि० २१६ अ।

**एगमणा**-एकं-दर्शनान्तरोक्तजीवाजीवविभक्तावगतत्वेन मनः-चित्तं येषां ते एकमनसः-श्रद्धानवन्तः। उत्त० ६७१।

**एगमणो**-एकमनाः-एकाग्रचित्तः। आव० ७८०।

**एगमना**-एकम्-एकत्र प्रस्तुते वस्तुन्यभिनिविष्टत्वेन मनो यस्यासौ एकमनाः। उत्त० ५९९।

**एगमेगं**-एकैकम्। सूर्य० ३३।

**एगयओ**-एकतः एकस्कन्धतया। भग० १०४। एकतः-एकीभूय, संयुज्येत्यर्थः। भग० ७७४। एकत्र। ठाणा० ३१४।

**एगयर** – एकतरं, अन्यतमत्। आव० ७३। एकतरः-अनुकूलः। आचा० २४२।

**एगराइंदियाए**-द्वादशी एकरात्रमानेति। ज्ञाता० ७३।

**एगराइया**-एकरात्रिकः-अपान्तराले वसामि तत्र गोकुलादौ प्रचुरगोरसादिलाभेऽपि प्रतिबन्धमकुर्वता कारणमन्तरेण मयैकरात्रमेव वस्तव्यं नाधिकमित्येवंरूपेणाभिग्रहेण। व्य० प्र० १३६ आ। एकरात्रिकी। उत्त० ५३१। आव० २१६।

**एगराइयाभिक्खुपडिमा** – रात्रिप्रमाणा द्वादशी भिक्षुप्रतिमा। सम० २१।

**एगराई**-एकरात्रिकी। आव० ६४८।

**एगरायं** एका रात्रिर्यत्र तत् एकरात्रं। एकां रात्रिं यावत् तत्। उत्त० ११०।

**एगलंभिए**-य एकं प्रधानं शिष्यमात्मना लभते गृह्णाति शेषास्त्वाचार्यस्य समर्पयति, स एकलाभेन चरतीति एकलाभिकः। व्य० प्र० २३२ आ।

**एगल्ल**-एकाकिनः। ठाणा० ४१६।

**एगल्लविहार**-एकाकिविहारः। आव० ३६५।

**एगवंद**-एकवृन्द एकाकी। व्य० प्र० २०१ अ।

**एगविऊ**-एकमेवात्मानं परलोकगामिनं वेत्तीति एकवित्, न मे कश्चिद् दुःखपरित्राणकारी सहायोऽस्तीत्येवमेकवित्। एकान्तविद् वा-एकान्तेन विदितसंसारस्वभावतया मौनीन्द्रमेव शासनं तथ्यं नान्यदित्येवं वेत्तीत्येकान्तवित्, एकः-मोक्षः संयमो वा तं वेत्तीति। सूत्र० २६५।

**एगविह**-एकविधः। विशे० ३९६।

**एगविहिविहाणा**-एकेन विधिना प्रकारेण चक्रवाललक्षणेन विधानं स्वरूपस्य करणं येषां ते एकविधिविधानाः। भग० २८२।

**एगसरा**-विचित्तेहिं एगसरा एगावली। नि० चू० प्र० २५४ आ। जहा संजतीए पयालणी कसामिव्वणी णिव्भंगे वा दिज्जति। नि० चू० प्र० १२७ अ।

**एगसाडियउत्तरासंगकरण**-एका शाटिका यस्मिंस्तत्तथा, तच्च तदुत्तरासङ्गकरणं च-उत्तरीयस्य न्यासविशेषः। ज्ञाता० ४६।

**एगसालयं**-एकशालकम्। जीवा० २६९।

**एगसित्थ** एकसिक्थु-यत्रैकमेव सिक्थु भुज्यते तत्। उत्त० ६०४।

**एगसेलकूडे**-एकशैलकूटं, एकशैलवक्षस्कारकूटनाम। जं० प्र० ३४७।

**एगसेलग**। ज्ञाता० २४२।

**एगसेले**। एकशैलो धातकीखण्डपश्चिमार्धस्थमन्दरपर्वतस्थे स्वनामख्याते वक्षस्कारपर्वते। ठाणा० ८०। एकशैलो जम्बूद्वीपस्थमन्दरपर्वतसमीपस्थे स्वनामख्याते वक्षस्कारपर्वते। ठाणा० ३२६।

**एगा** एका-अद्वितीया। आव० ४६५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**एगागारो**-एकाकारः एकस्वरूपः। जीवा १४३।

**एगागिसमुद्दिसगा**-ये न मण्डल्युपजीविनः। ओघ० ८७।

**एगाणिओ**-एकाकी। आव० ५५८।

**एगाणुप्पेहा**-एकस्य-एकाकिनो असहायस्यानुप्रेक्षा-भावना एकानुप्रेक्षा। ठाणा० १९०।

**एगाभिमुहा**-एकं भगवन्तं अभिमुखं येषां ते एकाभिमुखाः। ज्ञाता० ४५।

**एगाभोगो**-एगा योगो भण्णति। नि० चू० प्र० ४७ अ।

**एगामोसा**- त्रिभिरंगुलीभिर्वा यद्गृहीतव्यं तदेकायै गृह्णाति सा, मध्ये गृहीत्वा हस्ताभ्यां वस्त्रं घृषन् त्रिभागावशेषं यावन्नयति द्वाभ्यां वा पार्श्वाभ्यां यावद् ग्रहणा। ओघ० ११०। एकामर्शनं एकामर्शा। उत्त० ५४१।

**एगाय**-एकाकिनः। सूत्र० १४०।

**एगालंभी**-एकलाभी-यः प्रधानः शिष्यः तमेकं यो न ददाति अवशेषांस्तु सर्वानपि प्रव्रजितान् गुरूणां प्रयच्छति। येषामेक एव लाभो-यथा यदि भक्तं लभन्ते ततो वस्त्रादीनि न, यथा वस्त्रादीनि लभन्ते तर्हि न भक्तमपि, एकमेव लभन्ते इत्येवंशीला एकलाभिनः। व्य० प्र० २३२ आ।

**एगावलि**-तपविशेषः। आचा० ४२३। एकावली-नानामणिकमयी माला। औप० ५५। विचित्रमणिका। ज्ञाता० ४३। विचित्रमणिकमयी। भग० ४७७।

**एगावलिसंठिते**-एकावलिसंस्थितः-अनुराधानक्षत्रसंस्थानम्। सूर्य० १३०।

**एगावली**-एकावलिका-जघन्ययुक्तासङ्ख्यातकसमयानां समुदायः। जीवा० ३४४। विचित्रमणिकमयी। भग० ४५९।

**एगावाती**-एकवादी-तत्रैक एवात्मादिरर्थ इत्येवं वदतीति। ठाणा० ४२५।

**एगासणं**- एकाशनं नाम सकृदुपविष्टपुताचालनेन भोजनम्। आव० ८५३।

**एगाहं**-एकाहं एकमहर्यावत्। जीवा० १०९। दिने दिने गत्वा नोदयति, एकान्तरितं वा। बृ० तृ० १४२ आ। एकाहं-अभक्तार्थम्। व्य० द्वि० ३८६ अ।

**एगाहच्चं**-एका हत्या-हननं-प्रहारो यत्र जीवितव्यपरोपणे तदेकाहत्यम्। भग० ३२३। एका एव आहत्या-आहननं प्रहारो यत्र भस्मीकरणे तदेकाहत्यम्। भग० ६७०। एकं घातं, एकेन घातेनेति भावः। राज० १३४।

**एगाहजातगा**-एकाहर्जाता एकदिवसोत्पन्नाः। आव० ११६।

**एगाहिगारिगा**-एकस्मिन् शय्यातरं पिण्डादावधिकृतदोषेऽनालोचिते एव यानि शेषदोषसमुत्थितानि प्रायश्चित्तानि तानि एकाधिकारिकाणि, एकाधिकारे भवानि एकाधिकारिकाणि। व्य० प्र० ३० अ।

**एगाहिय**-ज्वरविशेषः। भग० १९७।

**एगुरूया**-एकोरुकः-अन्तरद्वीपविशेषः। जीवा० १४४।

**एगूरूता**। ठाणा० २२५।

**एगूरूयदीवे**-अन्तरद्वीपे प्रथमः। ठाणा० २२५।

**एगेभवं**-एको भवान्। ज्ञाता० ११०।

**एगोदगं**-एकोदकं, सर्वात्मनोदकप्लावितम्। जीवा० ३२६।

**एगोरुया**-अन्तरद्वीपविशेषः। प्रज्ञा० ५०।

**एच्चिरेण**-इयता। ओघ० ६५।

**एज** एजतीति एजः -वायुः कम्पनशीलत्वात्। आचा० ७५।

**एज्जंत**-आयान्तमागच्छन्तम्। उत्त० ३५८। आयान्तम्। आव० २८७।

**एज्ज**-एयातां-समागच्छताम्। बृ० तृ० १४१ अ।

**एज्जमाणं**-इयत्, आगच्छत्। जं० प्र० २३३। प्रत्यागच्छत्। ज्ञाता० १३९। एज्यमानं-कम्प्यमानम्। जीवा० १८१।

**एज्जा**-आगच्छेत्। बृ० द्वि० १८७ अ।

**एडगारूढो**-एडकारूढः। आव० ४१७।

**एडेंति**-एडयन्ति-अपनयन्ति। जं० प्र० ३८८।

**एडेइ**-छर्दयति, तीरे प्रक्षिपति। जं० प्र० २३०।

**एडेति**-अपनयति। भग० ६६५।

**एडेसि**-छर्दयसि। ज्ञाता० ६९।

**एणी** स्नायुः। प्रश्न० ८०। हरिणी। जं० प्र० ११०। जीवा० २७०। एण्यः-स्नायवः। जं० प्र० ११०।

**एणीयारा**-एगी-हरिणी मृगग्रहणार्थं चारयन्ति-पोषयन्ति ये ते। प्रश्न० १४।

**एणेज्जग**-गोशालपरावर्त्तिस्थानम्। भग० ६७४।

**एतं**-एतम्-एकम्। प्रश्न० १९।

**एतमट्ठं**-एतं-पुद्गलानामपरापरपरिणामलक्षणमर्थम्। ज्ञाता० १७७।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**एतेवं**-एतदेवमित्यर्थः । भग० ४५५ ।

**एत्ताहे**-अधुना । आव० ३५९ ।

**एत्तिओ**-एतावान् । आव० ४२२ ।

**एत्तिलुयं**-एतावत् । आव० ५५५ ।

**एत्तियपरिक्खओ**-ईयत्परीक्षकः । आव० ८२६ ।

**एत्तो**-एषु । उत्त० १४२ । इतः-अहिकडेवरादिगन्धात् सकाशात् । ज्ञाता० १३० ।

**एत्थं**-अत्र, इह । दश० ९९ ।

**एत्थ** - अशोकवरपादपस्य यदधोऽत्रेत्येवं संबन्धनीयः । ज्ञाता० ६ ।

**एत्थोवरए**-अस्मिन् संयमे भगवद्वच सि वा उप-सामीप्येन रतः व्यवस्थितः । आचा० १६२ ।

**एद्दहो**-एतावान् । आव० ३४१ ।

**एमेए**-एवं अनेन प्रकारेण एते-येऽधिकृताः प्रत्यक्षेण वा परिभ्रमन्तो दृश्यन्ते । दश० ६८ ।

**एयं**-एतत्, एतावत्प्रमाणम् । सूर्य० ११३ ।

**एयंतं**-एजमानं, कम्पमानम् । ठाणा० ३८५ ।

**एयंतगं**-आगच्छत् । आव० २९१ ।

**एयइ**-एजते-कम्पते । भग० १८३ ।

**एयकम्मे**-एतद्व्यापारः, एतदेव वा काम्यं-कमनीयं यस्य स । विपा० ४० ।

**एयग्गो**-एकाग्रः-एकचित्तः । आव० ७७३ ।

**एयणुद्देसए** - एजनोद्देशकः-भगवतीसूत्रस्य पञ्चमशतकस्य सप्तमोद्देशः । भग० २४६ ।

**एयविज्जे**-एषैव विद्या-विज्ञानं यस्य स एतद्विद्यः । विपा० ४० ।

**एयसामायारो** - एतत्सामाचारः-एतज्जीतकल्पः । विपा० ४० ।

**एयारूव**-एतद्रूपं-वक्ष्यमाणरूपम् । भग० ३२२ । एतद्रूपः- एतदेव रूपं-स्वरूपं यस्य सः । जं० प्र० २२ ।

**एयावंति**-एतावन्तः । आचा० २३ ।

**एरंड**-हडकितः । बृ० द्वि० २१९ अ । तृणविशेषः । प्रज्ञा० ३३ । एरण्डः । आचा० १९७ ।

**एरंडइए**-हडक्कयितः । बृ० द्वि० १०६ आ ।

**एरंडकट्ठसगडिया** - एरण्डशकटिका-एरण्डकाष्ठमयी । ज्ञाता० ७६ ।

**एरंडबीयाण**-उत्कटिकाभेदः । प्रज्ञा० २६६ ।

**एरंडमिंजिया**-एरंडमञ्जिका-एरंडफलम् । भग० २९० ।

**एरगा**-एरका-गुन्द्रा भद्रमुस्तक इत्यर्थः । बृ० प्र० २०२ अ ।

**एरवए**-ऐरवतः-क्षेत्रविशेषः । ठाणा० ६८ । ऐरावतः । सूर्य० २२ । ऐरवतः-कर्मभूमिविशेषः । प्रज्ञा० ५५ ।

**एरवतीणदी**-नदीविशेषः । नि० चू० द्वि० ७९ अ ।

**एरावण**-ऐरावणः-शक्रगजः । प्रश्न० १३५ । इन्द्रहस्ती । ठाणा० ३०२ । आव० ३५९ । गुच्छाविशेषः । प्रज्ञा० ३२ ।

**एरावणदहे**-द्रहविशेषः । ठाणा० ३२६ ।

**एरावती**-नदीविशेषः । ठाणा० ४७७ । कुणालानगर्याः समीपे नदी । बृ० तृ० १६१ आ ।

**एरावय** - ऐरावतं-उत्तरपार्श्ववर्तिभरतक्षेत्रप्रतिरूपकक्षेत्रवि-शेषः । जं० प्र० ३३० ।

**एरिंड**-वृक्षविशेषः । भग० ८०२ ।

**एलए**-एलकः-उरभ्रः । प्रश्न० ३७ ।

**एलक**-ऊरणकः । अनु० १२९ ।

